There is no grammatical restriction on the word order.

2) यदि "if" and तर्हि "then" (conditional) : These words are generally placed in the beginning of the clauses they qualify. The "if" clause normally comes first. Example:

यदि रामः फलं विन्देत्, तर्हि सः तुष्येत् ।

"If Rāma may get a fruit, he will be pleased."

3) यदा "when" and तदा "then" (temporal) : These words normally occur at the beginning of the clauses they qualify. Example:

यदा रामः गृहं गच्छति, तदा सः जलं पिबति ।

"When Rāma goes home, he drinks water."

## Vocabulary

### Verbs

| | | | |
|---|---|---|---|
| पच् | (1P) | पचति | to cook |
| यज् | (1P) | यजति | to sacrifice, to worship |
| रक्ष् | (1P) | रक्षति | to protect |
| रुह् | (1P) | रोहति | to climb, to grow (intrans.) |
| वह् | (1P) | वहति | to carry, to flow |
| शंस् | (1P) | शंसति | to praise |
| दंश् | (1P) | दशति | to bite |
| निन्द् | (1P) | निन्दति | to blame, to accuse |
| हृ | (1P) | हरति | to take away, to steal |
| दा | (1P) | यच्छति | to give |
| हस् | (1P) | हसति | to laugh |
| पठ् | (1P) | पठति | to read, to recite |
| प्रच्छ् | (6P) | पृच्छति | to ask |
| रच् | (10P) | रचयति | to arrange, construct, build, compose |
| भ्रम् | (4P) | भ्राम्यति | to roam |
| शम् | (4P) | शाम्यति | to quieten, cease, become peaceful |

### Nouns

#### Masculine

| | |
|---|---|
| कर | hand |
| देश | country |
| मेघ | cloud |
| सूर्य | sun |
| अनिल | wind |
| अनल | fire |
| तात | father |
| पण्डित | a learned man |

#### Neuter

| | |
|---|---|
| स्थान | place |
| शस्त्र | weapon |
| शास्त्र | sacred text, manual |
| शीर्ष | head |
| पुस्तक | book |

**Indeclinables**

| | | | |
|---|---|---|---|
| कुत्र | where? | क्व | where? |
| इह, अत्र | here | कुतः | why? from where? |
| ततः | therefore, from there then | यतः | since, because |
| यदि | if | तर्हि | then (conditional) |
| तदा | then (temporal) | कदा | when? |
| यदा | when (relative pronoun) | यत्र | where (relative pr.) |
| तत्र | there | | |

**Exercises**

1) **Translate the following into English:**

१. यदा रामः तस्याः गृहम् गच्छेत्, तदा स तुष्येत् ।
२. वीरः नृपस्य शीर्षम् शस्त्रेण तुदतु । वयम् तम् न निन्देम ।
३. मेघाः आकाशे भ्राम्यन्ति । मेघानाम् जलैः वने अनलः शाम्येत् ।
४. त्वम् पृच्छसि - हे राम, क्व गच्छसि । कुतो हससि । कुत्र तिष्ठसि - इति ।
५. यदि बालः पुस्तके शास्त्रम् पठेत्, तर्हि तस्य जनकः तस्मै फलम् यच्छेत् ।
६. यदा तस्मिन् देशे नृपः जनान् न रक्षेत्, तदा जनाः नृपं न शंसेयुः । ते तम् निन्देयुः एव ।
७. अनलः अनिलेन न शाम्यति । स जलेन एव शाम्येत् । ततः यत्र अनलः भवति तत्र जनाः पात्रैः जलम् नयन्तु ।
८. सः नृपः तस्मिन् ग्रामे अयजत् । ततः सः पुत्रम् अविन्दत् ।
९. सः बालः यदा वृक्षम् अरोहत्, तदा एव सः चन्द्रम् अपश्यत् ।
१०. यदि जनाः मेघेषु सूर्यम् पश्येयुः, तर्हि ते चिन्तयेयुः - सूर्यः मेघेषु वसति - इति ।
११. जनकाय बालः कराभ्याम् फलानि अयच्छत् । सः अवदत् - हे तात, सर्वाणि (सर्व = all) फलानि जलेन क्षालय । ततः च तानि भक्षय - इति ।
१२. जनकः अवदत् - हे पुत्र, त्वम् एव तानि फलानि जलेन क्षालयेः, ततः अहम् तानि भक्षयेयम् । त्वम् अपि मया सह तानि फलानि भक्षयेः - इति ।
१३. पुत्रः वने ह्रदस्य जलेन तानि फलानि अक्षालयत्, जनकाय च अयच्छत् । तौ फलैः अतुष्यताम् ।
१४. नृपः शस्त्रस्य एव बलम् बोधति । सः चिन्तयति - शस्त्रे एव बलम् भवति - इति । स चिन्तयति - अपि शास्त्रे बलम् भवति - इति ।
१५. पण्डितः नृपाय कथयति - हे नृप, शास्त्रे अपि बलम् भवति - इति ।

**2) Rewrite the above sentences with the sandhis.**

**3) Translate the following into Sanskrit:**

1. The servant ran to the palace, and told the king: "O king, there is fire in the town."
2. The father of the boy should wash the pots with the water of the well.
3. When the sun moves in the sky, people should be happy.
4. The man said to the boy: "O boy, where are you going? You should stay in your house."
5. The boy said: "Why do you ask me? I am not your son, and you are not my father."
6. The king saw the poem of the man. The king was pleased.
7. The man praised the king, and said to him: "O king, you should give me gold and jewels, if you are pleased by / with my poem."
8. The servant carries the pot on his head. There is no food in that pot. Therefore the servant should not get weary.
9. He was reading that book. She saw him. It was her book. She said to him: "Why did you steal my book?"
10. The boy struck the horse, and the horse ran to the forest. A man found that horse in the forest.
11. Rama took her away from the palace. She laughed and said: "I do not long for you. Do not take me away."
12. I did not write that book. You should not praise me. Praise him. He wrote that book.
13. She should protect her son, and the son should protect her.
14. If I blame you, then you may blame me. I did not blame you, and you still (*tathāpi*) blame me.
15. If you climb the tree, I shall (optative) tell your father. Then God alone will protect you from your father.

**4) Write any five Sanskrit sentences of your own.**

# LESSON 8

**Feminine noun declensions of stems in आ , ई , ऊ**

**नदी (F) river**

| | S | D | P |
|---|---|---|---|
| **Nom** | नदी | नद्यौ | नद्यः |
| **Acc** | नदीम् | नद्यौ | नदीः |
| **Ins** | नद्या | नदीभ्याम् | नदीभिः |
| **Dat** | नद्यै | नदीभ्याम् | नदीभ्यः |
| **Abl** | नद्याः | नदीभ्याम् | नदीभ्यः |
| **Gen** | नद्याः | नद्योः | नदीनाम् |
| **Loc** | नद्याम् | नद्योः | नदीषु |
| **Voc** | नदि | नद्यौ | नद्यः |

**लता (F) a vine**

| | S | D | P |
|---|---|---|---|
| **Nom** | लता | लते | लताः |
| **Acc** | लताम् | लते | लताः |
| **Ins** | लतया | लताभ्याम् | लताभिः |
| **Dat** | लतायै | लताभ्याम् | लताभ्यः |
| **Abl** | लतायाः | लताभ्याम् | लताभ्यः |
| **Gen** | लतायाः | लतयोः | लतानाम् |
| **Loc** | लतायाम् | लतयोः | लतासु |
| **Voc** | लते | लते | लताः |

**वधू (F) young woman, bride, daughter-in-law**

| | S | D | P |
|---|---|---|---|
| **Nom** | वधूः | वध्वौ | वध्वः |
| **Acc** | वधूम् | वध्वौ | वधूः |
| **Ins** | वध्वा | वधूभ्याम् | वधूभिः |
| **Dat** | वध्वै | वधूभ्याम् | वधूभ्यः |
| **Abl** | वध्वाः | वधूभ्याम् | वधूभ्यः |
| **Gen** | वध्वाः | वध्वोः | वधूनाम् |
| **Loc** | वध्वाम् | वध्वोः | वधूषु |
| **Voc** | वधु | वध्वौ | वध्वः |

**More pronouns**

The interrogative pronoun किम् "who, what which" and the relative pronoun यद् "he who, she who, that which" are declined very much like तद्. Just as in the forms of *tad*, *ta* is the base for all the forms except neuter nominative and accusative singular, the forms of *kim* and *yad* have the bases *ka* and *ya* respectively, except in neuter nominative and accusative singular. Compare the following:

| | |
|---|---|
| सः । यः । कः | (There are no separate relative |
| सा । या । का | forms for the first & second |
| तेन । येन । केन | person pronouns. Sanskrit |
| तया । यया । कया | usage combines forms of यद् |
| तस्मै । यस्मै । कस्मै | with forms of first & second |
| तानि । यानि । कानि | person pronouns, i.e. यः अहम्.) |

**Use of यद्** (he who, she who, that which)

यद् is a relative pronoun and thus always occurs in a relative clause: for instance, in the sentence, "I saw the man who told her," the clause "who told her" will be यः तस्यै अकथयत् । The whole

sentence will be: अहं तं नरम् अपश्यम्, यः तस्यै अकथयत् ।. The case of यद् is determined by the role played by the person or thing in the relative clause. Thus:

अहं तं नरमपश्यम्, यस्मै सा फलमयच्छत् ।
"I saw the man, **to whom** she gave the fruit."
अहं तानि फलानि खादामि, यानि त्वमिच्छसि ।
"I eat those fruits, **which** you want."
अहं तस्यै स्पृहयामि, यस्यै त्वं स्पृहयसि ।
"I long for her, **(she) whom** you long **for** (too)."

The clauses with forms of यद् such as case forms, or indeclinable forms such as यदि, यदा, and यत्र, are relative clauses. The relative clauses can come either before or after the main clause, i.e. the clause with forms of the co-relative pronoun such as तद् (including its case forms and indeclinable forms such as तर्हि, तदा, and तत्र). Usually, the noun referred to by the relative pronoun appears in the first clause of the complex sentence:

अहं तस्यै नार्यै स्पृहयामि, यस्यै त्वं स्पृहयसि । versus
अहं यस्यै नार्यै स्पृहयामि, तस्यै त्वं स्पृहयसि ।

**Use of** किम् (who? what? which?)

This is the interrogative pronoun mostly declined with the base क in masc./neut. and का in feminine, cf. forms of तद्. "What, which and who" are declined with genders and numbers. Examples:

| | |
|---|---|
| कः गच्छति । | "Who (M) goes?" |
| का गच्छति । | "Who (F) goes?" |
| किम् खादति । | "What (N) does X eat?" |
| कस्मै यच्छसि । | "To whom (M) do you give?" |
| कस्यै यच्छसि । | "To whom (F) do you give?" |
| कं चिन्तयसि । | "Who (M) do you think of?" |
| कां चिन्तयसि । | "Who (F) do you think of?" |
| किं चिन्तयसि । | "What (N) do you think of?" |

It may be noted that "who(M)" and "who(F)" could refer to inanimate things in Sanskrit, if the words for those things are masculine or feminine. Examples:

| | |
|---|---|
| कं नरं पश्यसि । | "Which man do you see?" |
| कं प्रासादं गच्छसि । | "To which palace do you go?" |
| कां मालां पश्यसि । | "Which garland do you see?" |

**Forms of एतद् "this" (he, she, it)**

These forms are very similar to the forms of तद् "that" (he, she, it), except for some additional optional forms. Just compare the following:

| M | | F | |
|---|---|---|---|
| सः । | एषः | सा । | एषा |
| तौ । | एतौ, एनौ | ताम् । | एताम्, एनाम् |
| तम् । | एतम्, एनम् | ते । | एते, एने |
| तान् । | एतान्, एनान् | ताः । | एताः, एनाः |
| तेन । | एतेन, एनेन | तया । | एतया, एनया |
| तयोः । | एतयोः, एनयोः | | |

| N | |
|---|---|
| तद् । | एतद्, एनद् |
| ते । | एते, एने |
| तानि । | एतानि, एनानि |

**Vocabulary**

**Nouns**

| | | | | | |
|---|---|---|---|---|---|
| लता | (F) | creeper | नदी | (F) | river |
| माला | (F) | garland | जननी | (F) | mother |
| भार्या | (F) | wife | भगिनी | (F) | sister |
| बाला | (F) | girl | वाणी | (F) | speech, sayings |
| शोभा | (F) | splendor | नारी | (F) | woman |
| सभा | (F) | assembly | नगरी | (F) | town |

| | | |
|---|---|---|
| वधू | (F) | bride, young woman, daughter-in-law |
| चमू | (F) | army |
| श्वश्रू | (F) | mother-in-law |

**Pronouns**

| | | |
|---|---|---|
| यद् | (MFN) | he who, she who, that which |
| किम् | (MFN) | who? what? which? |
| एतद् | (MFN) | this (he, she, it) |

**Exercises**

1) **Translate the following into English:**

१ रामो भगिन्या सह तां नगरीमगच्छत् । तस्यां नगर्यां तस्य भगिनी नदीमपश्यत् । सा राममवदत् - हे राम, एतस्या नद्याः शोभां पश्य - इति । रामो भगिनीमवदत् - हे भगिनि, त्वं नदीमेव पश्यसि । तस्या नद्यास्तीरे या नारी तिष्ठति, सा ते श्वश्रूः । यदि सा त्वां पश्येत्, सा न तुष्येत् । ततस्त्वं गृहमेव गच्छ - इति । रामस्य भगिनी राममवदत् - यदि एषा मम श्वश्रूः, तस्या अपि श्वश्रूः गृहे भवति - इति । यदा सा श्वश्रूः रामस्य भगिनीमपश्यत्, तदा सा अवदत् - हे वधु, त्वं मामपश्यः नद्यास्तीरे । तत्(=द्) मम श्वश्र्वै मा कथय - इति । ततः सा श्वश्रूः वध्वा सह गृहमगच्छत् ।

२ का नारी तव भार्या भवति ।

३ का जननी मम श्वश्रूः भवति ।

४ नृपस्य सभायां सा बाला नृत्यतु ।

५ को मम भार्यां पश्यति ।

६ यो मम भार्यां स्पृशेत्, तमहं तुदेयम् ।

७ मम जनन्या भगिनी एतस्या लतायाः शोभामपश्यत् ।

८ नद्याः परतश्चमूस्तिष्ठति ।

2) **Write the above sentences without the sandhis.**

**3) Translate the following into Sanskrit (with sandhis):**

1. I see Rāma's wife on the bank of that river.
2. My mother would be pleased, if she were to see your sister.
3. The poet read his poems in the assembly of the king.
4. Her mother-in-law told me.
5. The king's army should conquer this town.
6. I think of the girl who I saw in your house.
7. Your sister's mother-in-law is my mother.
8. In which house do you live?
9. Who is your wife?
10. In whose assembly did you read your poems?
11. Who is that woman?
12. Does your wife see that army?
13. I am satisfied with that garland.
14. I see the splendor of the moon in the sky.
15. In which town do you live?

**4) Write the declensions of the following:**

भार्या , वाणी , श्वश्रू , एतद्

**5) Write any five Sanskrit sentences.**

# LESSON 9

**Declension of masculine nouns in इ and उ**

मुनि (M) sage

| | S | D | P |
|---|---|---|---|
| **Nom** | मुनिः | मुनी | मुनयः |
| **Acc** | मुनिम् | मुनी | मुनीन् |
| **Ins** | मुनिना | मुनिभ्याम् | मुनिभिः |
| **Dat** | मुनये | मुनिभ्याम् | मुनिभ्यः |
| **Abl** | मुनेः | मुनिभ्याम् | मुनिभ्यः |
| **Gen** | मुनेः | मुन्योः | मुनीनाम् |
| **Loc** | मुनौ | मुन्योः | मुनिषु |
| **Voc** | मुने | मुनी | मुनयः |

तरु (M) tree

| | S | D | P |
|---|---|---|---|
| **Nom** | तरुः | तरू | तरवः |
| **Acc** | तरुम् | तरू | तरून् |
| **Ins** | तरुणा | तरुभ्याम् | तरुभिः |
| **Dat** | तरवे | तरुभ्याम् | तरुभ्यः |
| **Abl** | तरोः | तरुभ्याम् | तरुभ्यः |
| **Gen** | तरोः | तर्वोः | तरूणाम् |
| **Loc** | तरौ | तर्वोः | तरुषु |
| **Voc** | तरो | तरू | तरवः |

**Declension of feminine nouns in इ and उ**

मति (F) **intelligence, thought, mind**

| | S | D | P |
|---|---|---|---|
| **Nom** | मतिः | मती | मतयः |
| **Acc** | मतिम् | मती | मतीः |
| **Ins** | मत्या | मतिभ्याम् | मतिभिः |
| **Dat** | मत्यै, मतये | मतिभ्याम् | मतिभ्यः |
| **Abl** | मत्याः, मतेः | मतिभ्याम् | मतिभ्यः |
| **Gen** | मत्याः, मतेः | मत्योः | मतीनाम् |
| **Loc** | मत्याम्, मतौ | मत्योः | मतिषु |
| **Voc** | मते | मती | मतयः |

धेनु (F) cow

| | S | D | P |
|---|---|---|---|
| **Nom** | धेनुः | धेनू | धेनवः |
| **Acc** | धेनुम् | धेनू | धेनूः |
| **Ins** | धेन्वा | धेनुभ्याम् | धेनुभिः |
| **Dat** | धेन्वै, धेनवे | धेनुभ्याम् | धेनुभ्यः |
| **Abl** | धेन्वाः, धेनोः | धेनुभ्याम् | धेनुभ्यः |
| **Gen** | धेन्वाः, धेनोः | धेन्वोः | धेनूनाम् |
| **Loc** | धेन्वाम्, धेनौ | धेन्वोः | धेनुषु |
| **Voc** | धेनो | धेनू | धेनवः |

Compare the forms of मुनि and तरु. They are quite similar with each other. In general, it may be said that when the masculine nouns in इ have इ, ई, य् and ए, the masculine nouns in उ have उ, ऊ, व् and ओ respectively. But compare the forms मुन्योः and तर्वोः, मुनये and तरवे, and मुनौ and तरौ. Here the pairs have the same vowel in their final syllable, because the final vowels are part of the affixes.

The forms of मति and धेनु are also quite parallel in the same

manner. It may be observed that the optional forms of मति and धेनु in the singular from dative to locative result because, for some reason, the feminine nouns in *i* and *u* in these places behave either like the masculine nouns in *i* and *u*, or optionally like the feminine nouns in long *ī* and *ū*. Compare the following:

| | |
|---|---|
| मत्यै । नद्यै | मतये । मुनये |
| मत्याः । नद्याः | मतेः । मुनेः |
| मत्याम् । नद्याम् | मतौ । मुनौ |
| | |
| धेन्वै । वध्वै | धेनवे । तरवे |
| धेन्वाः । वध्वाः | धेनोः । तरोः |
| धेन्वाम् । वध्वाम् | धेनौ । तरौ |

**Visarga sandhi**

A visarga ( : ) changes to र् if it is preceded by any vowel except अ or आ, and followed by a vowel or a *voiced* consonant. Examples:

| | | | | |
|---|---|---|---|---|
| मुनिः | + | अत्र | ⟶ | मुनिरत्र |
| मुनिः | + | गच्छति | ⟶ | मुनिर्गच्छति |
| तरोः | + | इति | ⟶ | तरोरिति |
| तरोः | + | धावति | ⟶ | तरोर्धावति |

**Vowel sandhi**

**A) Lengthening of similar simple vowels:**

a) अ or आ + अ or आ ⟶ आ

Examples:
राम + अत्र ⟶ रामात्र
माला + आकाशे ⟶ मालाकाशे

b) इ or ई + इ or ई ⟶ ई

Examples:
उपरि + इति ⟶ उपरीति
नदी + इति ⟶ नदीति

c) उ or ऊ + उ or ऊ ⟶ ऊ

Example: गच्छतु + उपरि ⟶ गच्छतूपरि

गच्छतु + ऊर्मिः ⟶ गच्छतूर्मिः

d) ऋ or ॠ + ऋ or ॠ ⟶ ॠ

Example (rare) पितृ + ऋषिः ⟶ पितॄषिः

पितृ + ॠकारः ⟶ पितॄकारः

**B) Simple vowels followed by dissimilar vowels:**

a) इ or ई ⟶ य्, if followed by any other vowel.

Examples: उपरि + अश्वः ⟶ उपर्यश्वः

नदी + एव ⟶ नद्येव

b) उ or ऊ ⟶ व्, if followed by any other vowel.

Example: धावतु + अत्र ⟶ धावत्वत्र

c) ऋ or ॠ ⟶ र्, if followed by any other vowel.

Example: पितृ + अत्र ⟶ पित्रत्र

**C) Formation of diphthongs:**

a) अ or आ + इ or ई ⟶ ए

Examples: च + इति ⟶ चेति

मुनिना + इह ⟶ मुनिनेह

b) अ or आ + उ or ऊ ⟶ ओ

Examples: अत्र + उपरि ⟶ अत्रोपरि

मुनिना + उपरि ⟶ मुनिनोपरि

c) अ or आ + ए or ऐ ⟶ ऐ

Examples: च + एव ⟶ चैव

धेन्वा + एतद् ⟶ धेन्वैतद्

d) अ or आ + ओ or औ ⟶ औ

Examples: च + ओदनम् ⟶ चौदनम्

पिबाम + औषधम् ⟶ पिबामौषधम्

**D) Exceptions:**

Long ई, ऊ and ए do not change, if they occur at the end of dual forms of nouns or verbs. Similarly the final vowels of interjections like आ, हे and अहो remain unchanged.

Examples:

| | | | | |
|---|---|---|---|---|
| मुनी | + | अत्र | ⟶ | मुनी # अत्र |
| धेनू | + | इति | ⟶ | धेनू # इति |
| माले | + | अत्र | ⟶ | माले # अत्र |

## Vocabulary

**Masculine**

| | |
|---|---|
| मुनि | sage |
| राशि | heap |
| अतिथि | guest |
| अरि | enemy |
| कवि | poet |
| तरु | tree |
| इषु | arrow |
| गुरु | teacher |
| शिशु | baby, child |
| पशु | beast, animal |

**Feminine**

| | |
|---|---|
| मति | intelligence, thought, mind |
| भक्ति | devotion |
| भूमि | earth, ground |
| रात्रि | night |
| शक्ति | power |
| धेनु | cow |
| चञ्चु | beak |
| रज्जु | rope |
| तनु | body |
| रेणु | dust |

√ताड् (10P) to beat, to strike

## Exercises

**1) Translate the following into English:**

१ रात्रौ मुनिर्नगरीमगच्छत् । तत्र स नृपस्य प्रासादमगच्छत्, प्रासादात् बहिर्भूमौ चासीदत् । नृपस्य दासस्तं मुनिमपश्यत् । सोऽचिन्तयत् - क एषोऽत्र प्रासादात् बहिस्तिष्ठति - इति । स दासो मुनिं प्रति अगच्छत् अवदत् च - कस्त्वम् । कुतोऽत्र नृपस्य प्रासादात् बहिस्सीदसि । त्वं नृपात् किमिच्छसि - इति । ततः स मुनिर्दासमवदत् - हे दास, अहं तव नृपस्य गुरुर्भवामि । त्वं नृपाय कथय - तव गुरुः प्रासादात् बहिस्तिष्ठति - इति । दासस्तद् नृपाय अकथयत् । नृपः

प्रासादात् बहिरगच्छत्, गुरुं चापश्यत् । स गुरुमवदत् - हे गुरो, नमस्ते । त्वं ममातिथिः । मम प्रासादे अहं त्वां पूजयेयम् । तुभ्यं कुसुमानि फलानि च यच्छेयम् । मम भक्त्या त्वं तुष्येः - इति । ततः स नृपस्तं मुनिं प्रासादे अनयत् । स तं तत्रापूजयत् । नृपो भार्यामवदत् - हे भार्ये, एष मे गुरुः । तस्मै यदि त्वं फलानि कुसुमानि च यच्छेः, स तुष्येत् । यदि स तुष्येत्, तर्हि आवयोः सुखं भवेत्, दुःखं च नश्येत् - इति । ततः सा भार्या भक्त्या तं मुनिमनमत्, अपूजयत् च । स मुनिस्तयोर्भक्त्यातुष्यत् । सोऽवदत् - हे नृप, तव भक्त्याहमतुष्यम् । त्वं यद् इच्छसि, तत् ते यच्छेयम् - इति । स नृपोऽवदत् - हे गुरो, अहं धनमिच्छामि । यद् अहं स्पृशेयं, तत् कनकं भवतु - इति । गुरुरवदत् - मम शक्त्या यत् त्वं स्पृशेस्तत् कनकं भवेत् - इति । नृपः सुखेन भार्यामस्पृशत् । तदैव सा भार्या कनकमभवत्, भूमौ चापतत् । स नृपो गुरुमवदत् - हे गुरो, किमेतद् । कुतो मम दुःखम् - इति । गुरुरवदत् - हे नृप, यतस्त्वं कनकाय अस्पृहयः, ततस्त्वं दुःखमविन्दः । यदा त्वं धनमचिन्तयः, तदा तव मतिरनश्यत् । यदा तव मतिरनश्यत्, तदा त्वमेव तव अरिः अभवः । कनकं मा चिन्तय । ईश्वरमेव चिन्तय । यदि त्वमीश्वरं चिन्तयेः, तर्हि ईश्वरस्य शक्त्या तव भार्या जीवनं विन्देत् - इति । ततः स नृपो भूमौ असीदत्, भक्त्या ईश्वरमनमत्, ईश्वरस्य शक्तिं चाशंसत् । तस्य भक्त्या ईश्वरोऽतुष्यत्, तस्य च भार्यायै जीवनमयच्छत् ।

२ काकास्तरौ असीदन् । ते चञ्चुभिः फलान्यखादन् । धेन्वाश्चञ्चुर्न भवति ।
३ वधूः श्वश्र्वाः शक्तिं नाबोधत् । ततः सा दुःखमविन्दत् ।
४ नृपस्य मित्रं कविर्भवति ।
५ यदि जनकः शिशुं ताडयेत्, तर्हि स शिशुस्तं जनकं पशुं चिन्तयेत् ।
६ वीरोऽरीणां तनूः शस्त्रेण कृन्ततु । वयं तस्य शक्तिं शंसेम ।
७ फलानां राशौ रेणवः पतन्ति । तानि फलानि यूयं मा खादेत ।
८ यो नरो मम धनमचोरयत्, तमहं रात्रौ रज्ज्वा अतुदम् ।

**2) Rewrite the above story after making sandhis where there are no sandhis, and dissolving the sandhis where there are sandhis.**

**3) Write the declensions of the following:**
अरि, शिशु, शक्ति, चञ्चु

4) **Translate the following into Sanskrit:**

There was a king. He desired (अ+इच्छत् = ऐच्छत्) happiness. He thought: "If I get gold, I would get happiness." He went to his friend and asked him: "O friend, are you satisfied in your life?" The friend said: "O king, I am satisfied. I am a poet, and a poet longs for his poetry. My poetry is my happiness. I do not have gold. I do not want gold. I am happy without gold." The king went to the forest. In the forest he saw a sage. The sage was sitting on a heap of leaves near a lake. The king asked the sage: "O sage, if you want gold, I may give you gold. Gold is happiness." The sage said: "I am satisfied, since I get what I want. I do not want gold. I am satisfied with the fruit I get in this forest."

5) **Write any five sentences of your own in Sanskrit.**

# LESSON 10

## Middle Verbs (आत्मनेपदिन्)

Here we shall consider middle (आत्मनेपदिन्) verbs. These verbs take **middle endings** (आत्मनेपद) in active voice. No real middle voice as such has survived in the classical language. In Classical Sanskrit, no semantic distinction between active (परस्मैपदिन्) and middle (आत्मनेपदिन्) verbs has survived, though the grammarians argue that for verbs which have a choice of परस्मैपद or आत्मनेपद endings, the आत्मनेपद forms are reflexive. The traditional example is that of the verb यज् "to sacrifice". The sentence नृपो यजते means "the king sacrifices (so that the fruit of the sacrifice goes to himself)." In contrast, the sentence ब्राह्मणो यजति means "the priest sacrifices (so that the fruit of the sacrifice goes to the host)." This semantic distinction has not survived in the classical language. As in the case of the active verbs, the middle verbs are also classified into 10 conjugations. Here we shall consider the middle verbs (**A** for आत्मनेपदिन्) in the conjugations 1, 4, 6 and 10. The middle verbs in these four conjugations have the same **infixes** as the corresponding active verbs.

### Present tense middle forms

लभ् (1A) "to obtain, to get"

| | S | D | P |
|---|---|---|---|
| **1st** | लभे | लभावहे | लभामहे |
| **2nd** | लभसे | लभेथे | लभध्वे |
| **3rd** | लभते | लभेते | लभन्ते |

| | | | | |
|---|---|---|---|---|
| Examples: | मुद् | (1A) | मोदते | to rejoice |
| | मन् | (4A) | मन्यते | to think |
| | नुद् | (6A) | नुदते | to incite, to push |
| | मन्त्र् | (10A) | मन्त्रयते | to counsel |

**Vowel sandhi rules (continued)**

a.1) ए + अ → ए

Examples:

| | | | | |
|---|---|---|---|---|
| लभते | + | अत्र | → | लभतेऽत्र |
| वने | + | अपि | → | वनेऽपि |

a.2) ए → अय्, before any vowel other than अ

Examples:

| | | | | |
|---|---|---|---|---|
| वने | + | इह | → | वनयिह |
| देवे | + | इति | → | देवयिति |

b.1) ओ + अ → ओ

Examples:

| | | | | |
|---|---|---|---|---|
| प्रभो | + | अधुना | → | प्रभोऽधुना |
| गुरो | + | अत्र | → | गुरोऽत्र |

b.2) ओ → अव्, before any vowel other than अ

Examples:

| | | | | |
|---|---|---|---|---|
| गुरो | + | इति | → | गुरविति |
| शिशो | + | इति | → | शिशविति |

c) ऐ → आय्, before any vowel

Examples:

| | | | | |
|---|---|---|---|---|
| तस्मै | + | इति | → | तस्मायिति |
| नद्यै | + | इति | → | नद्यायिति |

d) औ → आव्, before any vowel

Examples:

| | | | | |
|---|---|---|---|---|
| कवौ | + | इह | → | कवाविह |
| गुरौ | + | इति | → | गुराविति |

e) य् and व् resulting from the changes of ए, ओ, ऐ and औ may be optionally elided, and in the case of such elision of य् and व्, no further sandhi occurs. Examples:

| | | | | | | |
|---|---|---|---|---|---|---|
| वने | + | इह | → | वनयिह | or | वन # इह |
| गुरो | + | इति | → | गुरविति | or | गुर # इति |
| तस्मै | + | इति | → | तस्मायिति | or | तस्मा # इति |
| कवौ | + | इति | → | कवाविति | or | कवा # इति |

Due to various sandhi rules, occasionally identical sequences result from different original sequences, and only the larger sentential context can help identify the originals. Compare and contrast the following:

| | |
|---|---|
| (बालाः इह) बाला इह तिष्ठन्ति । | "The boys stand here." |
| (बालौ इह) बाला इह तिष्ठतः । | "Two boys stand here." |
| (बाला इह) बाला इह तिष्ठति । | "A girl stands here." |

**Table showing the combinations of final and initial vowels in external sandhi**

| **Final** ↓ / **With initial** ⟶ | अ | आ | इ | ई | उ | ऊ | ऋ | ॠ | ए | ऐ | ओ | औ |
|---|---|---|---|---|---|---|---|---|---|---|---|---|
| अ/आ | आ | आ | ए | ए | ओ | ओ | अर् | अर् | ऐ | ऐ | औ | औ |
| इ/ई | य | या | ई | ई | यु | यू | यृ | यॄ | ये | यै | यो | यौ |
| उ/ऊ | व | वा | वि | वी | ऊ | ऊ | वृ | वॄ | वे | वै | वो | वौ |
| ऋ/ॠ | र | रा | रि | री | रु | रू | ॠ | ॠ | रे | रै | रो | रौ |
| ए | एऽ | अया | अयि | अयी | अयु | अयू | अयृ | अयॄ | अये | अयै | अयो | अयौ |
| or | | अआ | अइ | अई | अउ | अऊ | अऋ | अॠ | अए | अऐ | अओ | अऔ |
| ऐ | आय | आया | आयि | आयी | आयु | आयू | आयृ | आयॄ | आये | आयै | आयो | आयौ |
| or | आअ | आआ | आइ | आई | आउ | आऊ | आऋ | आॠ | आए | आऐ | आओ | आऔ |
| ओ | ओऽ | अवा | अवि | अवी | अवु | अवू | अवृ | अवॄ | अवे | अवै | अवो | अवौ |
| or | | अआ | अइ | अई | अउ | अऊ | अऋ | अॠ | अए | अऐ | अओ | अऔ |
| औ | आव | आवा | आवि | आवी | आवु | आवू | आवृ | आवॄ | आवे | आवै | आवो | आवौ |
| or | आअ | आआ | आइ | आई | आउ | आऊ | आऋ | आॠ | आए | आऐ | आओ | आऔ |

## Vocabulary

### Middle (आत्मनेपदिन्) Verbs

| | | | |
|---|---|---|---|
| ईक्ष् | (1A) | ईक्षते | to see |
| अर्थ् | (10A) | अर्थयते | to request |
| क्लिश् | (4A) | क्लिश्यते | to suffer |
| खिद् | (4A) | खिद्यते | to be depressed |
| गाह् | (1A) | गाहते | to dive, plunge |
| ग्रस् | (1A) | ग्रसते | to swallow, devour |
| जन् | (4A) | जायते | to be born |
| वृत् | (1A) | वर्तते | to be |
| वृध् | (1A) | वर्धते | to grow (intransitive) |
| भाष् | (1A) | भाषते | to speak |
| मुद् | (1A) | मोदते | to rejoice |
| मन् | (4A) | मन्यते | to think |
| नुद् | (6A) | नुदते | to incite, push |
| मृ | (4A) | म्रियते | to die |
| विद् | (4A) | विद्यते | to be |
| रम् | (1A) | रमते | to sport, to rejoice in |
| लभ् | (1A) | लभते | to obtain, get |
| वेप् | (1A) | वेपते | to tremble |
| मन्त्र | (10A) | मन्त्रयते | to counsel |
| श्लाघ् | (1A) | श्लाघते | to praise |

### Indeclinables

| | |
|---|---|
| अद्य | today |
| श्वः | tomorrow |
| ह्यः | yesterday |
| अधुना | now |
| यथा | just as |
| तथा | so, in that manner |
| एकदा | once |
| कदाचित् | sometimes |
| न कदापि | never |

| | | |
|---|---|---|
| किन्तु | but | |
| यद्यपि | even if | (यदि अपि) |
| तथापि | even then | (तथा अपि) |

**Exercises**

1) **Translate the following into English:**

१. अधुना सा नारी गृहे श्वश्र्वा सह मन्त्रयते ।

२. यद्यपि चन्द्र आकाशे एव भवति, तथापि बाला मन्यन्ते - चन्द्रो ह्रदेऽपि वसति - इति ।

३. जनको जननीं भाषते - हे भार्ये, एतेन बालेन सह आवां मोदावहे - इति ।

४. ह्रदस्य जले गजा गाहन्ते । ते मन्यन्ते - चन्द्रोऽप्यत्रैव गाहते - इति ।

५. शृगाला वने गजमीक्षन्ते । गजस्य शक्तिं ते श्लाघन्ते ।

६. यथाकाशे चन्द्रो वर्धते, तथा गृहे बाला वर्धते ।

७. यदा जननी बालामीक्षते, तदा सा मोदते ।

८. हे भार्ये, अद्याहं त्वामर्थये - मां मा त्यज - इति ।

९. पर्वतस्योपरि वनं विद्यते । तस्मिन् वनेऽद्य गजा म्रियन्ते ।

१०. मित्रस्य वचनेन नृपः खिद्यते, किन्तु स भाषते - हे मित्र, यदाहं त्वामीक्षे, तदाहं मोदे - इति ।

११. यद्यपि मम भार्या मां निन्दति, तथाप्यहं तां श्लाघे । किन्तु सा मां न कदापि श्लाघते ।

१२. यदा स बालो वृक्षात् अधः पतति, तदा स वेपते । स जनकं भाषते - अहं न कदापि वृक्षं रोहेयम् - इति ।

१३. जना मां कविं मन्यन्ते । किन्त्वहं न कदापि काव्यमलिखम् । कविः काव्येन मोदते । अहं काव्येन क्लिश्ये । अहं शास्त्राय स्पृहयामि ।

१४. मम भार्या तस्या जनन्या वचने रमते । किन्तु अहं मम श्वश्र्वा वचनेन खिद्ये ।

१५. यद्यप्यद्य त्वं मां धनस्य कृते श्लाघसे, तथापि ह्यः त्वमेव मामनिन्दः ।

१६. यथा शृगालो मांसं ग्रसते, तथा मम दुःखं मां ग्रसते ।

१७. एतस्मिन् देशे जनाः सुखं न लभन्ते, किन्तु तस्मिन् देशे जना अन्नमपि न लभन्ते ।

१८. यतोऽहमद्य त्वां चिन्तयामि, ततः श्वः त्वमपि मां चिन्तयेः ।

१९. यां नारीमहं चिन्तयामि, सा मां न चिन्तयति । सा यं नरं चिन्तयति, स तां न चिन्तयति । स यां चिन्तयति, सा तं न चिन्तयति । सा कं चिन्तयति । सा मां चिन्तयति ।

२०. यस्मिन् वने स मुनिर्वर्तते, तस्मिन् एव वने सा नारी रमते ।

2) **Rewrite the above sentences, without the sandhis, but write with sandhis those sequences which are originally without sandhis.**

3) **Translate the following into Sanskrit:**

1) I praise the clouds, which wander (भ्रम् 1P, भ्रमति) in the sky, because the clouds give us water.
2) The fire swallows the trees in the forest, as a beast swallows food.
3) The elephants plunge into the water of the lake.
4) The sage looks at the world and thinks that there is only sorrow in the world.
5) In that country, the people are depressed today.
6) When the king strikes his enemies with a weapon, the sages read the sacred texts.
7) When I obtain gold, my happiness grows.
8) I suffer, when my friends blame my poetry.
9) I rejoice, when my enemies suffer.
10) When a man gets his wife's devotion, he rejoices.
11) I see the splendor of the flowers. The flowers are on the creeper.
12) Now when the daughter-in-law sees the mother-in-law, the mother-in-law trembles.
13) Today I say, "O friend, do not recite your poems. Due to those poems, you rejoice, but I feel depressed."
14) The trees grow in the forest.

4) **Write the present paradigms of the following verbs:**

क्लिश् (4A) क्लिश्यते      वृध् (1A) वर्धते
मन्त्र् (10A) मन्त्रयते      ईक्ष् (1A) ईक्षते

5) **Write any five sentences of your own in Sanskrit.**

# LESSON 11

**Middle Verbs (continued)**

**Past imperfect**

लभ् (1M) लभते "to obtain, to get"

| | S | D | P |
|---|---|---|---|
| **1st** | अलभे | अलभावहि | अलभामहि |
| **2nd** | अलभथाः | अलभेथाम् | अलभध्वम् |
| **3rd** | अलभत | अलभेताम् | अलभन्त |

| | | | | |
|---|---|---|---|---|
| Examples: | मुद् | (1M) | मोदते | अमोदत |
| | मन् | (4M) | मन्यते | अमन्यत |
| | नुद् | (6M) | नुदते | अनुदत |
| | मन्त्र् | (10M) | मन्त्रयते | अमन्त्रयत |

**Imperative mood**

लभ् (1M) लभते "to obtain, to get"

| | S | D | P |
|---|---|---|---|
| **1st** | लभै | लभावहै | लभामहै |
| **2nd** | लभस्व | लभेथाम् | लभध्वम् |
| **3rd** | लभताम् | लभेताम् | लभन्ताम् |

| | | | | |
|---|---|---|---|---|
| Examples: | मुद् | (1M) | मोदते | मोदताम् |
| | मन् | (4M) | मन्यते | मन्यताम् |
| | नुद् | (6M) | नुदते | नुदताम् |
| | मन्त्र् | (10M) | मन्त्रयते | मन्त्रयताम् |

**Potential mood**

लभ् (1M) लभते "to obtain, to get"

| | S | D | P |
|---|---|---|---|
| **1st** | लभेय | लभेवहि | लभेमहि |
| **2nd** | लभेथाः | लभेयाथाम् | लभेध्वम् |
| **3rd** | लभेत | लभेयाताम् | लभेरन् |

| | | | |
|---|---|---|---|
| Examples: | मुद् (1M) | मोदते | मोदेत |
| | मन् (4M) | मन्यते | मन्येत |
| | नुद् (6M) | नुदते | नुदेत |
| | मन्त्र् (10M) | मन्त्रयते | मन्त्रयेत |

**Note:** In the case of verbs with initial vowels, the combination of the past-tense अ (or आ according to traditional Sanskrit grammar) with the initial vowel results in the *vṛddhi*-grade of that initial vowel. The *Guṇa* change is seen in बोधति and वर्तते.

| Original | *Guṇa*-grade | *Vṛddhi*-grade |
|---|---|---|
| अ/आ | अ | आ |
| इ/ई | ए | ऐ |
| उ/ऊ | ओ | औ |
| ऋ/ॠ | अर् | आर् |

| | | | | | |
|---|---|---|---|---|---|
| Examples: | अ | + | इच्छत् | ==> | ऐच्छत् |
| | अ | + | ईक्षत | ==> | ऐक्षत |
| | अ | + | अर्थयत | ==> | आर्थयत |

**On the use of the clitics चित् and चन**

In Classical Sanskrit, the most common manner of saying "a man" or "some man" is to use the clitic चित् or चन after the forms of the pronoun किम्. With these clitics, the forms of the pronoun किम् do not remain interrogative, but come to mean "a", "some", "someone", "somebody", etc. Thus, while केन means "by whom?", केनचित्/चन means "by somebody." Similarly, कः नरः गच्छति । means "Which man goes?", but कश्चित्/चन नरः गच्छति । means "Some man" or "A man goes". The sandhi between the forms of किम् and the clitics चित् and चन is obligatory. The same effect may be obtained by using अपि with the forms of किम्. Compare the following:

1a) "Who is standing there?" कः तत्र तिष्ठति?
1b) "Someone is standing there." कश्चित् / कश्चन / कोऽपि तत्र तिष्ठति ।
2a) "Where did you go?" कुत्र त्वम् अगच्छः?
2b) "I went somewhere." अहम् कुत्रचित् / कुत्रचन / कुत्रापि अगच्छम् ।

3a) "Which tree did you see?" कं वृक्षं त्वम् अपश्यः?

3b) "I saw a/some tree." अहम् कञ्चित् / कञ्चन / कमपि वृक्षम् अपश्यम् ।

4a) "Which fruit do you want?" त्वम् किम् फलम् इच्छसि?

4b) "I want a/some fruit." अहम् किञ्चित् / किञ्चन / किमपि फलम् इच्छामि ।

5a) "In which town did you live?" कस्मिन् ग्रामे त्वम् अवसः?

5b) "I lived in a/some town." अहम् कस्मिंश्चित् / कस्मिंश्चन / कस्मिन्नपि ग्रामे अवसम् ।

6a) "By which virtue do you get happiness?" केन गुणेन सुखं लभसे?

6b) "I get happiness by some virtue." केनचित् / केनचन / केनापि गुणेन सुखं लभे ।

**Note:** Negative usages like न कदापि, न कोऽपि, न कुत्रापि etc. mean "never," "no one," and "nowhere," respectively, rather than "not sometime," "not someone," etc. Also note that in the following story, constructions like यः यः . . . सः सः mean something like "whoever, ... all those."

**Vocabulary**

| | | | | | |
|---|---|---|---|---|---|
| स्व | (pron) | one's own | सत्य | (n) | truth |
| सर्वदा | (indcl) | always | स्वर्गलोक | (m) | heaven |
| स्नान | (n) | bath | पुनर् | (indcl) | again |
| मरण | (n) | death | सर्षप | (m) | mustard seed |
| एक | (pron) | one/some | सर्व | (pron) | all |
| शरीर | (n) | body | आ+√नी | | to bring |

**Exercises**

1) **Convert the sentences in Lesson 10 to past-tense, and imperative and potential moods.** (Make changes, if necessary, to make the sentences sensible.)

2) **Rewrite the following story by making all the Sandhis in the first paragraph and by dissolving all the Sandhis in the remaining paragraphs. Also translate it into English.**

एकदा कश्चित् बालः अम्रियत । यदा तस्य बालस्य जननी तस्य शरीरम् अपश्यत्, तदा सा अक्लिश्यत । सा अमन्यत - कुतः मम पुत्रः अम्रियत? अहम् मम जीवने सर्वदा ईश्वरम् भक्त्या अनमम्, तस्य च शक्तिम् अश्लाघे । येषाम् गुणाः भक्तिः च विद्यन्ते,

तेभ्यः ईश्वरः सुखम् एव यच्छति इति अहम् अमन्ये । मम पुत्रस्य गुणाः अवर्तन्त, भक्तिः अपि अविद्यत । यदि ईश्वरस्य मतिः शक्तिः गुणाः च वर्तेरन्, मम पुत्रः कुतः म्रियेत? ततः ईश्वरः न विद्यते, तस्य शक्तिः मतिः च न विद्येते । यतः मम पुत्रः अम्रियत, ततः अहम् अपि जीवने कुतः रमेय? अहम् अपि जीवनम् न इच्छामि । ततः अहम् वनम् गच्छेयम्, नद्याः जले जीवनम् च त्यजेयम् इति । एतया मत्या सा नारी वनम् अगच्छत्, नद्याः जले च स्वम् शरीरम् अक्षिपत् । तदा एव तस्याम् नद्याम् कः चित् मुनिः स्नानाय अगाहत । सः तस्याः नार्याः शरीरम् जले ऐक्षत, ताम् च जलात् तीरे अनयत् । यदा सा नारी तीरे असीदत्, तदा सा अवेपत । ताम् नारीम् सः मुनिः अभाषत - हे नारि, जनाः जीवनम् सुखम् मन्यन्ते, न च तत् कदा अपि त्यजन्ति । कुतः त्वम् तव जीवनम् नद्याम् अत्यजः? कुतः स्वं जीवनम् न इच्छसि? - इति । सा नारी दुःखेन अभाषत - हे मुने, कुतः त्वम् मम जीवनम् अरक्षः? यतः मम पुत्रः अम्रियत, ततः मे दुःखम् अजायत । यतः मे दुःखम् न शाम्यति, ततः अहम् मम जीवनम् त्यजामि, नद्याम् च पतामि । न अहम् जीवनम् इच्छामि । अहम् नद्याम् वा पतेयम् अनलः वा माम् दहतु पशवः वा माम् वने ग्रसन्ताम् । पुत्रः एव मम सुखम् अवर्तत । पुत्रेण विना जीवनम् मरणम् एव । यदि अहं जीवेयम् दुःखेन एव जीवेयम् । किम् तु यदि अहम् अद्य अत्र म्रियेय अद्य एव अहम् स्वर्गलोकम् गच्छेयम् तत्र मम पुत्रम् पश्येयम् तेन सह च अहम् सुखेन जीवेयम् इति । स मुनिः ताम् नारीम् अभाषत - हे नारि, त्वं न मरणम् बोधसि, न वा जीवनम् । मा क्लिश्यस्व । मा खिद्यस्व । एतद् ईक्षस्व । यदा पुत्रः जायते, तदा जनाः मोदन्ते । यदा कः चित् नरः म्रियते, न तदा जनाः मोदन्ते । किम् तु यः यः जायते, सः सः म्रियते एव । यः यः म्रियते, सः सः पुनः जायते एव कुत्रचित् । मरणेन विना जीवनम् न विद्यते । जीवनेन विना मरणम् न वर्तते । यथा वृक्षाः जायन्ते, वर्धन्ते, नश्यन्ति च, तथा पशवः अपि जायन्ते, वर्धन्ते, नश्यन्ति च । यथा पशवः तथा नराः । जनाः मन्यन्ते - मम पुत्रः जायताम् । तस्य अपि पुत्रः जायताम् । अहम् मम पुत्रस्य पुत्रम् ईक्षेय । तस्य भार्याम् ईक्षेय । न कः अपि कदा अपि म्रियताम् । न अहम् म्रियै । न मे भार्या म्रियेत । न वा मम पुत्रः म्रियेत । अहम् सर्वदा एव जीवेयम् इति । किम् तु जनाः न चिन्तयन्ति - यः यः जायते सः सः म्रियते इति । ततः हे नारि, त्वम् जीवेः । मा त्वम् क्लिश्येथाः इति ।

यद्यपि सा नारी मुनेर्वचनमबोधत्तथापि साभाषत - हे मुने, अहं त्वां नमाम्यहमीश्वरं नमाम्यहं यं कमपि नमेयम् । यद्यप्यहं बोधामि - यो जायते स म्रियत एवेति, तथाप्यहं त्वामेतदर्थय एष मम पुत्रस्तव शक्त्या पुनर्जीवनं लभतामिति । स मुनिरभाषत - यदि त्वं मह्यमेकं सर्षपं यच्छेस्तर्हि तव पुत्रः पुनर्जीवेत् । एतं ग्रामं गच्छ । तत्र यस्मिन् गृहे न कदापि कोऽप्यम्रियत, तस्मात् गृहात् एकं सर्षपमानय । यदि त्वं सर्षपमानयेस्तर्हि तव पुत्रो जीवेत् इति ।

सा नारी तं ग्राममगच्छत् । तत्र सा सर्वाणि गृहाण्यगच्छत्, सर्वान् च जनानपृच्छत् । जनास्तस्यायकथयन् - हे नारि, वयं तुभ्यं सर्षपान् यच्छेम, किन्त्वस्माकं

गृहाणि मरणेन विना न विद्यन्ते । सर्वेषु गृहेषु केचित् नराः कदाचित् अम्रियन्तैव । सा नारी गृहात् गृहं, ग्रामात् ग्राममभ्राम्यत् । न क्वापि सा सर्षपमलभत । सर्वत्र सैतद् एवाबोधत् - यो जायते स म्रियत इति । यदा सा नारी - न कोऽपि न म्रियत इत्य-बोधत्तदा सा तं मुनिं प्रति पुनरगच्छत् । सा तमभाषत - हे मुने, अहम् त्वां नमामि । त्वं मे सत्यमदिशः । यद्यपि मम पुत्रोऽम्रियत, तथाप्यधुनाहं न खिद्ये । लोके ये बाला जननीं विना भवन्ति, तेषामहं जननी भवेयम् । तेभ्योऽहं सुखं यच्छेयम् । तेषां सुखेन मम दुःखं नश्येत् अहमपि च सुखं लभेयेति । स मुनिरवदत् य एतद् बोधति, चिन्तयति च, तं दुःखं न कदापि ग्रसते, स एव दुःखं ग्रसते, सुखं च लभतयिति ।

**3) Translate the following into Sanskrit:**

There was a forest. In that forest, there lived a sage. The sage lived with his wife. Near the forest, there was a city. In that city, there lived a king. The king lived in his palace with his wife. The king's wife did not love (=long for) the king. Therefore, the king had no happiness. A man whose wife does not love him has no happiness. The king thought: "If I go to the forest and speak to a sage, my misery will end (√नश्)." The king went to the forest, saw the sage, and spoke to him. The sage laughed and said to the king: "O king, just as your wife does not love you, similarly my wife does not love me. That is why I became a sage and came (आ+√गम्, आगच्छति, to come) to this forest. You should also stay here in the forest with me. I will be (potential) your friend and you will be my friend. The two of us will have happiness." The king lived in the forest with his wife near the sage. In time (कालेन), the king's wife loved the sage, and the sage's wife loved the king. All of them lived with happiness in the forest.

**4) Write five Sanskrit sentences of your own.**

# LESSON 12

## Gerunds and infinitives

### Gerunds:

Gerunds are indeclinable derivative forms derived from verb roots to signify a "preceding action", or to translate a phrase such as "having gone". The restriction on the use of gerunds is that the agent of the gerund and the main verb must be the same. Example: यदा रामो गृहं गच्छति, तदा स जलं पिबति ।

"When Rāma goes home, he drinks water."

This sentence can be converted to a **gerund**-construction by using the gerund गत्वा "having gone".

Example: गृहं गत्वा रामो जलं पिबति ।

"Having gone home, Rāma drinks water."

However, consider the following sentence:

यदा सीता गृहं गच्छति, तदा रामो जलं पिबति ।

"When Sītā goes home, Rāma drinks water."

This sentence is grammatically correct with the construction यदा-तदा. But one cannot change this into a gerund-construction, because there are different agents for the two actions.

If there are several actions preceding a principal action, one can use a series of gerunds:

गृहं गत्वा, जलं पीत्वा, फलानि खादित्वा, रामः सुखेन बहिर्गच्छति ।

"Having gone home, having drunk water and having eaten fruit, Rāma goes out with happiness."

Note that all of these actions have the same agent.

One can use a gerund-construction, as long as there is a subordinate action preceding a principal action. The principal action may be expressed in any tense or mood. Examples:

गृहं गत्वा रामो जलं पिबति । "Having gone home, Rāma drinks water."
गृहं गत्वा रामो जलमपिबत् । "Having gone home, Rāma drank ..."
गृहं गत्वा रामो जलं पिबतु । "Having gone home, Rāma must drink ..."
गृहं गत्वा रामो जलं पिबेत् । "Having gone home, Rāma may drink ..."

There are two gerund-forming affixes, *-tvā* and *-ya*. The affix *-tvā* is used if the verb has no prefixes, and the affix *-ya* is used if the verb has any prefixes. Examples:

गम् + त्वा --> गत्वा "having gone"
सम् + गम् + य --> संगम्य / °त्य "having come together"

This is a purely morphological difference and does not involve any syntactic changes. We shall deal with the use of gerunds and infinitives with passive main-clauses in Lesson 16. For a less frequent gerund form in -अम्, see Lesson 44.

**Infinitives:**

Infinitives are indeclinable forms derived from the verb roots by adding the affix तुम्, e.g. गम् + तुम् --> गन्तुम् "to go". An infinitive expresses a subordinate action which is the goal, purpose or reason for the main action. Like the gerunds, the infinitive also has the same agent as the main verb. If the two actions have different agents, one cannot have an infinitive construction. Examples:

1) जलं पातुं रामो गृहं गच्छति ।
"Rāma goes home to drink water."
2) सीता रामं द्रष्टुं वनमगच्छत् ।
"Sītā went to the forest to see Rāma."
3) देशं रक्षितुं नृपो ऽरीनजयत् ।
"To protect the country, the king conquered the enemies."
4) अहं त्वां कथयितुमिच्छामि ।
"I want to tell you."

The following tables give gerunds and infinitives for the verbs done so far:

| verb root | present | *-tvā* gerund | *-ya* gerund | infinitive |
|---|---|---|---|---|
| अर्थ् | अर्थयते | अर्थयित्वा | प्रार्थ्य | अर्थयितुम् |
| इष् | इच्छति | इष्ट्वा, एषित्वा | अन्विष्य | एषितुम् |
| ईक्ष् | ईक्षते | ईक्षित्वा | समीक्ष्य | ईक्षितुम् |
| कथ् | कथयति | कथयित्वा | प्रकथ्य | कथयितुम् |
| कुप् | कुप्यति | कुपित्वा, कोपित्वा | संकुप्य | कोपितुम् |
| कृष् | कृषति, कर्षति | कृष्ट्वा | आकृष्य | कर्ष्टुम्, क्रष्टुम् |
| कृन्त् | कृन्तति | कर्तित्वा | उत्कृत्य | कर्तितुम् |
| क्लिश् | क्लिश्यते | क्लिशित्वा, क्लिष्ट्वा | संक्लिश्य | क्लेशितुम् |
| क्षल् | क्षालयति | क्षालयित्वा | प्रक्षाल्य | क्षालयितुम् |
| क्षिप् | क्षिपति | क्षिप्त्वा | संक्षिप्य | क्षेप्तुम् |
| खन् | खनति | खनित्वा, खात्वा | उत्खाय | खनितुम् |
| खाद् | खादति | खादित्वा | आखाद्य | खादितुम् |
| खिद् | खिद्यते | खित्त्वा | परिखिद्य | खेत्तुम् |
| गण् | गणयति | गणयित्वा | विगणय्य | गणयितुम् |
| गम् | गच्छति | गत्वा | आगम्य/त्य | गन्तुम् |
| गाह् | गाहते | गाहित्वा, गाढ्वा | अवगाह्य | गाहितुम्/ढुम् |
| ग्रस् | ग्रसते | ग्रसित्वा, ग्रस्त्वा | संग्रस्य | ग्रसितुम् |
| घुष् | घोषयति | घोषयित्वा | उद्घोष्य | घोषयितुम् |
| चल् | चलति | चलित्वा | संचल्य | चलितुम् |
| चिन्त् | चिन्तयति | चिन्तयित्वा | संचिन्त्य | चिन्तयितुम् |
| चुर् | चोरयति | चोरयित्वा | संचोर्य | चोरयितुम् |
| जन् | जायते | जनित्वा | संजाय/न्य | जनितुम् |
| जि | जयति | जित्वा | विजित्य | जेतुम् |
| जीव् | जीवति | जीवित्वा | संजीव्य | जीवितुम् |
| तड् | ताडयति | ताडयित्वा | प्रताड्य | ताडयितुम् |
| तुद् | तुदति | तुत्त्वा | प्रतुद्य | तोत्तुम् |
| तुष् | तुष्यति | तुष्ट्वा | परितुष्य | तोष्टुम् |
| त्यज् | त्यजति | त्यक्त्वा | संत्यज्य | त्यक्तुम् |
| दंश् | दशति | दष्ट्वा | उपदश्य | दंष्टुम् |
| दह् | दहति | दग्ध्वा | संदह्य | दग्धुम् |
| दा | यच्छति | दत्त्वा | प्रदाय | दातुम् |
| दिव् | दीव्यति | देवित्वा, द्यूत्वा | आदीव्य | देवितुम् |
| दिश् | दिशति | दिष्ट्वा | आदिश्य | देष्टुम् |

| | | | | |
|---|---|---|---|---|
| दृश् | पश्यति | दृष्ट्वा | संदृश्य | द्रष्टुम् |
| धाव् | धावति | धावित्वा, धौत्वा | प्रधाव्य | धावितुम् |
| धृ | धारयति | धारयित्वा | संधार्य | धारयितुम् |
| नम् | नमति | नत्वा | प्रणम्य | नन्तुम् |
| नश् | नश्यति | नशित्वा, नंष्ट्वा, नष्ट्वा | विनश्य | नशितुम्, नंष्टुम् |
| निन्द् | निन्दति | निन्दित्वा | विनिन्द्य | निन्दितुम् |
| नी | नयति | नीत्वा | आनीय | नेतुम् |
| नुद् | नुदते | नुत्त्वा | प्रणुद्य | नोत्तुम् |
| नृत् | नृत्यति | नर्तित्वा | प्रनृत्य | नर्तितुम् |
| पच् | पचति | पक्त्वा | विपच्य | पक्तुम् |
| पठ् | पठति | पठित्वा | प्रपठ्य | पठितुम् |
| पत् | पतति | पतित्वा | निपत्य | पतितुम् |
| पा | पिबति | पीत्वा | निपीय | पातुम् |
| पाल् | पालयति | पालयित्वा | संपाल्य | पालयितुम् |
| पुष् | पुष्यति | पुष्ट्वा | संपुष्य | पोष्टुम् |
| पूज् | पूजयति | पूजयित्वा | संपूज्य | पूजयितुम् |
| प्रच्छ् | पृच्छति | पृष्ट्वा | आपृच्छ्य | प्रष्टुम् |
| बुध् | बोधति | बुधित्वा, बोधित्वा | संबुध्य | बोधितुम् |
| भक्ष् | भक्षयति | भक्षयित्वा | संभक्ष्य | भक्षयितुम् |
| भाष् | भाषते | भाषित्वा | संभाष्य | भाषितुम् |
| भू | भवति | भूत्वा | संभूय | भवितुम् |
| भूष् | भूषयति | भूषयित्वा | विभूष्य | भूषयितुम् |
| भ्रम् | भ्राम्यति | भ्रमित्वा, भ्रान्त्वा | संभ्रम्य | भ्रमितुम् |
| मन् | मन्यते | मनित्वा, मत्वा | अवमत्य/न्य | मन्तुम् |
| मन्त्र् | मन्त्रयते | मन्त्रयित्वा | आमन्त्र्य | मन्त्रयितुम् |
| मुच् | मुञ्चति | मुक्त्वा | विमुच्य | मोक्तुम् |
| मुद् | मोदते | मोदित्वा, मुदित्वा | संमुद्य | मोदितुम् |
| मृ | म्रियते | मृत्वा | अनुमृत्य | मर्तुम् |
| यज् | यजति, ते | इष्ट्वा | समिज्य | यष्टुम् |
| रक्ष् | रक्षति | रक्षित्वा | संरक्ष्य | रक्षितुम् |
| रच् | रचयति | रचयित्वा | विरचय्य | रचयितुम् |
| रम् | रमते | रत्वा, रमित्वा | विरम्य/त्य | रन्तुम् |
| रुह् | रोहति | रूढ्वा | आरुह्य | रोढुम् |
| लभ् | लभते | लब्ध्वा | आलभ्य | लब्धुम् |
| लिख् | लिखति | लिखित्वा, लेखित्वा | आलिख्य | लेखितुम् |

| | | | | |
|---|---|---|---|---|
| वद् | वदति | उदित्वा | अनूद्य | वदितुम् |
| वस् | वसति | उषित्वा | प्रोष्य | वस्तुम् |
| वह् | वहति | ऊढ्वा | प्रोह्य | वोढुम् |
| विद् | विद्यते | वित्त्वा | संविद्य | वेत्तुम् |
| विद् | विन्दति | विदित्वा, वेदित्वा | संविद्य | वेदितुम्, वेत्तुम् |
| विश् | विशति | विष्ट्वा | प्रविश्य | वेष्टुम् |
| वृत् | वर्तते | वर्तित्वा, वृत्त्वा | अनुवृत्य | वर्तितुम् |
| वृध् | वर्धते | वर्धित्वा, वृद्ध्वा | संवृध्य | वर्धितुम् |
| वेप् | वेपते | वेपित्वा | प्रवेप्य | वेपितुम् |
| शंस् | शंसति | शंसित्वा, शस्त्वा | प्रशस्य | शंसितुम् |
| शम् | शाम्यति | शान्त्वा, शमित्वा | निशम्य | शमितुम् |
| श्रम् | श्राम्यति | श्रान्त्वा, श्रमित्वा | विश्रम्य | श्रमितुम् |
| श्लाघ् | श्लाघते | श्लाघित्वा | संश्लाघ्य | श्लाघितुम् |
| सद् | सीदति | सत्त्वा | निषद्य | सत्तुम् |
| स्था | तिष्ठति | स्थित्वा | प्रस्थाय | स्थातुम् |
| स्पृश् | स्पृशति | स्पृष्ट्वा | संस्पृश्य | स्प्रष्टुम्, स्पर्ष्टुम् |
| स्पृह् | स्पृहयति | स्पृहयित्वा | संस्पृह्य | स्पृहयितुम् |
| स्मृ | स्मरति | स्मृत्वा | संस्मृत्य | स्मर्तुम् |
| हस् | हसति | हसित्वा | विहस्य | हसितुम् |
| हृ | हरति | हृत्वा | प्रहृत्य | हर्तुम् |

A list of verbal pre-fixes (*upasarga*):

प्र, परा, अप, सम्, अनु, अव, निस्, निर्, दुस्, दुर्, वि, आ, नि, अधि, अपि, अति, सु, उद्, अभि, प्रति, परि, उप

The function of these prefixes will be discussed in Lesson 15.

**Exercises**

**1) Translate the following sentences into English and change them to gerund- and/or infinitive constructions if possible:**

१. यदाश्वास्तृणं खादन्ति, तदा ते पुष्यन्ति ।
२. यदा दासः कनकञ्चोरयति, तदा नृपो दासन्तुदति ।
३. यदाहं कमलान्यदिशम्, तदा त्वं काकमपश्यः ।
४. यदा जना मां पश्येयुस्तदा ते सर्वतो धावेयुः ।

५. यदा बालाः पर्वतं प्रत्यधावन्, तदा तेऽश्राम्यन् ।
६. यदाहं कनकमदीव्यम्, तदा त्वमतुष्यः ।
७. यदा जना नृपं पश्यन्ति, तदा ते तं पूजयन्ति ।
८. यदा जना ईश्वरस्य बलं चिन्तयन्ति, तदा ते ईश्वरं नमन्ति ।
९. यदा नृपः काव्यं लिखति, तदा स सुखं विन्दति ।
१०. यदा दासो वनं गच्छेत्, तदा स वृक्षान् कृन्तेत् ।
११. यदा जनकोऽश्वावमुञ्चत्, तदा तौ वनं प्रति अधावताम् ।
१२. यदा रामस्तस्या गृहं गच्छेत्, तदा स तुष्येत्, सा न तुष्येत् ।
१३. यदा बालश्शास्त्राण्यपठत्, तदा स फलान्यलभत ।
१४. यदा नृपोऽयजत्, तदा तस्य भार्या पुत्रमविन्दत् ।
१५. यदा बालो वृक्षं रोहेत्, तदा स चन्द्रं पश्येत् ।
१६. त्वं तानि फलानि क्षालय, ततश्च तानि भक्षय ।
१७. यदा श्वश्रूस्त्वां पश्येत्, तदा सा कुप्येत् ।
१८. कश्चित् मुनिर्नृपस्य प्रासादं प्रति अगच्छत्, नृपाय चावदत् ।
१९. यदा नृपस्तं मुनिं प्रासादमनयत्, तदा स मुनिर्धनायास्पृहयत् ।
२०. यदा ईश्वरोऽतुष्यत्, तदा स नृपाय जीवनमयच्छत् ।
२१. यदा मुनिः प्रासादमत्यजत्, तदा सोऽतुष्यत् ।
२२. यदा मम भार्या कुसुमानि स्पृशेत्, तदा सा सुखं विन्देत् ।
२३. यदा त्वं धनमचिन्तयस्तदा त्वमेव तवारिरभवः ।
२४. नारी गुरुमनमत्, ततश्च सासीदत् ।
२५. काकास्तरौ सीदेयुः फलानि च खादेयुः ।
२६. यदा गजा जले गाहन्ते, तदा ते मोदन्ते ।
२७. यदा जननी बालमीक्षेत, तदा सा कुप्येत् ।
२८. यदा बालो वृक्षात् पतति, तदा स वेपते ।
२९. अहं मम भार्याया वचनेन खिद्ये, वनं च गच्छामि ।
३०. यदा जननी बालस्य दुःखेनाक्लिश्यत, तदा सा अवेपत ।
३१. यदा स बालोऽम्रियत, तदा स स्वर्गमगच्छत्
३२. सा नारी वनेऽभ्राम्यत्, नृपमपश्यत्, अरमत च ।
३३. यदा पुत्रो जायते तदा जना मोदन्ते ।
३४. अहं नद्याम् पतेयं जीवनं च त्यजेयम् ।
३५. जना जीवनं सुखं मन्यन्ते, न च तत् कदापि त्यजन्ति ।
३६. यदा मुनिर्नार्याश्शरीरञ्जल ऐक्षत, तदा स तां जलात् तीरेऽनयत् ।
३७. यदा मे दुःखमशाम्यत्, तदाहं वनात् गृहमगच्छम्, भार्याञ्चापश्यम् ।
३८. मुनिर्नद्यामगाहत, कमलानि चालभत ।
३९. अहं वने वसामि, सुखं च लभे ।

४०. अहमीश्वरमश्लाघे, ततश्चाहं सुखमलभे ।

2) **Translate the following into Sanskrit using infinitive forms, if possible. Try to alter them to gerund-constructions.**

1) The horses run to the river to drink water.
2) She wants money to obtain happiness.
3) The crow sits on the tree to eat fruit.
4) The servants want to run after the king.
5) A servant steals gold to show it to his wife.
6) I go to the village to see my mother.
7) The king went to the mountain to see the sage and speak to him.
8) The boy worships his father to obtain money from him.
9) The people sat around the tree to watch the horses.
10) The woman held leaves in her hands to count them.
11) Elephants do not want to eat flesh.
12) The hero climbs the palace to see the enemies.
13) The king gives money to his friend to write poetry.
14) He steals jewels from the palace to live with happiness.
15) We request the hero to strike the king.
16) The boy washed the fruit to eat them.
17) The fool (मूर्खः) climbed the mountain to touch the sun and to eat the moon.
18) The man went to the river-bank to sit with the girl.
19) The servant went to the sage to ask him.
20) You go to the king to tell him.
21) The king took the sage into the palace to worship him.
22) He requested the man to enter the palace.
23) The sage sat on the ground to worship god.
24) The crows sat on the tree to eat fruit.
25) The jackals talk to the elephant to praise him.
26) O wife, I want you to abandon me.
27) I do not want to become a poet.
28) I read books to obtain happiness.
29) The jackal goes to the forest to find meat.
30) I want to think only of god.

**3) Write any five sentences of your own in Sanskrit.**

# LESSON 13

## Masculine and feminine nouns in ऋ

### Masculine nouns in ऋ

There are two kinds of masculine nouns in ऋ : (A) agent-nouns (verb + तृ ), and (B) nouns expressing family relations. There are slight differences in the declension of these two types. Italicized forms in the following paradigms should be compared and contrasted to understand the differences.

नेतृ **"leader"** (नी + तृ )

| | S | D | P |
|---|---|---|---|
| **Nom** | नेता | *नेतारौ* | *नेतारः* |
| **Acc** | *नेतारम्* | *नेतारौ* | नेतॄन् |
| **Inst** | नेत्रा | नेतृभ्याम् | नेतृभिः |
| **Dat** | नेत्रे | नेतृभ्याम् | नेतृभ्यः |
| **Abl** | नेतुः | नेतृभ्याम् | नेतृभ्यः |
| **Gen** | नेतुः | नेत्रोः | नेतॄणाम् |
| **Loc** | नेतरि | नेत्रोः | नेतृषु |
| **Voc** | नेतर् | *नेतारौ* | *नेतारः* |

पितृ **"father"**

| | S | D | P |
|---|---|---|---|
| **Nom** | पिता | *पितरौ* | *पितरः* |
| **Acc** | *पितरम्* | *पितरौ* | पितॄन् |
| **Inst** | पित्रा | पितृभ्याम् | पितृभिः |
| **Dat** | पित्रे | पितृभ्याम् | पितृभ्यः |
| **Abl** | पितुः | पितृभ्याम् | पितृभ्यः |
| **Gen** | पितुः | पित्रोः | पितॄणाम् |
| **Loc** | पितरि | पित्रोः | पितृषु |
| **Voc** | पितर् | *पितरौ* | *पितरः* |

| रक्ष् | रक्षित | रक्षितवत् | |
| रच् | रचित | रचितवत् | |
| रम् | रत | रतवत् | रत |
| रुच् | रुचित | रुचितवत् | |
| रुह् | रूढ | रूढवत् | रूढ |
| लभ् | लब्ध | लब्धवत् | |
| लिख् | लिखित | लिखितवत् | |
| वद् | उदित | उदितवत् | |
| वस् | उषित | उषितवत् | उषित |
| वह् | ऊढ | ऊढवत् | |
| विद् (2P) | विदित | विदितवत् | विदितः |
| विद् (4A) | विन्न | विन्नवत् | |
| विद् (6P) | वित्त, विन्न | वित्तवत्, विन्नवत् | |
| विश् | विष्ट | विष्टवत् | |
| वृत् | वृत्त | वृत्तवत् | वृत्त |
| वृध् | वृद्ध | वृद्धवत् | वृद्ध |
| वेप् | वेपित | वेपितवत् | |
| शंस् | शस्त | शस्तवत् | |

| | | | |
|---|---|---|---|
| शम् | शान्त | शान्तवत् | शान्त |
| श्रम् | श्रान्त | श्रान्तवत् | श्रान्त |
| श्लाघ् | श्लाघित | श्लाघितवत् | |
| सद् | सन्न | सन्नवत् | |
| सृ | सृत | सृतवत् | |
| स्था | स्थित | स्थितवत् | स्थित |
| स्पृश् | स्पृष्ट | स्पृष्टवत् | |
| स्पृह् | स्पृहित | स्पृहितवत् | |
| स्मृ | स्मृत | स्मृतवत् | |
| हस् | हसित | हसितवत् | हसित |
| हृ | हृत | हृतवत् | |

**Exercises**

1) **Translate the following into English:**

१. मार्गेण गतवन्तं नरमहं पश्यामि ।
२. ग्रामं गताय नराय त्वं धनं यच्छ ।
३. भूमौ पतितां भार्यां नरो दृष्टवान् ।
४. भूमौ पतिता नार्य ईश्वरं निन्दन्ति ।
५. भूमौ पतितेन मया सह सापि पतिता ।
६. ह्रदात् आनीतानि कमलान्यधुना पश्यतु नृपः ।
७. ग्रामं गमिष्यन्त्यै नार्यै धनं को दत्तवान्?
८. जले पतितौ बालौ दुःखमनुभूतवन्तौ ।
९. कमलं नीतं त्वयेति स भाषितवान् ।
१०. कनकं चोरितवतो दासस्य पुत्रं नृपस्य भार्या दृष्टवती ।
११. पर्वतमभितो नष्टान् वृक्षान् दासाः कृन्तन्तु ।
१२. मुनय ईश्वरस्य बलं चिन्तितवन्तः ।
१३. कुकाव्यं (bad poem) लिखितवते सुहृदे नृपः किं भाषताम्?
१४. भक्त्या नता नारीर्दृष्ट्वा गुरुस्तुष्टः ।
१५. तां चिन्तितवन्तं मां सा न चिन्तितवती ।

2) **Rewrite the story in Lesson 9, Exercise 1, after converting its sentences into past participle constructions wherever possible.**

3) **Convert all the past tense forms in the story of the mustard seed in Lesson 11 to past participles and list the original forms along with the participial forms appropriate in the context.**

4) **Translate into Sanskrit using past participles:**

1. Rāma went to Laṅkā (f.) to defeat Rāvaṇa.
2. The king saw the servant and laughed.
3. The servant, fallen on the ground, said to the king.
4. The crows, seated on the tree, ate fruits.
5. Rāma's sister spoke to her mother-in-law.
6. The poem written by you was seen by me.
7. The swan who stood on the bank of the lake flew up (उद्+√पत्).
8. God protected the people who worshipped him.
9. The jackals ate the flesh of the dead elephants.
10. The minds of good-hearted people rejoiced seeing the moon risen (उद्+√गम्) in the sky.
11. The mother, who reached heaven, saw her son seated at the court of Indra.
12. The priest, struck by the mendicant, was seen by the doctor.
13. The king gave wealth to the poet who wrote a poem to praise him.
14. The mendicants, saluted by the king, showed him the path of moral conduct (नीति f.).
15. The poems of the dead poet were burned with his body.

5) **Write any five Sanskrit sentences of your own.**

**Demonstrative pronouns इदम् "this" and अदस् "that"**

Of these two pronouns, इदम् is the more common pronoun. Certain forms of अदस्, though not all, are also frequent. According to the Sanskrit tradition, इदम् refers to things nearby, एतद् refers to things very near, अदस् refers to distant things and तद् refers to things which are remote. These meanings are relative.

| | इदम् | | | अदस् | | |
|---|---|---|---|---|---|---|
| | **Masculine** | | | **Masculine** | | |
| | **S** | **D** | **P** | **S** | **D** | **P** |
| **N** | अयम् | इमौ | इमे | असौ | अमू | अमी |
| **Ac** | इमम्/ एनम् | इमौ/ एनौ | इमान्/ एनान् | अमुम् | अमू | अमून् |
| **I** | अनेन/ एनेन | आभ्याम् | एभिः | अमुना | अमूभ्याम् | अमीभिः |
| **D** | अस्मै | आभ्याम् | एभ्यः | अमुष्मै | अमूभ्याम् | अमीभ्यः |
| **Ab** | अस्मात् | आभ्याम् | एभ्यः | अमुष्मात् | अमूभ्याम् | अमीभ्यः |
| **G** | अस्य | अनयोः/ एनयोः | एषाम् | अमुष्य | अमुयोः | अमीषाम् |
| **L** | अस्मिन् | अनयोः/ एनयोः | एषु | अमुष्मिन् | अमुयोः | अमीषु |

| | **Feminine** | | | **Feminine** | | |
|---|---|---|---|---|---|---|
| **N** | इयम् | इमे | इमाः | असौ | अमू | अमूः |
| **Ac** | इमाम्/ एनाम् | इमे/ एने | इमाः/ एनाः | अमूम् | अमू | अमूः |
| **I** | अनया/ एनया | आभ्याम् | आभिः | अमुया | अमूभ्याम् | अमूभिः |
| **D** | अस्यै | आभ्याम् | आभ्यः | अमुष्यै | अमूभ्याम् | अमूभ्यः |
| **Ab** | अस्याः | आभ्याम् | आभ्यः | अमुष्याः | अमूभ्याम् | अमूभ्यः |
| **G** | अस्याः | अनयोः/ एनयोः | आसाम् | अमुष्याः | अमुयोः | अमूषाम् |
| **L** | अस्याम् | अनयोः/ एनयोः | आसु | अमुष्याम् | अमुयोः | अमूषु |

| | Neuter | | | Neuter | | |
|---|---|---|---|---|---|---|
| N | इदम् | इमे | इमानि | अदः | अमू | अमूनि |
| Ac | इदम्/ एनत् | इमे/ एने | इमानि/ एनानि | अदः | अमू | अमूनि |
| | The rest like the Masc. | | | The rest like the Masc. | | |

Dual forms of nouns and verbs which end in ई, ऊ and ए, as explained before, do not undergo any sandhi operations. The same holds true of the plural form अमी. For instance, अमी आगच्छन्ति cannot be transformed into *अम्यागच्छन्ति. As for the use of the pronouns इदम् and अदस्, they are very similar to तद्, एतद् etc. The optional forms of इदम् such as एनम् and एनौ are used in secondary or subsequent references to entities.

A1) अयं नरो गमिष्यति । A2) अयं गमिष्यति ।
"This man / this one will go."

B1) इमे भ्रमराः (bees) मधु पिबन्ति । B2) इमे मधु पिबन्ति ।
"These bees / these ones drink honey."

C1) अमुष्याः नार्याः धनं पश्यामि । C2) अमुष्याः धनं पश्यामि ।
"I see the wealth of that woman / that one."

D1) अमूनि कमलानि तस्यै रोचन्ते । D2) अमूनि तस्यै रोचन्ते ।
"Those lotuses / those ones appeal to her."

E1) अमुना नृपेण अयं दासः ताड्यते । E2) अमुना अयं ताड्यते ।
"This servant / this one is beaten by that king / that one."

**Nouns with two stems**

Certain nouns (and adjectives) ending in consonants show two stems in their paradigms, the strong stem before some terminations and the weak stem before other terminations. In a masculine paradigm, the strong stem appears in Nom. (S, D, P), Acc. (S, D) and Voc. (S, D, P); in a neuter paradigm, the strong stem appears in Nom. (P), Acc. (P) and Voc. (P). As usual, these three forms are identical in a neuter paradigm. Here we will consider the following noun-types with two stems:

**A.** Past active participles ending with the affix -तवत्. These have been discussed in the preceeding lesson.

**B.** Present and future active participles such as गच्छत्/न्त्, गमिष्यत्/ न्त्. These are discussed in Lesson 19. We may note a few differences here. The masc. nom. singular is गच्छन्, rather than गच्छान्. The neuter nom. and acc.dual forms for the conjugations 1, 4, 10, causatives, desideratives and denominative verbs are strong forms. e.g. गच्छन्ती. For the 6th conjugation, for the 2nd conjugation verbs ending in आ, and all future active participles, the neuter nom. and acc. dual forms are optionally strong, e.g., तुदती/न्ती, गमिष्यती/ न्ती. Present active participles from other verbs have weak forms in their neuter nom. and acc. dual, e.g. ब्रुवती. Neuter plurals for verbs in the 3rd conjugation and a few other participles such as जक्षत् are optionally strong, e.g., ददति/ न्ति. With all these exceptions, it is good to keep in mind that these neuter forms are extremely rare in the actual usage.

**C.** Nouns ending in the possessive affixes -मत् and -वत्, e.g. भगवत्, मतिमत्, बलवत्, धीमत्. The paradigms of these nouns are exactly identical with those of the -तवत् participles. The feminine stem is formed by adding -ई, e.g., भगवत् > भगवती.

| | भगवत् (m) | | | मतिमत् (m) | | |
|---|---|---|---|---|---|---|
| | **S** | **D** | **P** | **S** | **D** | **P** |
| **N** | *भगवान्* | *भगवन्तौ* | *भगवन्तः* | *मतिमान्* | *मतिमन्तौ* | *मतिमन्तः* |
| **Ac** | *भगवन्तम्* | *भगवन्तौ* | भगवतः | *मतिमन्तम्* | *मतिमन्तौ* | मतिमतः |
| **I** | भगवता | भगवद्भ्याम् | भगवद्भिः | मतिमता | मतिमद्भ्याम् | मतिमद्भिः |
| **D** | भगवते | भगवद्भ्याम् | भगवद्भ्यः | मतिमते | मतिमद्भ्याम् | मतिमद्भ्यः |
| **Ab** | भगवतः | भगवद्भ्याम् | भगवद्भ्यः | मतिमतः | मतिमद्भ्याम् | मतिमद्भ्यः |
| **G** | भगवतः | भगवतोः | भगवताम् | मतिमतः | मतिमतोः | मतिमताम् |
| **L** | भगवति | भगवतोः | भगवत्सु | मतिमति | मतिमतोः | मतिमत्सु |
| **V** | *भगवन्* | *भगवन्तौ* | *भगवन्तः* | *मतिमन्* | *मतिमन्तौ* | *मतिमन्तः* |

D. Adjectives of quantity ending in the affixes -यत् and -वत्, e.g., कियत्, इयत्, यावत्, एतावत्, तावत्. These paradigms are similar to those of nouns in **A** and **B**. The feminine is formed by adding -ई, e.g., इयती.

इयत् "this much" or "this many"

| | Masculine | | | Neuter | | |
|---|---|---|---|---|---|---|
| | **S** | **D** | **P** | **S** | **D** | **P** |
| **N** | इयान् | इयन्तौ | इयन्तः | इयत् | इयती | इयन्ति |
| **Ac** | इयन्तम् | इयन्तौ | इयतः | इयत् | इयती | इयन्ति |
| **I** | इयता | इयद्भ्याम् | इयद्भिः | Like the masculine | | |
| **D** | इयते | इयद्भ्याम् | इयद्भ्यः | Like the masculine | | |
| **Ab** | इयतः | इयद्भ्याम् | इयद्भ्यः | Like the masculine | | |
| **G** | इयतः | इयतोः | इयताम् | Like the masculine | | |
| **L** | इयति | इयतोः | इयत्सु | Like the masculine | | |
| **V** | इयन् | इयन्तौ | इयन्तः | इयत् | इयती | इयन्ति |

## Vocabulary

| | |
|---|---|
| अदस् (mfn) | that |
| इदम् (mfn) | this |
| भ्रमर (m) | bee |
| भगवत् | Lord, respected |
| मतिमत् | intelligent |
| धीमत् | intelligent |
| बलवत् | strong, powerful |
| धनवत् | rich |
| विद्यावत् | learned |
| अप+हृ (हरति, 1P) | to steal |
| समुद्र (m) | ocean |
| प्रति+भाष् (भाषते, 1A) | to reply |
| आयुष्मत् | long-lived |
| श्रीमत् | rich |
| हिमवत् | Himalaya |
| कियत् | how much, how many? |
| इयत् | this much, this many |
| यावत् | as much, as many |
| तावत् | that much, that many |
| एतावत् | this much, this many |
| कीर्तिमत् | famous |
| उभ Pron. | both (always dual) |
| अपर | another |

## Exercises

1) **Write the full paradigms of धनवत् (m), कियत् (f) and एतावत् (n).**

2) **Translate the following into English:**

१. भगवता बुद्धेन (= Buddha) भाषितं वचनं न बोधामि ।
२. यावता धनेन मुनिस्तुष्यति तावता त्वं न तोक्ष्यसि ।
३. पिता पुत्रमुपगम्यावदत् - आयुष्मान् भव - इति ।
४. बलवतो नरान् धावतो दृष्ट्वा अमुष्याः मनसि भयं जायते ।
५. सर्वे गुणवन्तो नराः धनवन्तः न भवन्ति, नापि सर्वे धनवन्तो गुणवन्तः ।
६. अस्मै धीमते ब्राह्मणाय श्रीमता त्वया कियद् धनं दीयते?
७. यावन्तो जना अत्र तिष्ठन्ति तावन्त एवाश्वाः ।
८. श्रीमतो वणिजो धीमता पुत्रेणाहं मार्गेण गच्छन्दृष्टः ।
९. हिमवति पर्वते देवा वसन्तीति मन्यमाना मुनयो हिमवन्तं प्रति गच्छन्तो दृश्यन्ते ।
१०. ये मतिमन्तो न भवन्ति ते धनवन्तो मा भवन्तु इत्येवाहं भगवन्तं प्रार्थये ।
११. धनवन्तो जना विद्यावतो जनान् परिहसन्ति । विद्यावन्तश्च धनवतो दृष्ट्वा हसन्ति । धनमेव बलवदिति धनवान्मन्यते । विद्यैव बलवती इति विद्यावान् मन्यते ।
१२. कश्चिन्नरो धनवानभवदपरश्च विद्यावान् । उभौ तौ हिमवन्तं प्रति गतवन्तौ । तत्र हिमवति स्थितं हिमं दृष्ट्वा विद्यावान्धनवन्तमभाषत । हे धनवन्, यावद् हिमं हिमवति तावती मे विद्या । कियत् तव धनमिति । तदा धनवानवदत् - यावद् हिमं हिमवति तावती तव विद्या । किन्तु यावान्हिमवान्पर्वतस्तावन्मे धनम् इति ।
१३. कंचन वृद्धं नरं प्रणमन्तं दृष्ट्वा भगवान्विष्णुरवदत् - आयुष्मान्भव इति । स वृद्धः प्रत्यभाषत - हे भगवन्, कुतस्त्वं मे आयुर्यच्छसि? नाहं बलवान्, नापि विद्यावान् न वा धनवान् । यस्य न बलं, न विद्या, न वा धनं, स यद्यायुष्मान्भवेत्तर्हि तद् दुःखाय भवेत् सुखाय वा? इति ।
१४. कश्चिद्धनवान्प्रसन्नायेश्वरायावदत् - हे ईश्वर, यावत्तव धनं तत्सर्वं मह्यं प्रयच्छेति । तदा ईश्वरोऽस्य धनवतः सर्वं धनमपाहरत् । धीमान्मुनिस्तु ईश्वराय वदति - हे भगवन्, यावज्जलं समुद्रे, यावद्धिमं हिमवति, तावती मे त्वयि भक्तिर्भवतु इति ।

3) **Translate from English into Sanskrit:**

1. How much gold does that rich man have?
2. Nowhere else is there so much wind as there is on the Himalaya mountain.
3. This strong man did not think that his intelligent enemy was able to defeat him.

4. That rich woman does not have as many horses as I have.
5. I pray to the Lord, "Let me be long-lived and rich."
6. The Buddha instructed the people, saying: "You must abandon as many desires as you have."
7. Going along the road towards my village, I saw that famous man who lived in the king's palace.
8. A rich man desires gold as much as a bee desires honey. How much knowledge do you desire? How much strength do you desire?
9. In that house which belongs to the learned men are many books.
10. The intelligent men, praising the qualities of the Lord, say: "Knowledge found only in books leads to adversity and misery. However, knowledge found through meditation on the Lord leads to great happiness."

**4) Write any five Sanskrit sentences of your own.**

# LESSON 24

**More nouns in two stems**

**A. Honorific Pronoun भवत् "your honor"**

This pronoun behaves exactly like the present participle भवत्/न्त् with a few minor differences. The masc. nom. sing. of the pronoun is भवान्, while that of the present participle is भवन्. Also, the feminine participle form is भवन्ती, while the feminine pronoun is भवती. This pronoun is syntactically different from the pronoun युष्मद्. भवत् requires a 3rd person verb, e.g., त्वं गच्छसि, but भवान् गच्छति "Your honor goes". Often, to show an even higher degree of respect, the plural form can be used to refer to a single person, e.g., भवन्तः गच्छन्ति. Contextually, this could either refer to many goers, or show a high level of respect for a single goer. In the actual usage of भवत्, one finds that authors switch back and forth between त्वम् and भवान् referring to the same person, and these switches indicate subtle shifts in the display of respect. In late Sanskrit, the general tendency is to stick to one usage. The words अत्रभवत् and तत्रभवत् are used in the sense of "his honor over here" and "his honor over there", e.g., अत्रभवान् माधवः जलं पिबति "His honor M. over here drinks water". Similarly, one finds the feminine forms अत्रभवती and तत्रभवती, e.g., तत्रभवती सीता वनं गन्तुमिच्छति "Her honor S. over there wishes to go to the forest".

**B. महत् "great": strong stem महान्त्, fem. महती**

| | Masculine | | | Neuter | | |
|---|---|---|---|---|---|---|
| | S | D | P | S | D | P |
| N | *महान्* | *महान्तौ* | *महान्तः* | महत् | महती | *महान्ति* |
| Ac | *महान्तम्* | *महान्तौ* | महतः | महत् | महती | *महान्ति* |
| I | महता | महद्भ्याम् | महद्भिः | Like the Masculine | | |
| D | महते | महद्भ्याम् | महद्भ्यः | Like the Masculine | | |
| Ab | महतः | महद्भ्याम् | महद्भ्यः | Like the Masculine | | |
| G | महतः | महतोः | महताम् | Like the Masculine | | |
| L | महति | महतोः | महत्सु | Like the Masculine | | |
| V | *महन्* | *महान्तौ* | *महान्तः* | महत् | महती | *महान्ति* |

## C. Words ending the affix -इन्

The affix -इन् is used in Sanskrit both as a possessive affix after nouns and as an agentive affix providing agent-nouns, e.g., बल+इन् > बलिन् "strong", गम्+इन् > गामिन् "goer", fem. forms बलिनी, गामिनी.

| | Masculine S | Masculine D | Masculine P | Neuter S | Neuter D | Neuter P |
|---|---|---|---|---|---|---|
| N | *बली* | बलिनौ | बलिनः | *बलि* | बलिनी | बलीनि |
| Ac | बलिनम् | बलिनौ | बलिनः | *बलि* | बलिनी | बलीनि |
| I | बलिना | *बलिभ्याम्* | *बलिभिः* | Like the Masculine | | |
| D | बलिने | *बलिभ्याम्* | *बलिभ्यः* | Like the Masculine | | |
| Ab | बलिनः | *बलिभ्याम्* | *बलिभ्यः* | Like the Masculine | | |
| G | बलिनः | बलिनोः | बलिनाम् | Like the Masculine | | |
| L | बलिनि | बलिनोः | *बलिषु* | Like the Masculine | | |
| V | बलिन् | बलिनौ | बलिनः | *बलि/॰न्* | बलिनी | बलीनि |

Note the forms in which the न् of the stem is lost before the final affix in the paradigm above (in italics). In these forms, the juncture of the stem and the affix behaves as if it is an external sandhi. This feature is found in several other nominal paradigms. See the paradigm of लघीयस्- below.

**Nouns with three stems:**

In the above paradigms, we have seen that certain nominals ending in consonants such as भगवत् and महत् show two stems in their paradigms, i.e. one before strong terminations and the other before weak terminations. Here we will look at nominals which show three stems in their paradigms. These may generally be classified into three groups:

a. the reduplicated active voice past perfect participle ending in वस् -,
b. nouns ending in अन् -, and
c. adjectives of direction ending in अच्.

With these nominals, the case endings and the strong stems remain the same, while a new category of middle stem is carved out of the weak stem area. In the paradigms given below, the strong stems are shown in italics, and the middle stems are shown in small size letters.

## 1. Reduplicated perfect active participle in वस् :

In these paradigms, the strong stem ends in वांस्, the middle in वत्, and the weak in उष्. Here are the paradigms for विद्वस् from the root विद् "to know" and चकृवस् from the root कृ "to do". The feminine is formed by adding a feminine affix -ई, e.g. विदुषी, चक्रुषी. This is declined like a standard feminine nominal ending in -ई. The masculine and the neuter paradigms are given below. The word विद्वस् is traditionally recognized as a present participle, while चकृवस्, उपेयिवस्, तस्थिवस्, and जग्मिवस् are considered to be perfect participles.

विद्वस् "learned person"

| | M | | | Nt | | |
|---|---|---|---|---|---|---|
| | S | D | P | S | D | P |
| N | *विद्वान्* | *विद्वांसौ* | *विद्वांसः* | विद्वत् | विदुषी | *विद्वांसि* |
| Acc | *विद्वांसम्* | *विद्वांसौ* | विदुषः | विद्वत् | विदुषी | *विद्वांसि* |
| I | विदुषा | विद्वद्भ्याम् | विद्वद्भिः | -------like Masc. ------- | | |
| D | विदुषे | विद्वद्भ्याम् | विद्वद्भ्यः | -------like Masc. ------- | | |
| Abl | विदुषः | विद्वद्भ्याम् | विद्वद्भ्यः | -------like Masc. ------- | | |
| G | विदुषः | विदुषोः | विदुषाम् | -------like Masc. ------- | | |
| L | विदुषि | विदुषोः | विद्वत्सु | -------like Masc. ------- | | |
| V | *विद्वन्* | *विद्वांसौ* | *विद्वांसः* | विद्वत् | विदुषी | *विद्वांसि* |

चकृवस् "one who did"

| | M | | | Nt | | |
|---|---|---|---|---|---|---|
| | S | D | P | S | D | P |
| N | चकृवान् | चकृवांसौ | चकृवांसः | चकृवत् | चक्रुषी | चकृवांसि |
| Acc | चकृवांसम् | चकृवांसौ | चक्रुषः | चकृवत् | चक्रुषी | चकृवांसि |
| I | चक्रुषा | चकृवद्भ्याम् | चकृवद्भिः | चक्रुषा | चकृवद्भ्याम् | चकृवद्भिः |
| D | चक्रुषे | चकृवद्भ्याम् | चकृवद्भ्यः | चक्रुषे | चकृवद्भ्याम् | चकृवद्भ्यः |
| Abl | चक्रुषः | चकृवद्भ्याम् | चकृवद्भ्यः | चक्रुषः | चकृवद्भ्याम् | चकृवद्भ्यः |
| G | चक्रुषः | चक्रुषोः | चक्रुषाम् | चक्रुषः | चक्रुषोः | चक्रुषाम् |
| L | चक्रुषि | चक्रुषोः | चकृवत्सु | चक्रुषि | चक्रुषोः | चकृवत्सु |
| V | चकृवन् | चकृवांसौ | चकृवांसः | चकृवत् | चक्रुषी | चकृवांसि |

**2. Nouns ending in अन् :**

With these nouns, the strong stem ends in आन् (the final न् is dropped in the masculine nominative singular). The middle stem ends in अ, and the weak stem ends in न् with the preceding अ dropped (sometimes optionally). Observe the following paradigms of राजन् (m) "king", and नामन् (n) "name".

राजन् - strong: = राजान्, middle: = राज, weak: = राज्ञ्
नामन् - strong: = नामान्, middle: = नाम, weak: = नाम्न्

| | राजन् (m) | | | नामन् (n) | | |
|---|---|---|---|---|---|---|
| | S | D | P | S | D | P |
| N | राजा | राजानौ | राजानः | नाम | नाम्नी/नामनी | नामानि |
| Acc | राजानम् | राजानौ | राज्ञः | नाम | नाम्नी/नामनी | नामानि |
| I | राज्ञा | राजभ्याम् | राजभिः | नाम्ना | नामभ्याम् | नामभिः |
| D | राज्ञे | राजभ्याम् | राजभ्यः | नाम्ने | नामभ्याम् | नामभ्यः |
| Abl | राज्ञः | राजभ्याम् | राजभ्यः | नाम्नः | नामभ्याम् | नामभ्यः |
| G | राज्ञः | राज्ञोः | राज्ञाम् | नाम्नः | नाम्नोः | नाम्नाम् |
| L | राज्ञि/०जनि | राज्ञोः | राजसु | नाम्नि/नामनि | नाम्नोः | नामसु |
| V | राजन् | राजानौ | राजानः | नाम/नामन् | नाम्नी/नामनी | नामानि |

सीमन् (f) "border", मूर्धन् (m) "head", and आत्मन् (m) "soul", decline like राजन्. वर्त्मन् (n) "path" and वर्मन् (n) "armor" decline like नामन्. Only सीमन् and मूर्धन् have the contraction in the weak forms, i.e. सीम्न् and मूर्ध्न्. आत्मन्, वर्त्मन्, and वर्मन् do not have contracted weak forms. Thus, their ins. sg. forms are आत्मना, वर्त्मना, and वर्मणा.

### 3. Adjectives of direction ending in अच् -

For these nominals, the strong stem ends in अञ्च्, the middle stem ends in अच्. The weak stem ends in ईच् when अच् in the stem is preceded by य्, e.g. प्रत्यच्, and it ends in ऊच् when अच् in the stem is preceded by व्, e.g. विष्वच्.

प्रत्यच् - strong: = प्रत्यञ्च्, middle: = प्रत्यच्, weak: = प्रतीच्
विष्वच् - strong: = विष्वञ्च्, middle: = विष्वच्, weak: = विषूच्

प्रत्यच् "backward, westward"

| | | M | | | Nt | |
|---|---|---|---|---|---|---|
| | S | D | P | S | D | P |
| N | प्रत्यङ् | प्रत्यञ्चौ | प्रत्यञ्चः | प्रत्यक् | प्रतीची | प्रत्यञ्चि |
| Acc | प्रत्यञ्चम् | प्रत्यञ्चौ | प्रतीचः | प्रत्यक् | प्रतीची | प्रत्यञ्चि |
| I | प्रतीचा | प्रत्यग्भ्याम् | प्रत्यग्भिः | प्रतीचा | प्रत्यग्भ्याम् | प्रत्यग्भिः |
| D | प्रतीचे | प्रत्यग्भ्याम् | प्रत्यग्भ्यः | प्रतीचे | प्रत्यग्भ्याम् | प्रत्यग्भ्यः |
| Abl | प्रतीचः | प्रत्यग्भ्याम् | प्रत्यग्भ्यः | प्रतीचः | प्रत्यग्भ्याम् | प्रत्यग्भ्यः |
| G | प्रतीचः | प्रतीचोः | प्रतीचाम् | प्रतीचः | प्रतीचोः | प्रतीचाम् |
| L | प्रतीचि | प्रतीचोः | प्रत्यक्षु | प्रतीचि | प्रतीचोः | प्रत्यक्षु |
| V | प्रत्यङ् | प्रत्यञ्चौ | प्रत्यञ्चः | प्रत्यक् | प्रतीची | प्रत्यञ्चि |

विष्वच् "pervading"

| | | M | | | Nt | |
|---|---|---|---|---|---|---|
| | S | D | P | S | D | P |
| N | विष्वङ् | विष्वञ्चौ | विष्वञ्चः | विष्वक् | विषूची | विष्वञ्चि |
| Acc | विष्वञ्चम् | विष्वञ्चौ | विषूचः | विष्वक् | विषूची | विष्वञ्चि |
| I | विषूचा | विष्वग्भ्याम् | विष्वग्भिः | विषूचा | विष्वग्भ्याम् | विष्वग्भिः |
| D | विषूचे | विष्वग्भ्याम् | विष्वग्भ्यः | विषूचे | विष्वग्भ्याम् | विष्वग्भ्यः |
| Abl | विषूचः | विष्वग्भ्याम् | विष्वग्भ्यः | विषूचः | विष्वग्भ्याम् | विष्वग्भ्यः |
| G | विषूचः | विषूचोः | विषूचाम् | विषूचः | विषूचोः | विषूचाम् |
| L | विषूचि | विषूचोः | विष्वक्षु | विषूचि | विषूचोः | विष्वक्षु |
| V | विष्वङ् | विष्वञ्चौ | विष्वञ्चः | विष्वक् | विषूची | विष्वञ्चि |

**Exceptions:**

The weak stem for the word तिर्यच् is तिरश्च्. The words पराच्, प्राच् and अवाच् have only two stems. The strong stems are पराञ्च्, प्राञ्च् and अवाञ्च्, and the weak stems are पराच्, प्राच् and अवाच्.

**Feminine forms for the above nominals:**

For all the three types of nouns (with three stems) given above, the feminine stems are formed by simply adding ई to their weak stem. Then the feminine stems are declined like the paradigm of नदी.

| Masculine Basic Stem | Weak Stem | Feminine |
|---|---|---|
| चकृवस् | चक्रुष् | चक्रुषी |
| विद्वस् | विदुष् | विदुषी |
| राजन् | राज्ञ् | राज्ञी |
| प्रत्यच् | प्रतीच् | प्रतीची |
| प्राच् | प्राच् | प्राची |

**Degrees of comparison**

The comparative degree of adjectives is obtained by adding either the affix -तर or -ईयस् to the stem. The forms in -तर are declined like -अ stems in masculine and neuter, and like -आ stems in feminine. Generally, the comparative forms are accompanied by a word in the ablative to indicate the meaning of "than". Occasionally, the ablative itself, without the use of an explicit affix of the comparative degree, is found in the usage.

अहं रामाद् गुरुः / गुरुतरः / गरीयान् । "I am greater than Rāma."
सा बालिका एतस्याः बालिकायाः धीमत्तरा । "That girl is more intelligent than this girl."
तत् कमलमस्मात् कमलात् लघुतरम् / लघीयः । "That lotus is smaller than this lotus."

Generally speaking, while the forms in -तर can be produced from most words, the forms in -ईयस् are common only for certain adjectives, and their derivation involves many different regular and irregular changes. Some of these are suppletive forms. From the adjective लघु- "small", we get the masculine and the neuter comparative stem लघीयस्-, and the feminine stem लघीयसी. The feminine declension is a straight forward feminine declension in -ई. The masculine and the neuter declensions are given below. The strong stem is लघीयांस्- and the weak stem is लघीयस्-.

| | Masculine | | | Neuter | | |
|---|---|---|---|---|---|---|
| | S | D | P | S | D | P |
| N | लघीयान् | लघीयांसौ | लघीयांसः | लघीयः | लघीयसी | लघीयांसि |
| Ac | लघीयांसम् | लघीयांसौ | लघीयसः | लघीयः | लघीयसी | लघीयांसि |
| I | लघीयसा | लघीयोभ्याम् | लघीयोभिः | Like the Masculine | | |
| D | लघीयसे | लघीयोभ्याम् | लघीयोभ्यः | Like the Masculine | | |
| Ab | लघीयसः | लघीयोभ्याम् | लघीयोभ्यः | Like the Masculine | | |
| G | लघीयसः | लघीयसोः | लघीयसाम् | Like the Masculine | | |
| L | लघीयसि | लघीयसोः | लघीयस्सु | Like the Masculine | | |
| V | लघीयन् | लघीयांसौ | लघीयांसः | लघीयः | लघीयसी | लघीयांसि |

The superlative degree is obtained by adding either the common affix -तम, or the somewhat restricted affix -इष्ठ, e.g., गुरु > गुरुतम and गरिष्ठ. Since both of these formations end in -अ, the masculine and the neuter formations are declined like nouns in -अ, and the feminine forms are derived by adding -आ. Generally speaking, the affixes -ईयस् and -इष्ठ require complex changes, as well as suppletion, and must be learned from the table below:

| | Positive | Comparative | Superlative |
|---|---|---|---|
| near | अन्तिक- | नेदीयस्- | नेदिष्ठ- |
| praiseworthy | प्रशस्य- | ज्यायस्- | ज्येष्ठ- |
| | | श्रेयस्- | श्रेष्ठ |
| old | वृद्ध- | ज्यायस्- | ज्येष्ठ- |
| | | वर्षीयस्- | वर्षिष्ठ- |
| firm, well | बाढ- | साधीयस्- | साधिष्ठ- |

| | | | |
|---|---|---|---|
| dear | प्रिय- | प्रेयस्- | प्रेष्ठ- |
| heavy, valued | गुरु- | गरीयस्- | गरिष्ठ- |
| wide, valued | उरु- | वरीयस्- | वरिष्ठ- |
| many, much | बहु- | भूयस्- | भूयिष्ठ- |
| young | युवन्- | यवीयस्- | यविष्ठ- |
| | | कनीयस्- | कनिष्ठ- |
| small | अल्प- | अल्पीयस्- | अल्पिष्ठ- |
| | | कनीयस्- | कनिष्ठ- |
| fast | क्षिप्र- | क्षेपीयस्- | क्षेपिष्ठ- |
| far | दूर- | दवीयस्- | दविष्ठ- |
| big, fat | स्थूल- | स्थवीयस्- | स्थविष्ठ- |
| soft | मृदु- | म्रदीयस्- | म्रदिष्ठ- |
| small | क्षुद्र- | क्षोदीयस्- | क्षोदिष्ठ- |
| thin | कृश- | क्रशीयस्- | क्रशिष्ठ- |
| small | लघु- | लघीयस्- | लघिष्ठ- |

**Vocabulary**

**Nominals with two stems**

| | | | |
|---|---|---|---|
| महत् | great | भवत् | your honor |
| अत्रभवत् | your honor (here) | तत्रभवत् | your honor (there) |
| बलिन् | strong | धनिन् | wealthy |
| मानिन् | proud | गुणिन् | virtuous |
| गामिन् | goer | | |

**Nominals with three stems**

| | | | | | |
|---|---|---|---|---|---|
| विद्वस् | a learned person | | जग्मिवस् | one who went | |
| चकृवस् | one who did | | तस्थिवस् | one who stood | |
| उपेयिवस् | one who approached | | राजन् | (m) | king |
| नामन् | (n) | name | सीमन् | (f) | border |
| मूर्धन् | (m) | head | आत्मन् | (m) | soul |
| वर्त्मन् | (n) | path | वर्मन् | (n) | armor |
| सम्यच् | right, proper | | उदच् | upward, northern | |
| अन्वच् | following | | विष्वच् | pervading | |
| तिर्यच् | transverse, horizontal | | पराच् | turned away | |
| प्राच् | eastern | | अवाच् | southern, downward | |
| प्रत्यच् | backward, westward | | न्यच् | downward | |

**Other vocabulary**

| | | | |
|---|---|---|---|
| निहित | hidden | उप+स्था (1PA) | to attend, serve |
| शर्मन् | title for Brahmins | मध्य n. | middle |
| सहाध्यायिन् | a co-pupil | अस्तं गम् (1P) | to set, e.g. sunset |
| पञ्चिका f. | game with 5 dice | द्यूत n. | game, gambling |
| विशेष m. | kind, distinction | कपर्द m. | small shell used as a dice in gambling |
| स्यन्द् (1A) | to stream, flow | | |
| उत्तान | facing upwards | प्रयाग m. | name of place |
| पातयितृ | one who causes to fall, thrower of dice | अव+धा (3P) | to apply, direct |
| विनशन m. | name of region | परि+उप+आस् (2A) | to devote to |
| प्र+कीर्त् (10P) | to call, name | अधस्तात् | below, beneath |
| न्यक्+भू (1P) | to bend down | महिमन् m. | greatness |
| ऊर्ध्वम् | upwards, above | प्रज्ञात | well-known |
| व्यापक | pervading | अन्यत् (prn) | other, another |
| राजन्य m. | a man of warrior class | अति (adv) | very |
| | | दर्शन n. | vision, sight |
| शिक्ष् (1P, A) | to study, learn | विद्या f. | knowledge |

(Also look at the table of comparative and superlative forms.)

**Exercises**

**1. Translate into English:**

१. इदं कमलं सर्वेषु कमलेषु सुन्दरतमं भवति । अस्मात् सुन्दरतरं कमलं जगति न मया दृष्टम् ।

२. महान्तोऽपि नृपाः महत्तरैर्नृपैर्जीयन्ते ।

३. शास्त्रं शस्त्राद् बलीयः इति धीमन्तो मन्यन्ते । शस्त्रमेव शास्त्राद् बलवत्तरमिति नृपाश्चिन्तयन्ति ।

४. मम विद्या तव विद्यायाः गरीयसी इति कविना भाषितम् ।

५. अनेन वर्मणाहं सर्वेषु जनेषु बलिष्ठो भवेयम् ।

६. लघिष्ठेनापि धनेन तुष्टोऽहं भविष्यामि । किन्तु धनितमोऽपि भवान् मह्यं लघुतममपि धनं न दास्यतीत्यहं मन्ये ।

७. वर्त्मनागच्छन्तं मुनिं दृष्ट्वा तत्रभवता नृपेण चिन्तितम् - क एष महत्तमो नरः? गरिष्ठा अस्य विद्या दृश्यते इति। स नृपस्तं श्रेष्ठं मुनिं भाषितवान् - हे मुने, किं ते प्रेयः किं च ते श्रेयः इति। तदा तेन मुनिना उदितम् - हे नृप, मूर्खतमाः नराः धनं प्रियं मन्यन्ते, भार्यां च प्रेयसीं मन्यन्ते। ते आत्मनः श्रेयः नैव चिन्तयन्ति। ईश्वरमेव श्रेष्ठं प्रेष्ठं च मन्यमानोऽहं तस्य भक्तिमेव श्रेयसीं प्रेयसीं च मन्ये। ईश्वरादन्यत् न मे किञ्चित्प्रेयो वा श्रेयो वा इति। तन्मुनेर्वचनं श्रुत्वा (having heard) स नृपोऽवदत् - हे मुने, यतः (since) त्वमीश्वरमेव श्रेष्ठं प्रेष्ठं च मन्यसे, ततस्त्वमपि श्रेष्ठ इत्यहं मन्ये। यथा तव ईश्वरे साधिष्ठा भक्तिस्तथा ममापि भवतु इति।

८. क्षेपीयसा अश्वेन स वीरो दविष्ठं ग्रामं गत्वा कनीयांसं भ्रातरं भाषितवान् - हे भ्रातः, यवीयसी तव कन्या स्थविष्ठस्य पर्वतस्य मूर्ध्नि गत्वा म्रदिष्ठानि फलानि भक्षयन्ती दृष्टा। अस्माभिः प्रार्थितापि सा न ततो निवर्तते इति। तदा स भ्राता उदितवान् - भर्त्रा परित्यक्ता मम कन्या क्षोदिष्ठमप्यन्नं न भक्षयति। ततः सा क्रशीयसी जाता। तस्मिन्पर्वते यदि सा अल्पिष्ठान्यपि फलानि भक्षयेत् , तदपि गरीयो भवेत् इति।

९. भोः भोः राजन्। वनस्य सीमनि स्थित आश्रममृगोऽयम् ।त्यजैनम्।

१०. भवता खलु मम कन्या वनं गच्छन्ती दृष्टा।

११ यावत्त्वया राज्ञा अत्र स्थीयते तावदस्माकं सुखं भवेत्।

१२ विद्वांस ऋषयो बहूनि शास्त्राणि रचितवन्तः। तान्यस्माभिः पठितानि।

१३. इन्द्रशर्मा नाम ब्राह्मणोऽस्माकं सहाध्यायि मित्रम्।

१४. राज्ञां यशोऽस्माभिः प्रशस्तम्।

१५. प्राच्यां दिशि ज्योतींष्युद्गच्छन्ति। प्रतीच्यामस्तङ्गच्छन्ति।

१६. पञ्चिका नाम द्यूतविशेषः पञ्चभिः कपर्दैर्भवति। तत्र यदा सर्व उत्तानाः पतन्त्यवाञ्चो वा तदा पातयितान्यं जयति।

१७. प्राच्योऽन्या नद्यः स्यन्दन्ते श्वेतेभ्यः पर्वतेभ्यः प्रतीच्योऽन्याः।

१८. हिमवद्विन्ध्ययोर्मध्यं यत्प्राग्विनशनादपि।
प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः॥

१९. अन्वगेवाहमिच्छामि वनं गन्तुम्।

२०. मनः प्रत्यगवदधाति।

२१. न्यग्भूत्वा पर्युपासीत (परि+उप+आस् poten. 3sg.)।

२२. तिर्यगूर्ध्वमधस्ताच्च व्यापको महिमा हरेः।

२३. उदीच्यां दिशि प्रज्ञाततरा वाग् भाष्यते। उदञ्चः एव गच्छन्ति वाचं शिक्षितुम्।

**2. Translate into Sanskrit:**

1. My father is older than your father, but he is also faster than your father.
2. His honor over there came from the most distant village in order to sit in our assembly.
3. The youngest man here is also the most praiseworthy.
4. While going to the village, I saw a horse even bigger than your horse.
5. Only the strongest men can climb the largest mountains.
6. A proud man can be virtuous, but not always.
7. The intelligent teacher taught the sacred texts to me, and therefore my knowledge is greater than your knowledge.
8. Knowledge is the heaviest burden - so says a fool.
9. Most people think that gold is the dearest thing in the world. However, the best among the sages will tell you that a vision of the Lord is the dearest and the best thing.
10. His honor the king has heavy armor. I think that only the strongest horse will be able to carry him.
11. The horses stand turned away.
12. The king's enemies go backwards to their own border.
13. The easterners do not speak Sanskrit (संस्कृतम्).
14. The boy who approached (उपेयिवस्) the teacher was seen by me.
15. The people honored the king who stood (तस्थिवस्) at the gate of the city. They looked at the jewels on his head.

**3. Write five sentences of your own in Sanskrit.**

# LESSON 25

**Second conjugation**

The conjugations 2, 3, 5, 7, 8 and 9 are different from the conjugations 1, 4, 6 and 10, in that the verbal base in the latter conjugations ends in -अ, while the verbal base in the first group of conjugations does not end in -अ. This fact leads to a greater sandhi impact of the final affixes on vowels and consonants of the verbal base in these conjugations. In order to appreciate this impact, the final affixes may be divided between those with **strong bases** and **weak bases.** Below, the final affixes for these conjugations are presented. The affixes for strong bases appear in italics.

**Present**

| | Active | | | Middle | |
|---|---|---|---|---|---|
| *-मि* | -वः | -मः | -ए | -वहे | -महे |
| *-सि* | -थः | -थ | -से | -आथे | -ध्वे |
| *-ति* | -तः | -अन्ति | -ते | -आते | -अते |

**Past Imperfect**

| | | | | | |
|---|---|---|---|---|---|
| *-अम्* | -व | -म | -इ | -वहि | -महि |
| *-स्* | -तम् | -त | -थाः | -आथाम् | -ध्वम् |
| *-त्* | -ताम् | -अन् | -त | -आताम् | -अत |

**Imperative**

| | | | | | |
|---|---|---|---|---|---|
| *-आनि* | *-आव* | *-आम* | *-ऐ* | *-आवहै* | *-आमहै* |
| -धि/हि | -तम् | -त | -स्व | -आथाम् | -ध्वम् |
| *-तु* | -ताम् | -अन्तु | -ताम् | -आताम् | -अताम् |

**Potential / Optative**

| | | | | | |
|---|---|---|---|---|---|
| -याम् | -याव | -याम | -ईय | -ईवहि | -ईमहि |
| -याः | -यातम् | -यात | -ईथाः | -ईयाथाम् | -ईध्वम् |
| -यात् | -याताम् | -युः | -ईत | -ईयाताम् | -ईरन् |

Of all these terminations, the active imperative second person singular -धि / हि and the active potential terminations are different from those in the conjugations 1, 4, 6, 10. Also note the absence of न् in the middle third plural terminations -अते (present), -अत (imperfect) and -अताम् (imperative). Finally note that the middle dual affixes such as -आथे, -आते (present), -आथाम्, -आताम् (imperfect), -आथाम्, -आताम् (imperative) all begin with आ, while in the conjugations 1, 4, 6 and 10, the corresponding affixes begin with इ.

Also one should keep in mind the optional affix -तात् for the second person and third person imperatives of active (परस्मैपदिन्) verbs. This is used in expressing a blessing. This affix is usable in all the following conjugations, e.g. स्तात् from अस्, अत्तात् from अद्. However, since its use is limited, it will not be given in the regular paradigms.

**Formation of the second conjugation**

In this conjugation, no infix separates the verb root from the final affixes and hence the interaction between the verb root and the final affixes is most intense. This conjugation contains some of the most simple as well as some of the most difficult paradigms. The simplest verbs belonging to this conjugation are verbs ending in आ; e.g., या "to go", पा "to protect". These are active (परस्मैपदिन्) verbs. Observe the paradigm of the verb या :

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| यामि | यावः | यामः | अयाम् | अयाव | अयाम |
| यासि | याथः | याथ | अयाः | अयातम् | अयात |
| याति | यातः | यान्ति | अयात् | अयाताम् | अयान् / अयुः |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| यानि | याव | याम | यायाम् | यायाव | यायाम |
| याहि | यातम् | यात | यायाः | यायातम् | यायात |
| यातु | याताम् | यान्तु | यायात् | यायाताम् | यायुः |

अस्- "to be" (strong stem अस्-, weak stem स्-)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| अस्मि | स्वः | स्मः | आसम् | आस्व | आस्म |
| असि | स्थः | स्थ | आसीः | आस्तम् | आस्त |
| अस्ति | स्तः | सन्ति | आसीत् | आस्ताम् | आसन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| असानि | असाव | असाम | स्याम् | स्याव | स्याम |
| एधि | स्तम् | स्त | स्याः | स्यातम् | स्यात |
| अस्तु | स्ताम् | सन्तु | स्यात् | स्याताम् | स्युः |

अद्- "to eat" (Active)

### Active Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| अद्मि | अद्वः | अद्मः | आदम् | आद्व | आद्म |
| अत्सि | अत्थः | अत्थ | आदः | आत्तम् | आत्त |
| अत्ति | अत्तः | अदन्ति | आदत् | आत्ताम् | आदन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| अदानि | अदाव | अदाम | अद्याम् | अद्याव | अद्याम |
| अद्धि | अत्तम् | अत्त | अद्याः | अद्यातम् | अद्यात |
| अत्तु | अत्ताम् | अदन्तु | अद्यात् | अद्याताम् | अद्युः |

दुह्- "to milk" (Active and Middle)

### Active Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| दोह्मि | दुह्वः | दुह्मः | अदोहम् | अदुह्व | अदुह्म |
| धोक्षि | दुग्धः | दुग्ध | अधोक् | अदुग्धम् | अदुग्ध |
| दोग्धि | दुग्धः | दुहन्ति | अधोक् | अदुग्धाम् | अदुहन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| दोहानि | दोहाव | दोहाम | दुह्याम् | दुह्याव | दुह्याम |
| दुग्धि | दुग्धम् | दुग्ध | दुह्याः | दुह्यातम् | दुह्यात |
| दोग्धु | दुग्धाम् | दुहन्तु | दुह्यात् | दुह्याताम् | दुह्युः |

## Middle Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| दुहे | दुह्वहे | दुह्महे | अदुहि | अदुह्वहि | अदुह्महि |
| धुक्षे | दुहाथे | धुग्ध्वे | अदुग्धाः | अदुहाथाम् | अधुग्ध्वम् |
| दुग्धे | दुहाते | दुहते | अदुग्ध | अदुहाताम् | अदुहत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| दोहै | दोहावहै | दोहामहै | दुहीय | दुहीवहि | दुहीमहि |
| धुक्ष्व | दुहाथाम् | धुग्ध्वम् | दुहीथाः | दुहीयाथाम् | दुहीध्वम् |
| दुग्धाम् | दुहाताम् | दुहताम् | दुहीत | दुहीयाताम् | दुहीरन् |

लिह्- "to lick" (Active and Middle)

## Active Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| लेह्मि | लिह्वः | लिह्मः | अलेहम् | अलिह्व | अलिह्म |
| लेक्षि | लीढः | लीढ | अलेट् | अलीढम् | अलीढ |
| लेढि | लीढः | लिहन्ति | अलेट् | अलीढाम् | अलिहन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| लेहानि | लेहाव | लेहाम | लिह्याम् | लिह्याव | लिह्याम |
| लीढि | लीढम् | लीढ | लिह्याः | लिह्यातम् | लिह्यात |
| लेढु | लीढाम् | लिहन्तु | लिह्यात् | लिह्याताम् | लिह्युः |

## Middle Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| लिहे | लिह्वहे | लिह्महे | अलिहि | अलिह्वहि | अलिह्महि |
| लिक्षे | लिहाथे | लीढ्वे | अलीढाः | अलिहाथाम् | अलीढ्वम् |
| लीढे | लिहाते | लिहते | अलीढ | अलिहाताम् | अलिहत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| लेहै | लेहावहै | लेहामहै | लिहीय | लिहीवहि | लिहीमहि |
| लिक्ष्व | लिहाथाम् | लीढ्वम् | लिहीथाः | लिहीयाथाम् | लिहीध्वम् |
| लीढाम् | लिहाताम् | लिहताम् | लिहीत | लिहीयाताम् | लिहीरन् |

नु- "to praise" (Active)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| नौमि | नुवः | नुमः | अनवम् | अनुव | अनुम |
| नौषि | नुथः | नुथ | अनौः | अनुतम् | अनुत |
| नौति | नुतः | नुवन्ति | अनौत् | अनुताम् | अनुवन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| नवानि | नवाव | नवाम | नुयाम् | नुयाव | नुयाम |
| नुहि | नुतम् | नुत | नुयाः | नुयातम् | नुयात |
| नौतु | नुताम् | नुवन्तु | नुयात् | नुयाताम् | नुयुः |

The roots स्तु- "to praise" and रु- "to cry" have an optional ई added to consonant initial affixes yielding numerous doublets:

**Active Paradigms**

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| स्तौमि | स्तुवः | स्तुमः | अस्तवम् | अस्तुव | अस्तुम |
| स्तवीमि | स्तुवीवः | स्तुवीमः | | अस्तुवीव | अस्तुवीम |
| स्तौषि | स्तुथः | स्तुथ | अस्तौः | अस्तुतम् | अस्तुत |
| स्तवीषि | स्तुवीथः | स्तुवीथ | अस्तवीः | अस्तुवीतम् | अस्तुवीत |
| स्तौति | स्तुतः | स्तुवन्ति | अस्तौत् | अस्तुताम् | अस्तुवन् |
| स्तवीति | स्तुवीतः | | अस्तवीत् | अस्तुवीताम् | |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| स्तवानि | स्तवाव | स्तवाम | स्तुयाम् | स्तुयाव | स्तुयाम |
| | | | स्तुवीयाम् | स्तुवीयाव | स्तुवीयाम |
| स्तुहि | स्तुतम् | स्तुत | स्तुयाः | स्तुयातम् | स्तुयात |
| स्तुवीहि | स्तुवीतम् | स्तुवीत | स्तुवीयाः | स्तुवीयातम् | स्तुवीयात |
| स्तौतु | स्तुताम् | स्तुवन्तु | स्तुयात् | स्तुयाताम् | स्तुयुः |
| स्तवीतु | स्तुवीताम् | | स्तुवीयात् | स्तुवीयाताम् | स्तुवीयुः |

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| स्तुवे | स्तुवहे | स्तुमहे | अस्तुवि | अस्तुवहि | अस्तुमहि |
| | स्तुवीवहे | स्तुवीमहे | | अस्तुवीवहि | अस्तुवीमहि |
| स्तुषे | स्तुवाथे | स्तुध्वे | अस्तुथाः | अस्तुवाथाम् | अस्तुध्वम् |
| स्तुवीषे | | स्तुवीध्वे | अस्तुवीथाः | | अस्तुवीध्वम् |
| स्तुते | स्तुवाते | स्तुवते | अस्तुत | अस्तुवाताम् | अस्तुवत |
| स्तुवीते | | | अस्तुवीत | | |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| स्तवै | स्तवावहै | स्तवामहै | स्तुवीय | स्तुवीवहि | स्तुवीमहि |
| स्तुष्व | स्तुवाथाम् | स्तुध्वम् | स्तुवीथाः | स्तुवीयाथाम् | स्तुवीध्वम् |
| स्तुवीष्व | | स्तुवीध्वम् | | | |
| स्तुताम् | स्तुवाताम् | स्तुवताम् | स्तुवीत | स्तुवीयाताम् | स्तुवीरन् |
| स्तुवीताम् | | | | | |

वच् (2P) "to speak"

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| वच्मि | वच्वः | वच्मः | अवचम् | अवच्व | अवच्म |
| वक्षि | वक्थः | वक्थ | अवक्/ग् | अवक्तम् | अवक्त |
| वक्ति | वक्तः | (nil) | अवक्/ग् | अवक्ताम् | अवचन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| वचानि | वचाव | वचाम | वच्याम् | वच्याव | वच्याम |
| वग्धि | वक्तम् | वक्त | वच्याः | वच्यातम् | वच्यात |
| वक्तु | वक्ताम् | वचन्तु | वच्यात् | वच्याताम् | वच्युः |

चक्ष् (2A) "to speak"

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| चक्षे | चक्ष्वहे | चक्ष्महे | अचक्षि | अचक्ष्वहि | अचक्ष्महि |
| चक्षे | चक्षाथे | चड्ढ्वे | अचष्ठाः | अचक्षाथाम् | अचड्ढ्वम् |
| चष्टे | चक्षाते | चक्षते | अचष्ट | अचक्षाताम् | अचक्षत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| चक्षै | चक्षावहै | चक्षामहै | चक्षीय | चक्षीवहि | चक्षीमहि |
| चक्ष्व | चक्षाथाम् | चड्ढ्वम् | चक्षीथाः | चक्षीयाथाम् | चक्षीध्वम् |
| चष्टाम् | चक्षाताम् | चक्षताम् | चक्षीत | चक्षीयाताम् | चक्षीरन् |

## Vocabulary

### Verbs

| | | |
|---|---|---|
| या | (P) | "to go" |
| भा | (P) | "to shine", "to seem", "to appear" |
| पा | (P) | "to protect" (Different from पा - पिबति) |
| स्ना | (P) | "to bathe" |
| दा | (P) | "to cut" (Different from दा - यच्छति or ददाति) |
| ख्या | (P) | "to tell, narrate" |
| वा | (P) | "to blow" (Intransitive, "wind blows") |
| अस् | (P) | "to be, to exist" |
| अद् | (P) | "to eat" |
| दुह् | (P, A) | "to milk" (Ditransitive) |
| स्तु | (P, A) | "to praise" |
| रु | (P) | "to cry, to make noise" |
| नु | (P) | "to praise" |
| लिह् | (P, A) | "to lick" |
| वच् | (P) | "to speak" |
| चक्ष् | (A) | "to speak" |

### Nouns

| | | | | | |
|---|---|---|---|---|---|
| अगद | (m) | medicine | दीपक | (m) | lamp |
| आचार्य | (m) | teacher | नारिकेल | (m) | coconut |
| उपवन | (n) | garden | परिश्रम | (m) | exertion |
| कुठार | (m) | axe | पिशित | (n) | flesh |
| गर्दभ | (m) | ass | पिशुन | (m) | wicked, evil |
| चन्दन | (n) | Sandal-wood | भल्लूक | (m) | bear |
| जिह्वा | (f) | tongue | मकर | (m) | crocodile |
| तीक्ष्ण | (a) | sharp | ललाट | (n) | forehead |
| शार्दूल | (m) | tiger | आश्रम | (m) | hermitage |

| | | | | | |
|---|---|---|---|---|---|
| शीत | (a) | cold, cool | मार्जार | (m) | cat |
| स्नेह | (m) | affection | प्रातर् | (ind) | in the morning |
| कोप | (m) | anger | किरण | (m) | ray |
| उत्थाय | | gerund उद्+√स्था | अज | (m) | goat |
| पुस्तक | (n) | book | अज्ञान | (n) | ignorance |

**Exercises**

1) **Write full paradigms for the following verbs:**
रु (P, like स्तु), भा, पा, and स्ना.

2) **Translate the following into English:**

१. धीमन्तो जना भगवन्तमस्तुवत ।
२. मतिमन्तमाचार्यं नुवन्तु भवन्तः । आचार्यस्य प्रसादेन अज्ञानम् अदाम ।
३. ईश्वरोऽस्मान् पातु । ईश्वरमेव वयं नमामो नुमश्च ।
४. शार्दूलाः भल्लूकानां पिशितं लिहताम् । हे वीराः, भवन्तः शत्रूणामुरांसि शस्त्रैः दान्तु । शृगालाश्च तेषां शत्रूणां शरीराण्यदन्तु ।
५. भक्तिमान् गुरुः प्रातरुत्थाय नद्याः प्रसन्ने जले अस्नात्, सूर्यं चास्तौत् ।
६. दास उपवनमयात्, तीक्ष्णेन कुठारेण च चन्दनवृक्षमदात् ।
७. महता परिश्रमेण स सम्राट् हिमवन्तं पर्वतं यात्वा भल्लूकानपश्यत् ।
८. मकरः शार्दूलस्य पिशितं लेढि । मार्जारः पय इति मत्वा चन्द्रकिरणान् लेढि ।
९. यदा स शक्तिमान्वीरः शत्रोः शिरोऽदात्, तदा तस्य शत्रोः सर्वा भार्या वनमयुः । तत्र ता अरुवन् ।
१०. आचार्यस्य पुत्रो यदा धेनुं दोग्धि तदा कश्चिद् गर्दभस्तत्रागत्य तत् पयो लेढि ।
११. भल्लूका नारिकेलान् लिह्युः, किन्तु ते तान् न अद्युः । गजास्तु नारिकेलानदन्ति ।
१२. हे बालाः, यूयं जिह्वाभिः सर्वाणि फलान्यलीढ । अधुना युष्माकमाचार्यः कथमिमान्यद्यात् ।
१३. यदेदं जगन्नासीत्तदा चन्द्रः सूर्यश्च वियति नाभाताम् । ईश्वर एवाभात् । अधुनापीश्वरस्यैव तेजसा सूर्यश्चन्द्रश्चाकाशे तिष्ठतो भातश्च ।
१४. यदस्ति तदस्ति, यन्नास्ति तन्नास्ति । एषोऽगदो मुनीन्दुःखात्पाति ।

१५. हे ईश्वर, पाहि पाहि मां दुःखेभ्यः ।

१६. यदा स कुकविः (कु = "bad") कुकाव्यानि पठति तदा केचित् जना रुवन्ति, केचिच्च कोपेन तस्य कवेः काव्यपुस्तकं दान्ति ।

१७. तस्य मुनेराश्रमे शार्दूला अपि धेनूः पान्ति । शृगाला अप्यजानां ललाटानि स्नेहेन लिहन्ति । मकरा अपि बालेभ्यः कथाः ख्यान्ति । शीता वाता वान्ति, जनानां च परिश्रमं दान्ति । सर्वे मुनय ईश्वरस्य भक्त्या भान्ति । ईश्वरं च नुवन्ति ।

१८. मुनिर्भाषितवान् - "हे पिशुनाः, सुमनसां शान्तिं मा दात । अन्यत्र यात । ईश्वरो युष्मान्पातु" इति ।

3) **List all the verbs in the sentences above. If a given form is in a certain tense or mood, provide corresponding forms in other tenses and moods.**

4) **Translate the following into Sanskrit:**

Once upon a time, I was sitting in my hermitage reciting religious texts. Outside of my house, a cold wind blew. I thought that someone was crying in my garden. "Who is my guest?" I thought, and went to the door to see. In the rays of the moon, I saw a big bear sitting under a tree licking my coconuts. "Go elsewhere and don't eat my coconuts!" I told him. Then he said to me, "Don't be angry with me, Sir. I am only an old bear. However, you are a wise sage. My hunger is great. I will eat only one of your coconuts, and then I will go." I thought about the bear's words, and told him, "alright". Then I went inside my house and brought my sharp axe to the garden. There I cut many coconuts and gave them all to the bear. "Now go into the woods and eat," I said to him. The bear said, "May the Lord protect you."

5) **Write any five Sanskrit sentences of your own.**

# LESSON 26

**Second conjugation (continued-)**

In this lesson, some more important verbs belonging to the second conjugation are introduced:

| | | |
|---|---|---|
| इ | (P) | to go |
| अधि+इ | (A) | to study |
| ब्रू | (P, A) | to speak |
| आस् | (A) | to sit, remain |
| शी | (A) | to lie, to sleep |
| शास् | (P) | to teach, to rule, to instruct |
| द्विष् | (P, A) | to hate |
| रुद् | (P) | to weep, cry |
| स्वप् | (P) | to sleep |
| हन् | (P) | to kill |
| श्वस् | (P) | to breathe |
| विद् | (P) | to know |

Since this conjugation does not have an infix, the interaction between the root and the affixes produces complicated sandhi results. The peculiarities must be individually noted.

इ "to go" (P)

| | **Present** | | | **Imperfect** | |
|---|---|---|---|---|---|
| एमि | इवः | इमः | आयम् | ऐव | ऐम |
| एषि | इथः | इथ | ऐः | ऐतम् | ऐत |
| एति | इतः | यन्ति | ऐत् | ऐताम् | आयन् |

| | **Imperative** | | | **Potential** | |
|---|---|---|---|---|---|
| अयानि | अयाव | अयाम | इयाम् | इयाव | इयाम |
| इहि | इतम् | इत | इयाः | इयातम् | इयात |
| एतु | इताम् | यन्तु | इयात् | इयाताम् | इयुः |

### अधि + इ "to study" (A)

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| अधीये | अधीवहे | अधीमहे | अध्यैयि | अध्यैवहि | अध्यैमहि |
| अधीषे | अधीयाथे | अधीध्वे | अध्यैथाः | अध्यैयाथाम् | अध्यैध्वम् |
| अधीते | अधीयाते | अधीयते | अध्यैत | अध्यैयाताम् | अध्यैयत |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| अध्ययै | अध्ययावहै | अध्ययामहै | अधीयीय | अधीयीवहि | अधीयीमहि |
| अधीष्व | अधीयाथाम् | अधीध्वम् | अधीयीथाः | अधीयीयाथाम् | अधीयीध्वम् |
| अधीताम् | अधीयाताम् | अधीयताम् | अधीयीत | अधीयीयाताम् | अधीयीरन् |

### ब्रू "to speak" (P)

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| ब्रवीमि | ब्रूवः | ब्रूमः | अब्रवम् | अब्रूव | अब्रूम |
| ब्रवीषि | ब्रूथः | ब्रूथ | अब्रवीः | अब्रूतम् | अब्रूत |
| ब्रवीति | ब्रूतः | ब्रुवन्ति | अब्रवीत् | अब्रूताम् | अब्रुवन् |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| ब्रवाणि | ब्रवाव | ब्रवाम | ब्रूयाम् | ब्रूयाव | ब्रूयाम |
| ब्रूहि | ब्रूतम् | ब्रूत | ब्रूयाः | ब्रूयातम् | ब्रूयात |
| ब्रवीतु | ब्रूताम् | ब्रुवन्तु | ब्रूयात् | ब्रूयाताम् | ब्रूयुः |

### ब्रू "to speak" (A)

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| ब्रुवे | ब्रूवहे | ब्रूमहे | अब्रुवि | अब्रूवहि | अब्रूमहि |
| ब्रूषे | ब्रुवाथे | ब्रूध्वे | अब्रूथाः | अब्रुवाथाम् | अब्रूध्वम् |
| ब्रूते | ब्रुवाते | ब्रुवते | अब्रूत | अब्रुवाताम् | अब्रुवत |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| ब्रवै | ब्रवावहै | ब्रवामहै | ब्रुवीय | ब्रुवीवहि | ब्रुवीमहि |
| ब्रूष्व | ब्रुवाथाम् | ब्रूध्वम् | ब्रुवीथाः | ब्रुवीयाथाम् | ब्रुवीध्वम् |
| ब्रूताम् | ब्रुवाताम् | ब्रुवताम् | ब्रुवीत | ब्रुवीयाताम् | ब्रुवीरन् |

## आस् "to sit, remain" (A)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| आसे | आस्वहे | आस्महे | आसि | आस्वहि | आस्महि |
| आस्से | आसाथे | आध्वे | आस्थाः | आसाथाम् | आध्वम् |
| आस्ते | आसाते | आसते | आस्त | आसाताम् | आसत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| आसै | आसावहै | आसामहै | आसीय | आसीवहि | आसीमहि |
| आस्स्व | आसाथाम् | आध्वम् | आसीथाः | आसीयाथाम् | आसीध्वम् |
| आस्ताम् | आसाताम् | आसताम् | आसीत | आसीयाताम् | आसीरन् |

## शी "to lie, sleep" (A)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| शये | शेवहे | शेमहे | अशयि | अशेवहि | अशेमहि |
| शेषे | शयाथे | शेध्वे | अशेथाः | अशयाथाम् | अशेध्वम् |
| शेते | शयाते | शेरते | अशेत | अशयाताम् | अशेरत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| शयै | शयावहै | शयामहै | शयीय | शयीवहि | शयीमहि |
| शेष्व | शयाथाम् | शेध्वम् | शयीथाः | शयीयाथाम् | शयीध्वम् |
| शेताम् | शयाताम् | शेरताम् | शयीत | शयीयाताम् | शयीरन् |

## शास् "to rule, instruct, teach" (P)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| शास्मि | शिष्वः | शिष्मः | अशासम् | अशिष्व | अशिष्म |
| शास्सि | शिष्ठः | शिष्ठ | अशाः/त् | अशिष्टम् | अशिष्ट |
| शास्ति | शिष्टः | शासति | अशात् | अशिष्टाम् | अशासुः |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| शासानि | शासाव | शासाम | शिष्याम् | शिष्याव | शिष्याम |
| शाधि | शिष्टम् | शिष्ट | शिष्याः | शिष्यातम् | शिष्यात |
| शास्तु | शिष्टाम् | शासतु | शिष्यात् | शिष्याताम् | शिष्युः |

### आ + शास् "to hope" (A)

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| आशासे | आशास्वहे | आशास्महे | आशासि | आशास्वहि | आशास्महि |
| आशास्से | आशासाथे | आशाध्वे | आशास्थाः | आशासाथाम् | आशाध्वम् |
| आशास्ते | आशासाते | आशासते | आशास्त | आशासाताम् | आशासत |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| आशासै | आशासावहै | आशासामहै | आशासीय | आशासीवहि | आशासीमहि |
| आशास्स्व | आशासाथाम् | आशाध्वम् | आशासीथाः | आशासीयाथाम् | आशासीध्वम् |
| आशास्ताम् | आशासाताम् | आशासताम् | आशासीत | आशासीयाताम् | आशासीरन् |

### द्विष् "to hate" (P)

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| द्वेष्मि | द्विष्वः | द्विष्मः | अद्वेषम् | अद्विष्व | अद्विष्म |
| द्वेक्षि | द्विष्ठः | द्विष्ठ | अद्वेट् | अद्विष्टम् | अद्विष्ट |
| द्वेष्टि | द्विष्टः | द्विषन्ति | अद्वेट् | अद्विष्टाम् | अद्विषन्/षुः |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| द्वेषाणि | द्वेषाव | द्वेषाम | द्विष्याम् | द्विष्याव | द्विष्याम |
| द्विड्ढि | द्विष्टम् | द्विष्ट | द्विष्याः | द्विष्यातम् | द्विष्यात |
| द्वेष्टु | द्विष्टाम् | द्विषन्तु | द्विष्यात् | द्विष्याताम् | द्विष्युः |

### द्विष् "to hate" (A)

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| द्विषे | द्विष्वहे | द्विष्महे | अद्विषि | अद्विषावहि | अद्विषामहि |
| द्विक्षे | द्विषाथे | द्विड्ढ्वे | अद्विष्ठाः | अद्विषाथाम् | अद्विड्ढ्वम् |
| द्विष्टे | द्विषाते | द्विषते | अद्विष्ट | अद्विषाताम् | अद्विषत |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| द्वेषै | द्वेषावहै | द्वेषामहै | द्विषीय | द्विषीवहि | द्विषीमहि |
| द्विक्ष्व | द्विषाथाम् | द्विड्ढ्वम् | द्विषीथाः | द्विषीयाथाम् | द्विषीध्वम् |
| द्विष्टाम् | द्विषाताम् | द्विषताम् | द्विषीत | द्विषीयाताम् | द्विषीरन् |

### रुद् "to weep, cry" (P)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| रोदिमि | रुदिवः | रुदिमः | अरोदम् | अरुदिव | अरुदिम |
| रोदिषि | रुदिथः | रुदिथ | अरोदः/दीः | अरुदितम् | अरुदित |
| रोदिति | रुदितः | रुदन्ति | अरोदत्/दीत् | अरुदिताम् | अरुदन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| रोदानि | रोदाव | रोदाम | रुद्याम् | रुद्याव | रुद्याम |
| रुदिहि | रुदितम् | रुदित | रुद्याः | रुद्यातम् | रुद्यात |
| रोदितु | रुदिताम् | रुदन्तु | रुद्यात् | रुद्याताम् | रुद्युः |

### स्वप् "to sleep" (P)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| स्वपिमि | स्वपिवः | स्वपिमः | अस्वपम् | अस्वपिव | अस्वपिम |
| स्वपिषि | स्वपिथः | स्वपिथ | अस्वपः/पीः | अस्वपितम् | अस्वपित |
| स्वपिति | स्वपितः | स्वपन्ति | अस्वपत्/पीत् | अस्वपिताम् | अस्वपन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| स्वपानि | स्वपाव | स्वपाम | स्वप्याम् | स्वप्याव | स्वप्याम |
| स्वपिहि | स्वपितम् | स्वपित | स्वप्याः | स्वप्यातम् | स्वप्यात |
| स्वपितु | स्वपिताम् | स्वपन्तु | स्वप्यात् | स्वप्याताम् | स्वप्युः |

### हन् "to kill" (P)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| हन्मि | हन्वः | हन्मः | अहनम् | अहन्व | अहन्म |
| हंसि | हथः | हथ | अहन् | अहतम् | अहत |
| हन्ति | हतः | घ्नन्ति | अहन् | अहताम् | अघ्नन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| हनानि | हनाव | हनाम | हन्याम् | हन्याव | हन्याम |
| जहि | हतम् | हत | हन्याः | हन्यातम् | हन्यात |
| हन्तु | हताम् | घ्नन्तु | हन्यात् | हन्याताम् | हन्युः |

### श्वस् "to breathe" (P)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| श्वसिमि | श्वसिवः | श्वसिमः | अश्वसम् | अश्वसिव | अश्वसिम |
| श्वसिषि | श्वसिथः | श्वसिथ | अश्वसः/सीः | अश्वसितम् | अश्वसित |
| श्वसिति | श्वसितः | श्वसन्ति | अश्वसत्/सीत् | अश्वसिताम् | अश्वसन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| श्वसानि | श्वसाव | श्वसाम | श्वस्याम् | श्वस्याव | श्वस्याम |
| श्वसिहि | श्वसितम् | श्वसित | श्वस्याः | श्वस्यातम् | श्वस्यात |
| श्वसितु | श्वसिताम् | श्वसन्तु | श्वस्यात् | श्वस्याताम् | श्वस्युः |

### विद् "to know" (P)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| वेद्मि | विद्वः | विद्मः | अवेदम् | अविद्व | अविद्म |
| वेत्सि | वित्थः | वित्थ | अवेः/त् | अवित्तम् | अवित्त |
| वेत्ति | वित्तः | विदन्ति | अवेत् | अवित्ताम् | अविदुः |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| वेदानि | वेदाव | वेदाम | विद्याम् | विद्याव | विद्याम |
| विद्धि | वित्तम् | वित्त | विद्याः | विद्यातम् | विद्यात |
| वेत्तु | वित्ताम् | विदन्तु | विद्यात् | विद्याताम् | विद्युः |

**Other forms of the second conjugation verbs:**

(One should keep in mind that not all the forms listed below are equally frequent. Some are rare and others almost unattested. **For the present participle forms, see the list in Lesson 35**).

| root | | gerunds -त्वा | gerunds -य | inf. | त part. | pass. | future |
|---|---|---|---|---|---|---|---|
| अद् | eat | जग्ध्वा | प्रजग्ध्य | अत्तुम् | जग्ध | अद्यते | अत्स्यति |
| अस् | be | भूत्वा | संभूय | भवितुम् | भूत | भूयते | भविष्यति |
| आस् | sit | आसित्वा | उपास्य | आसितुम् | आसित | आस्यते | आसिष्यते |
| इ | go | इत्वा | उपेत्य | एतुम् | इत | ईयते | एष्यति |
| ख्या | tell | ख्यात्वा | आख्याय | ख्यातुम् | ख्यात | ख्यायते | ख्यास्यति |
| दा | cut | दात्वा | अवदाय | दातुम् | दात | दायते | दास्यति |
| दुह् | milk | दुग्ध्वा | संदुह्य | दोग्धुम् | दुग्ध | दुह्यते | धोक्ष्यति/ते |

| root | | gerunds -त्वा | -य | inf. | त part. | pass. | future |
|---|---|---|---|---|---|---|---|
| द्विष् | hate | द्विष्ट्वा | विद्विष्य | द्वेष्टुम् | द्विष्ट | द्विष्यते | द्वेक्ष्यति/ते |
| नु | praise | नुत्वा | प्रणुत्य | नवितुम् | नुत | नूयते | नविष्यति |
| पा | protect | पात्वा | निपाय | पातुम् | पात | पायते | पास्यति |
| ब्रू | speak | उक्त्वा | प्रोच्य | वक्तुम् | उक्त | उच्यते | वक्ष्यति/ते |
| भा | shine | भात्वा | विभाय | भातुम् | भात | भायते | भास्यति |
| या | go | यात्वा | प्रयाय | यातुम् | यात | यायते | यास्यति |
| रु | cry | रुत्वा | विरुत्य | रवितुम् | रुत | रूयते | रविष्यति |
| रुद् | cry | रुदित्वा | विरुद्य | रोदितुम् | रुदित | रुद्यते | रोदिष्यति |
| लिह् | lick | लीढ्वा | आलिह्य | लेढुम् | लीढ | लिह्यते | लेक्ष्यति |
| वा | blow | वात्वा | निर्वाय | वातुम् | वात | वायते | वास्यति |
| विद् | know | विदित्वा | संविद्य | वेदितुम् | विदित | विद्यते | वेदिष्यति/ते<br>वेत्स्यति/ते |
| शास् | teach | शासित्वा<br>शिष्ट्वा | अनुशिष्य | शासितुम् | शिष्ट | शिष्यते | शासिष्यति |
| शी | lie | शयित्वा | उपशय्य | शयितुम् | शयित | शय्यते | शयिष्यते |
| श्वस् | breathe | श्वसित्वा | आश्वस्य | श्वसितुम् | श्वसित | श्वस्यते | श्वसिष्यति |
| स्तु | praise | स्तुत्वा | अभिष्टुत्य | स्तोतुम् | स्तुत | स्तूयते | स्तोष्यति/ते |
| स्ना | bathe | स्नात्वा | प्रस्नाय | स्नातुम् | स्नात | स्नायते | स्नास्यति |
| स्वप् | sleep | सुप्त्वा | प्रसुप्य | स्वप्तुम् | सुप्त | सुप्यते | स्वप्स्यति |
| हन् | kill | हत्वा | निहत्य | हन्तुम् | हत | हन्यते | हनिष्यति |

**Vocabulary**

| | | | |
|---|---|---|---|
| भृशम् | (adv) a lot | पति | (m) husband |
| वि+श्वस् | (2P) to trust | अविद्यावत् | (a) ignorant |
| हत्वा < हन् | gerund, having killed | ब्रुवत् < ब्रू | pres. participle |
| अन्त | (m) end | शास्तृ | (m) teacher |
| अविद्या | (f) ignorance | आ+या | (2P) to come |
| स्वपन्त् | pres. part. स्वप् (2P) | सर्प | (m) snake |
| मृत | (a) dead | सत्य | (n) truth |
| शुक | (m) parrot | पिशुन | (m) wicked person |
| निगूढ | (a) hidden | दिन | (n) day |
| बलीवर्द | (m) bull | इच्छा | (f) desire, craving |
| इव | (ind) like [X Y इव = X is like Y] | | |

**Exercises**

1. **Translate the following sentences into English:**

१. ये बालाः बहूनि दिनानि विद्याम् अधीयते, न च किमपि विदन्ति, तान् प्रति आचार्यः ब्रूते - "हे बालाः, यूयं बलीवर्दाः इव स्थ। परिश्राम्यन्तोऽपि यूयं विद्यावन्तो न अभवत। युष्माकं बुद्धिः नारिकेलः इव। तत्र विद्या नैव प्रविशति" इति।

२. बालाः अब्रुवन् - "हे पिशुन, यस्त्वम् अस्मान् द्वेक्षि, तं त्वां वयं द्विष्महे" इति।

३. यदा रामः सीताम् वनेऽत्यजत्, तदा सा भृशम् अरोदीत्, किन्तु पतिं न अद्विष्ट।

४. वयं शत्रुषु न विश्वसिमः। ये जनाः अविद्यावन्तः शत्रूणां वचने विश्वसन्ति, तान् पिशुनाः शत्रवः सुखेन घ्नन्ति। अविद्यावतः शत्रून् हत्वा पिशुनाः सुखेन शेरते।

५. सर्वदा आपदः एव चिन्तयन्तो धनवन्तः न कदापि सुखेन शेरते। शत्रूणां बलं चिन्तयन्तो भूभृतः न कदापि सुखेन शेरते। ईश्वरम् एव पश्यन्तः मुनयो न कदापि शेरते। ते सर्वदा ईश्वरम् एव शंसन्तः वने आसते। भगवान् बुद्धः "ईश्वरः न अस्ति" इति ब्रुवन् सर्वस्य दुःखस्य अन्तं पश्यन् वने आस्ते। ये जनान् शासति ते शास्तारः भवन्ति। बुद्धः जनानाम् शास्ता। ये तं शास्तारं मन्यन्ते तेऽविद्यां घ्नन्ति।

६. पिता गृहे आस्ते इति मन्यमानाः बालाः सुखेन अस्वपन्। पिशुनास्तु रात्रौ आगत्य गृहाणि दग्धुम् इच्छन्तः नगरं प्राविशन्। केचित् पिशुनाः आयान्ति इति पिता अवेत्, बालेभ्यश्च अब्रूत - "हे बालाः, पिशुनाः अस्मान् हन्तुम् आयान्तीति वेद्मि। सर्वे वयम् अस्माद् गृहाद् बहिः निगूढाः स्थास्यामः। यदा च पिशुनाः अस्मान् हन्तुं गृहं प्रवेक्ष्यन्ति, तदा वयमिदं गृहम् अनलेन धक्ष्यामः इति। एवं स पिता तस्य पुत्राश्च सर्वान् पिशुनान् अघ्नन्।

७. यः मातरि न विश्वसिति, तस्मिन् माता कथं विश्वस्यात्।

८. यः भूभृतं हन्यात् तं वयं सर्वे हन्याम इति वीराः अब्रुवन्। किन्तु स्वपन्तं नृपं कश्चित् सर्पः अहन्।

९. यः श्वसिति स जीवति, यः न जीवति स न श्वसिति।

१०. नृपो दासेभ्योऽब्रवीत् - "प्रियोऽयं मे शुकः। स मृतः इति यो मां ब्रूयात्, तमहं हन्याम्" इति। एकदा स शुको मृतः। तदा सर्वे दासाः "कोऽधुना नृपाय कथयेत्" इति चिन्तयन्तोऽरुदन्। "अहं नृपाय कथयिष्यामि" इति भाषित्वा कश्चित् धीमान् दासः नृपाय अब्रवीत् - "हे भूभृत्, तव प्रियः शुकः सर्वदैव स्वपिति। न किञ्चिद् ब्रवीति। न किञ्चिद् अन्नम् अत्ति। न वा श्वसिति" इति। नृपोऽपृच्छत् - "सः शुको जीवति वा मृतो वा" इति। दासोऽवदत् - तदहं न वेद्मि" इति। नृपोऽब्रवीत् - "यो न ब्रवीति, नान्नमत्ति, न वा श्वसिति स मृतः एव" इति। दासोऽब्रूत - "भवान् सत्यमब्रवीत्" इति।

**2. Translate the following story into Sanskrit:**

Once in the Himalaya mountain, on the bank of a great river Bhāgīrathī, there lived a famous blind teacher. He was a mendicant. Although a great assembly always sat around him and praised him, still he had no wealth whatsoever. One night, when the moon was shining in the sky, the old blind teacher sat outside his house and spoke to the many students who had come to study there. He said: "O students! You are ignorant children. You sleep in the darkness of your ignorance. Thinking 'these are my enemies', you hate some people, and thinking 'these are my friends', you praise other people. But now I will teach you the truth. Even the smallest craving is like a thief (चौर), and it will steal all your happiness. These cravings of yours alone are your enemies. Therefore, you must destroy all your cravings. Sorrow is your friend and your teacher. Sorrow points to you the path of knowledge. With knowledge you should cut down your ignorance. After your ignorance is destroyed, you will not have any sorrow." Having heard this, the students praised the sage's wisdom. However, they were not able to destroy their cravings. Therefore, they are still (अद्यापि) unhappy.

**3. Write five Sanskrit sentences of your own:**

# LESSON 27

**Third conjugation**

In the third conjugation, there is no infix intervening between the root and the final termination. However, the root undergoes reduplication. While it is always advisable to pay attention to the concrete forms of reduplication given in this lesson, some general features of the reduplicated verbs are given below.

1. Only the initial part of the root ending with the root vowel is reduplicated. For example:
   दा > दादा    धा > धाधा
2. If the original root vowel is long, the vowel in its reduplication is shortened. For example:
   दा > दादा > ददा    धा > धाधा > धधा
3. If the root begins with an aspirated consonant, this consonant is changed to the corresponding non-aspirated consonant in the reduplication. For example:
   धा > धाधा > धधा > दधा
4. If the root begins with ह्, this is changed to ज् in the reduplication. For example:
   हु > हुहु > जुहु
5. The vowel ऋ of roots in the third conjugation is changed to इ in the reduplication, (except in past perfect etc.)
   For example:
   भृ > भृभृ > बृभृ > बिभृ    पृ > पृपृ > पिपृ
6. The third conjugation verbs take basically the same affixes as are taken by the verbs of the Second Conjugation, with the following exceptions:
   a) There is no न् in the endings of the 3rd person, plural, present, and 3rd person, plural, imperative endings.
   b) The 3rd person, plural, imperfect is उस् and not अन्.

Below are given paradigms of some more common verbs of this conjugation.

हु "to offer oblations in a sacrifice, to sacrifice" (P)

| | **Present** | | | **Imperfect** | |
|---|---|---|---|---|---|
| जुहोमि | जुहुवः | जुहुमः | अजुहवम् | अजुहुव | अजुहुम |
| जुहोषि | जुहुथः | जुहुथ | अजुहोः | अजुहुतम् | अजुहुत |
| जुहोति | जुहुतः | जुह्वति | अजुहोत् | अजुहुताम् | अजुहवुः |

| | **Imperative** | | | **Potential** | |
|---|---|---|---|---|---|
| जुहवानि | जुहवाव | जुहवाम | जुहुयाम् | जुहुयाव | जुहुयाम |
| जुहुधि | जुहुतम् | जुहुत | जुहुयाः | जुहुयातम् | जुहुयात |
| जुहोतु | जुहुताम् | जुह्वतु | जुहुयात् | जुहुयाताम् | जुहुयुः |

भृ "to support, hold" (P, A)

**Active Paradigms**

| | **Present** | | | **Imperfect** | |
|---|---|---|---|---|---|
| बिभर्मि | बिभृवः | बिभृमः | अबिभरम् | अबिभृव | अबिभृम |
| बिभर्षि | बिभृथः | बिभृथ | अबिभर् | अबिभृतम् | अबिभृत |
| बिभर्ति | बिभृतः | बिभ्रति | अबिभर् | अबिभृताम् | अबिभरुः |

| | **Imperative** | | | **Potential** | |
|---|---|---|---|---|---|
| बिभराणि | बिभराव | बिभराम | बिभृयाम् | बिभृयाव | बिभृयाम |
| बिभृहि | बिभृतम् | बिभृत | बिभृयाः | बिभृयातम् | बिभृयात |
| बिभर्तु | बिभृताम् | बिभ्रतु | बिभृयात् | बिभृयाताम् | बिभृयुः |

**Middle Paradigms**

| | **Present** | | | **Imperfect** | |
|---|---|---|---|---|---|
| बिभ्रे | बिभृवहे | बिभृमहे | अबिभ्रि | अबिभृवहि | अबिभृमहि |
| बिभृषे | बिभ्राथे | बिभृध्वे | अबिभृथाः | अबिभ्राथाम् | अबिभृध्वम् |
| बिभृते | बिभ्राते | बिभ्रते | अबिभृत | अबिभ्राताम् | अबिभ्रत |

| | **Imperative** | | | **Potential** | |
|---|---|---|---|---|---|
| बिभरै | बिभरावहै | बिभरामहै | बिभ्रीय | बिभ्रीवहि | बिभ्रीमहि |
| बिभृष्व | बिभ्राथाम् | बिभृध्वम् | बिभ्रीथाः | बिभ्रीयाथाम् | बिभ्रीध्वम् |
| बिभृताम् | बिभ्राताम् | बिभ्रताम् | बिभ्रीत | बिभ्रीयाताम् | बिभ्रीरन् |

## दा "to give" (P, A)

### Active Paradigms

| | Present | | | | Imperfect | |
|---|---|---|---|---|---|---|
| ददामि | दद्वः | दद्मः | | अददाम् | अदद्व | अदद्म |
| ददासि | दत्थः | दत्थ | | अददाः | अदत्तम् | अदत्त |
| ददाति | दत्तः | ददति | | अददात् | अदत्ताम् | अददुः |

| | Imperative | | | | Potential | |
|---|---|---|---|---|---|---|
| ददानि | ददाव | ददाम | | दद्याम् | दद्याव | दद्याम |
| देहि | दत्तम् | दत्त | | दद्याः | दद्यातम् | दद्यात |
| ददातु | दत्ताम् | ददतु | | दद्यात् | दद्याताम् | दद्युः |

### Middle Paradigms

| | Present | | | | Imperfect | |
|---|---|---|---|---|---|---|
| ददे | दद्वहे | दद्महे | | अददि | अदद्वहि | अदद्महि |
| दत्से | ददाथे | दद्ध्वे | | अदत्थाः | अददाथाम् | अदद्ध्वम् |
| दत्ते | ददाते | ददते | | अदत्त | अददाताम् | अददत |

| | Imperative | | | | Potential | |
|---|---|---|---|---|---|---|
| ददै | ददावहै | ददामहै | | ददीय | ददीवहि | ददीमहि |
| दत्स्व | ददाथाम् | दद्ध्वम् | | ददीथाः | ददीयाथाम् | ददीध्वम् |
| दत्ताम् | ददाताम् | ददताम् | | ददीत | ददीयाताम् | ददीरन् |

## धा "to place, put" (P, A)

### Active Paradigms

| | Present | | | | Imperfect | |
|---|---|---|---|---|---|---|
| दधामि | दध्वः | दध्मः | | अदधाम् | अदध्व | अदध्म |
| दधासि | धत्थः | धत्थ | | अदधाः | अधत्तम् | अधत्त |
| दधाति | धत्तः | दधति | | अदधात् | अधत्ताम् | अदधुः |

| | Imperative | | | | Potential | |
|---|---|---|---|---|---|---|
| दधानि | दधाव | दधाम | | दध्याम् | दध्याव | दध्याम |
| धेहि | धत्तम् | धत्त | | दध्याः | दध्यातम् | दध्यात |
| दधातु | धत्ताम् | दधतु | | दध्यात् | दध्याताम् | दध्युः |

## Middle Paradigms

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| दधे | दध्वहे | दध्महे | अदधि | अदध्वहि | अदध्महि |
| धत्से | दधाथे | धद्ध्वे | अधत्थाः | अदधाथाम् | अधद्ध्वम् |
| धत्ते | दधाते | दधते | अधत्त | अदधाताम् | अदधत |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| दधै | दधावहै | दधामहै | दधीय | दधीवहि | दधीमहि |
| धत्स्व | दधाथाम् | धद्ध्वम् | दधीथाः | दधीयाथाम् | दधीध्वम् |
| धत्ताम् | दधाताम् | दधताम् | दधीत | दधीयाताम् | दधीरन् |

मा "to measure" (A)

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| मिमे | मिमीवहे | मिमीमहे | अमिमि | अमिमीवहि | अमिमीमहि |
| मिमीषे | मिमाथे | मिमीध्वे | अमिमीथाः | अमिमाथाम् | अमिमीध्वम् |
| मिमीते | मिमाते | मिमते | अमिमीत | अमिमाताम् | अमिमत |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| मिमै | मिमावहै | मिमामहै | मिमीय | मिमीवहि | मिमीमहि |
| मिमीष्व | मिमाथाम् | मिमीध्वम् | मिमीथाः | मिमीयाथाम् | मिमीध्वम् |
| मिमीताम् | मिमाताम् | मिमताम् | मिमीत | मिमीयाताम् | मिमीरन् |

हा "to leave, abandon" (P, A)

The middle paradigms of हा are exactly like those of the verb मा given above, with the alternation of the forms जहा and जही. The active paradigms are given below.

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| जहामि | जहीवः/ जहिवः | जहीमः/ जहिमः | अजहाम् | अजहीव/ अजहिव | अजहीम/ अजहिम |
| जहासि | जहीथः/ जहिथः | जहीथ/ जहिथ | अजहाः | अजहीतम्/ अजहितम् | अजहीत/ अजहित |
| जहाति | जहीतः/ जहितः | जहति | अजहात् | अजहीताम्/ अजहिताम् | अजहुः |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| जहानि | जहाव | जहाम | जह्याम् | जह्याव | जह्याम |
| जहाहि/<br>जहीहि/<br>जहिहि | जहीतम्/<br>जहितम् | जहीत/<br>जहित | जह्याः | जह्यातम् | जह्यात |
| जहातु | जहीताम्/<br>जहिताम् | जहतु | जह्यात् | जह्याताम् | जह्युः |

भी "to fear" (P)

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| बिभेमि | बिभीवः/<br>बिभिवः | बिभीमः/<br>बिभिमः | अबिभयम् | अबिभीव/<br>अबिभिव | अबिभीम/<br>अबिभिम |
| बिभेषि | बिभीथः/<br>बिभिथः | बिभीथ/<br>बिभिथ | अबिभेः | अबिभीतम्/<br>अबिभितम् | अबिभीत/<br>अबिभित |
| बिभेति | बिभीतः/<br>बिभितः | बिभ्यति | अबिभेत् | अबिभीताम्/<br>अबिभिताम् | अबिभयुः |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| बिभयानि | बिभयाव | बिभयाम | बिभीयाम्/<br>बिभियाम् | बिभीयाव/<br>बिभियाव | बिभीयाम/<br>बिभियाम |
| बिभीहि/<br>बिभिहि | बिभीतम्/<br>बिभितम् | बिभीत/<br>बिभित | बिभीयाः/<br>बिभियाः | बिभीयातम्/<br>बिभियातम् | बिभीयात/<br>बिभियात |
| बिभेतु | बिभीताम्/<br>बिभिताम् | बिभ्यतु | बिभीयात्/<br>बिभियात् | बिभीयाताम्/<br>बिभियाताम् | बिभीयुः/<br>बिभियुः |

**Other forms of the third conjugation verbs:**

**(For the present participles, see the list in Lesson 35).**

| | | Gerunds -त्वा | Gerunds -य | Inf -तुम् | Part. -त | Passive | Future |
|---|---|---|---|---|---|---|---|
| दा | "give" | दत्त्वा | प्रदाय | दातुम् | दत्त | दीयते | दास्यति/ते |
| धा | "put" | हित्वा | विधाय | धातुम् | हित | धीयते | धास्यति/ते |
| भी | "fear" | भीत्वा | संभीय | भेतुम् | भीत | भीयते | भेष्यति |
| भृ | "support" | भृत्वा | संभृत्य | भर्तुम् | भृत | भ्रियते | भरिष्यति/ते |
| मा | "measure" | मित्वा | उन्माय | मातुम् | मित | मीयते | मास्यते |
| हा | "abandon" | हित्वा | विहाय | हातुम् | हीन | हीयते | हास्यति |
| हु | "sacrifice" | हुत्वा | प्रहुत्य | होतुम् | हुत | हूयते | होष्यति |

**Vocabulary**

| | | | |
|---|---|---|---|
| अन्य prn. | other, another | पर mfn. | different, other |
| कर्मन् n. | job, action | पाद m. | foot |
| कुडव n. | measuring cup | मृत्यु m. | death |
| तक्षक m. | carpenter | राक्षस m. | demon |
| दम्य m. | bullock | वृक m. | wolf |
| धर्म m. | moral, ritual duty | सम्बद्ध adj. | bound together |
| धान्य n. | grain | हस्त m. | hand |
| ध्रुव adj. | certain, firm | अभिमुखम् | towards x's face |
| कृष्णा f. | n of Draupadī | इन्द्र m. | n of king of gods |
| बिभीषण m. | n of a demon | रावण m. | n of a demon |
| माधव m. | n of a man | सुकन्या f. | n of a girl |
| अन्योन्य mfn. | each other | हि ind. | indeed |
| हा ind. | alas! | प्रवर्तमान adj. | engaging |
| कर्ण m. | ear | | |
| नाम ind. | X नाम Y = Y with the name X. | | |

**Exercises**

1) **Translate the following sentences into English:**

१. सुमनाः सर्वदा धर्मे चेतो दध्यात् ।

२. हा कृष्णे, किं जहासि माम्?

३. यदि मां वृकाः पश्येयुस्तर्हि ध्रुवो मे मृत्युरिति चिन्तयित्वा स नरः वृकेभ्योऽबिभेत् ।
४. इन्द्राय इदं न मम, अग्नये इदं न मम इत्युक्त्वा ब्राह्मणा एतस्मिन्नग्नावन्नं जुह्वति ।
५. माधवो नाम वणिग् धान्यं मिमीते कुडवेन ।
६. यौ दम्पावन्योन्यं न जहीतस्तौ सम्बद्धावित्युच्यते ।
७. एवं हि दृश्यते लोके । जनोऽयं परकर्मणि प्रवर्तमानः स्वं कर्म जहाति । यथा तक्षकः सम्राजः कर्मणि प्रवर्तमानः स्वं कर्म जहाति ।
८. येभ्यो भगवान् शक्तिं ददाति ते कस्माद् बिभ्यति ।
९. गृहमागतस्य मुनेः पादौ जनकोऽक्षालयत् । पश्चात्स तस्मायमूनि फलान्यददात् ।
१०. ईश्वरोऽज्ञानं मे दातु ज्ञानं च मे ददातु ।
११. येभ्यः सर्वे लोका अबिभयुस्तान् राक्षसान् वने रामोऽहन् ।
१२. दरिद्रान् बिभृहि । मा धनवद्भ्यो धनं देहि ।
१३. युवामस्मभ्यं धनं दत्तमिति जना अब्रुवन् । तदा तावब्रूताम् - पूर्वमावाभ्यां युष्मभ्यं धनं दत्तम् । यूयमावाभ्यां किमदत्त? इति ।
१४. बलवते सम्राजे पुत्रं ददात्वीश्वर इत्यृत्विजो हवींष्यग्नौ जुह्वति ।
१५. यमिषुं हस्ते बिभर्षि तेनेमं राक्षसं जहि, पाहि पाहि च नोऽबलानिति जना रुदन्ति ।
१६. यतो यदाहमभाषे तदा साभिमुखं कर्णं ददाति ततस्तस्या मयि स्नेह इति वेद्मि ।
१७. यस्मै मां पितादददात् न तमहं जीवन्तं हास्यामीति सुकन्याब्रवीत् ।
१८. रामस्य भार्यां जहिहि जहीहि जहाहीति बिभीषणो रावणायाकथयत् ।
१९. इन्द्राय किं जुहुयाम ।
२०. सर्वे जना राक्षसादबिभयुर्ग्रामं चाजहुः ।
२१. यानि पात्राण्यहमक्षालयन्तानि त्वं कुत्रादधाः?

**2) Translate the following into Sanskrit:**

1. We should offer oblations to the gods in a fire.
2. Just as a father supports his sons, and a king supports his subjects (प्रजाः f.), so does God support the people.
3. Where did you put the pots I gave you?
4. He put the gold in his hand and measured it.
5. This hero does not fear death.
6. I may give a large goat to my mother-in-law.
7. Let kings give wealth to poets, sages and priests.

8. Who would trust a mother who abandons her sons?
9. Rāma held a bow in his hand and placed an arrow on the bow.
10. Elephants are not afraid of tigers. They go wherever they want to in the forest. (The object of fear, i.e. that which is feared takes the ablative case.)

**3) Write any five Sanskrit sentences of your own.**

# LESSON 28

## Fifth conjugation

Verbs in this conjugation take the affix -नु- (~ नो, न्). Thus the general structure of a verb form is **root+नु+final ending.** The following general observations may be kept in mind:

If the verb root ends in a vowel, then

a) नु is optionally reduced to न् before endings with initial व् or म्, e.g., सुनुवः / सुन्वः. Contrast आप्नुवः.

b) -हि of 2nd person sing. imperative is dropped, e.g., सुनु. Contrast आप्नुहि.

c) In weak bases, the उ of नु changes to व् before a termination beginning with a vowel, e.g., सुन्वन्ति. If the root ends in a consonant, then उ of नु changes to उव् in this environment, e.g., आप्नुवन्ति

सु "to press juice from crushed vines" (P & A)

### Active Paradigms

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| सुनोमि | सुनुवः/ सुन्वः | सुनुमः/ सुन्मः | असुनवम् | असुनुव/ असुन्व | असुनुम/ असुन्म |
| सुनोषि | सुनुथः | सुनुथ | असुनोः | असुनुतम् | असुनुत |
| सुनोति | सुनुतः | सुन्वन्ति | असुनोत् | असुनुताम् | असुन्वन् |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| सुनवानि | सुनवाव | सुनवाम | सुनुयाम् | सुनुयाव | सुनुयाम |
| सुनु | सुनुतम् | सुनुत | सुनुयाः | सुनुयातम् | सुनुयात |
| सुनोतु | सुनुताम् | सुन्वन्तु | सुनुयात् | सुनुयाताम् | सुनुयुः |

## Middle Paradigms

| | Present | | | | Imperfect | |
|---|---|---|---|---|---|---|
| सुन्वे | सुनुवहे/ सुन्वहे | सुनुमहे/ सुन्महे | | असुन्वि | असुनुवहि/ असुन्वहि | असुनुमहि/ असुन्महि |
| सुनुषे | सुन्वाथे | सुनुध्वे | | असुनुथाः | असुन्वाथाम् | असुनुध्वम् |
| सुनुते | सुन्वाते | सुन्वते | | असुनुत | असुन्वाताम् | असुन्वत |

| | Imperative | | | | Potential | |
|---|---|---|---|---|---|---|
| सुनवै | सुनवावहै | सुनवामहै | | सुन्वीय | सुन्वीवहि | सुन्वीमहि |
| सुनुष्व | सुन्वाथाम् | सुनुध्वम् | | सुन्वीथाः | सुन्वीयाथाम् | सुन्वीध्वम् |
| सुनुताम् | सुन्वाताम् | सुन्वताम् | | सुन्वीत | सुन्वीयाताम् | सुन्वीरन् |

The roots चि "to pick, collect" and श्रु "listen" are conjugated exactly like the root सु. श्रु in all these paradigms is replaced by शृ and because of the ऋ in शृ, the न् of the infix is naturally changed to ण्, e.g., शृणोति, शृणुवः / शृण्वः. The paradigms of आप् "to get, obtain" are somewhat different, since the root ends in a consonant.

### आप् "to obtain, get" (P)

| | Present | | | | Imperfect | |
|---|---|---|---|---|---|---|
| आप्नोमि | आप्नुवः | आप्नुमः | | आप्नवम् | आप्नुव | आप्नुम |
| आप्नोषि | आप्नुथः | आप्नुथ | | आप्नोः | आप्नुतम् | आप्नुत |
| आप्नोति | आप्नुतः | आप्नुवन्ति | | आप्नोत् | आप्नुताम् | आप्नुवन् |

| | Imperative | | | | Potential | |
|---|---|---|---|---|---|---|
| आप्नवानि | आप्नवाव | आप्नवाम | | आप्नुयाम् | आप्नुयाव | आप्नुयाम |
| आप्नुहि | आप्नुतम् | आप्नुत | | आप्नुयाः | आप्नुयातम् | आप्नुयात |
| आप्नोतु | आप्नुताम् | आप्नुवन्तु | | आप्नुयात् | आप्नुयाताम् | आप्नुयुः |

शक् "to be able" (P)

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| शक्नोमि | शक्नुवः | शक्नुमः | अशक्नवम् | अशक्नुव | अशक्नुम |
| शक्नोषि | शक्नुथः | शक्नुथ | अशक्नोः | अशक्नुतम् | अशक्नुत |
| शक्नोति | शक्नुतः | शक्नुवन्ति | अशक्नोत् | अशक्नुताम् | अशक्नुवन् |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| शक्नवानि | शक्नवाव | शक्नवाम | शक्नुयाम् | शक्नुयाव | शक्नुयाम |
| शक्नुहि | शक्नुतम् | शक्नुत | शक्नुयाः | शक्नुयातम् | शक्नुयात |
| शक्नोतु | शक्नुताम् | शक्नुवन्तु | शक्नुयात् | शक्नुयाताम् | शक्नुयुः |

अश् "to get, to enjoy, to pervade" (A)

| Present | | | Imperfect | | |
|---|---|---|---|---|---|
| अश्नुवे | अश्नुवहे | अश्नुमहे | आश्नुवि | आश्नुवहि | आश्नुमहि |
| अश्नुषे | अश्नुवाथे | अश्नुध्वे | आश्नुथाः | आश्नुवाथाम् | आश्नुध्वम् |
| अश्नुते | अश्नुवाते | अश्नुवते | आश्नुत | आश्नुवाताम् | आश्नुवत |

| Imperative | | | Potential | | |
|---|---|---|---|---|---|
| अश्नवै | अश्नवावहै | अश्नवामहै | अश्नुवीय | अश्नुवीवहि | अश्नुवीमहि |
| अश्नुष्व | अश्नुवाथाम् | अश्नुध्वम् | अश्नुवीथाः | अश्नुवीयाथाम् | अश्नुवीध्वम् |
| अश्नुताम् | अश्नुवाताम् | अश्नुवताम् | अश्नुवीत | अश्नुवीयाताम् | अश्नुवीरन् |

**Other forms of the fifth conjugation verbs:**
**(For present participles, see the list in Lesson 35).**

| | | gerunds -त्वा | -य | inf -तुम् | part -त | pass | future |
|---|---|---|---|---|---|---|---|
| अश् | "enjoy" | अशित्वा/ अष्ट्वा | प्राश्य | अशितुम्/ अष्टुम् | अष्ट | अश्यते | अशिष्यते/ अक्ष्यते |
| आप् | "obtain" | आप्त्वा | प्राप्य | आप्तुम् | आप्त | आप्यते | आप्स्यति |
| चि | "collect" | चित्वा | संचित्य | चेतुम् | चित | चीयते | चेष्यति/ते |
| शक् | "be able" | शक्त्वा | | शक्तुम् | शक्त | शक्यते | शक्ष्यति |
| श्रु | "to listen" | श्रुत्वा | प्रतिश्रुत्य | श्रोतुम् | श्रुत | श्रूयते | श्रोष्यति |
| सु | "press" | सुत्वा | प्रसुत्य | सोतुम् | सुत | सूयते | सोष्यति |

**Vocabulary**

| | | | |
|---|---|---|---|
| कथा (f) | story | सोम (m) | sacred juice of the Soma plant |
| सुचरित (n) | good action | पक्षिन् (m) | bird |
| दविष्ठ (a) | farthest | ध्यान (n) | meditation |

**Exercises**

1. **Write the complete conjugations of the roots चि and श्रु.**

2. **Translate the following into English:**

१. ताः कथाः कथय नो या वृद्धेभ्यस्त्वमशृणोः ।
२. अश्वं विना कथं कश्चिच्छक्नोति दविष्ठं ग्रामं गन्तुम् ।
३. हे ऋत्विजोऽद्य सोमं सुनुध्वे श्वश्च सुनुध्वम् ।
४. गुणिनः स्वेषां सुचरितानां फलं स्वर्गलोकेऽश्नुवते ।
५. सा हिमवन्तं पर्वतमारुह्य वृक्षेभ्यो भूमौ पतितानि कुसुमानि चिनुयात् ।
६. तदेकं वद निश्चित्य (having ascertained) येन श्रेयोऽहमाप्नुयाम् ।
७. यदा मेघा आकाशमश्नुवते तदा पक्षिणस्तरुषु गायन्ति (sing) ।
८. किं शक्नवाम वक्तुं ते गुणान् ।
९. किं न शृणोषि मे (obj. of श्रु in gen) । अहं तव मित्रमस्मीति मकरोऽवदत् ।
१०. नृपेण त्यक्ता जना न शक्नुवन्ति जीवितुम् । कस्तान् पातुं शक्नुयात् ।
११. सोऽसुनोत् बहून् सोमान् । तेन च पुण्येन स स्वर्गमाप्नोत् ।
१२. यतस्त्वं मां परित्यज्य तां प्रति अयास्ततो न शक्नोमि त्वां द्रष्टुम् ।
१३. यतोऽमतिमन्तो यूयमतो मे वचः शृणुत ।
१४. गुणवांस्त्वं गुणवती च ते भार्या । युवां गुणिनं पुत्रमाप्नुतमिति मुनिरब्रवीत् ।
१५. ह्यः केनापि पठ्यमानं काव्यमशृणुम । नीरसं (boring) काव्यं शृण्वन्तो वयं सभायामस्वपिम ।

3. **Translate the following into sanskrit:**

1. The wealthy who are always gathering money and do not think of virtues do not obtain happiness with that money.
2. Listen to the words of a dear friend, and do not listen to the words of wicked enemies.

3. Let that most beautiful girl obtain the most intelligent husband.
4. We hear the sound of the clouds (standing) in the sky.
5. Let me go to the garden and listen to the sweet voice of a young girl.
6. These two boys are not able to eat the fruit which their father gathered.
7. O Indra, please drink this Soma which the priest has pressed (extracted) out.
8. A man does not obtain heaven by meditation. When he offers oblations to gods, the gods are pleased. The gods say: "This is a virtuous man. Let him come to heaven and stay with us."
9. The enemies of the king killed all his horses. The king, however, obtained (got) other horses and conquered those enemies.
10. The clever wicked man said to the king, "Whatever I say is not true". The king said, "Say something". The man said, "His honor here, the king, is a fool." The king was not able to punish (दण्डयति) him.

**4. Write any five sanskrit sentences of your own.**

# LESSON 29

## Seventh conjugation

Roots of the seventh conjugation verbs end in consonants. The peculiarity of the infix of this conjugation, i.e. न, is that it does not go after the verb root, but inside the root. In strong forms, न goes after the vowel of the root, e.g., भिद् > भिनद्, and in weak forms, we have an न् in the same place, e.g., भिद् > भिन्द्. Some roots have a nasal in their citation form, e.g. हिंस्. This nasal is dropped in the paradigms under consideration. Since nothing intervenes between the root and the final endings, the interaction between the consonants of the root and those of the affixes is strong and produces some complicated sandhi results. These are similar to what happens in the second conjugation.

भिद् "to break, split, destroy" (P)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| भिनद्मि | भिन्द्वः | भिन्द्मः | अभिनदम् | अभिन्द्व | अभिन्द्म |
| भिनत्सि | भिन्त्थः | भिन्त्थ | अभिनः/त् | अभिन्तम् | अभिन्त |
| भिनत्ति | भिन्तः | भिन्दन्ति | अभिनत् | अभिन्ताम् | अभिन्दन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| भिनदानि | भिनदाव | भिनदाम | भिन्द्याम् | भिन्द्याव | भिन्द्याम |
| भिन्द्धि | भिन्तम् | भिन्त | भिन्द्याः | भिन्द्यातम् | भिन्द्यात |
| भिनत्तु | भिन्ताम् | भिन्दन्तु | भिन्द्यात् | भिन्द्याताम् | भिन्द्युः |

रुध् "to obstruct, prevent" (P & A)

### Active Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| रुणध्मि | रुन्ध्वः | रुन्ध्मः | अरुणधम् | अरुन्ध्व | अरुन्ध्म |
| रुणत्सि | रुन्द्धः | रुन्द्ध | अरुणः/त् | अरुन्द्धम् | अरुन्द्ध |
| रुणद्धि | रुन्द्धः | रुन्धन्ति | अरुणत् | अरुन्द्धाम् | अरुन्धन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| रुणधानि | रुणधाव | रुणधाम | रुन्ध्याम् | रुन्ध्याव | रुन्ध्याम |
| रुन्द्धि | रुन्द्धम् | रुन्द्ध | रुन्ध्याः | रुन्ध्यातम् | रुन्ध्यात |
| रुणद्धु | रुन्द्धाम् | रुन्धन्तु | रुन्ध्यात् | रुन्ध्याताम् | रुन्ध्युः |

### Middle Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| रुन्धे | रुन्ध्वहे | रुन्ध्महे | अरुन्धि | अरुन्ध्वहि | अरुन्ध्महि |
| रुन्त्से | रुन्धाथे | रुन्द्ध्वे | अरुन्द्धाः | अरुन्धाथाम् | अरुन्द्ध्वम् |
| रुन्द्धे | रुन्धाते | रुन्धते | अरुन्द्ध | अरुन्धाताम् | अरुन्धत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| रुणधै | रुणधावहै | रुणधामहै | रुन्धीय | रुन्धीवहि | रुन्धीमहि |
| रुन्त्स्व | रुन्धाथाम् | रुन्द्ध्वम् | रुन्धीथाः | रुन्धीयाथाम् | रुन्धीध्वम् |
| रुन्द्धाम् | रुन्धाताम् | रुन्धताम् | रुन्धीत | रुन्धीयाताम् | रुन्धीरन् |

## युज् "to join" (P & A)

### Active Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| युनज्मि | युञ्ज्वः | युञ्ज्मः | अयुनजम् | अयुञ्ज्व | अयुञ्ज्म |
| युनक्षि | युङ्क्थः | युङ्क्थ | अयुनक् | अयुङ्क्तम् | अयुङ्क्त |
| युनक्ति | युङ्क्तः | युञ्जन्ति | अयुनक् | अयुङ्क्ताम् | अयुञ्जन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| युनजानि | युनजाव | युनजाम | युञ्ज्याम् | युञ्ज्याव | युञ्ज्याम |
| युङ्ग्धि | युङ्क्तम् | युङ्क्त | युञ्ज्याः | युञ्ज्यातम् | युञ्ज्यात |
| युनक्तु | युङ्क्ताम् | युञ्जन्तु | युञ्ज्यात् | युञ्ज्याताम् | युञ्ज्युः |

### Middle Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| युञ्जे | युञ्ज्वहे | युञ्ज्महे | अयुञ्जि | अयुञ्ज्वहि | अयुञ्ज्महि |
| युङ्क्षे | युञ्जाथे | युङ्ग्ध्वे | अयुङ्क्थाः | अयुञ्जाथाम् | अयुङ्ग्ध्वम् |
| युङ्क्ते | युञ्जाते | युञ्जते | अयुङ्क्त | अयुञ्जाताम् | अयुञ्जत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| युनजै | युनजावहै | युनजामहै | युञ्जीय | युञ्जीवहि | युञ्जीमहि |
| युङ्क्ष्व | युञ्जाथाम् | युङ्ग्ध्वम् | युञ्जीथाः | युञ्जीयाथाम् | युञ्जीध्वम् |
| युङ्क्ताम् | युञ्जाताम् | युञ्जताम् | युञ्जीत | युञ्जीयाताम् | युञ्जीरन् |

पिष् "to grind, crush, destroy" (P)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| पिनष्मि | पिंष्वः | पिंष्मः | अपिनषम् | अपिंष्व | अपिंष्म |
| पिनक्षि | पिंष्ठः | पिंष्ठ | अपिनट् | अपिंष्टम् | अपिंष्ट |
| पिनष्टि | पिंष्टः | पिंषन्ति | अपिनट् | अपिंष्टाम् | अपिंषन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| पिनषाणि | पिनषाव | पिनषाम | पिंष्याम् | पिंष्याव | पिंष्याम |
| पिण्ड्ढि | पिंष्टम् | पिंष्ट | पिंष्याः | पिंष्यातम् | पिंष्यात |
| पिनष्टु | पिंष्टाम् | पिंषन्तु | पिंष्यात् | पिंष्याताम् | पिंष्युः |

हिंस् "to kill, injure" (P)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| हिनस्मि | हिंस्वः | हिंस्मः | अहिनसम् | अहिंस्व | अहिंस्म |
| हिनस्सि | हिंस्थः | हिंस्थ | अहिनः/त् | अहिंस्तम् | अहिंस्त |
| हिनस्ति | हिंस्तः | हिंसन्ति | अहिनत् | अहिंस्ताम् | अहिंसन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| हिनसानि | हिनसाव | हिनसाम | हिंस्याम् | हिंस्याव | हिंस्याम |
| हिन्धि | हिंस्तम् | हिंस्त | हिंस्याः | हिंस्यातम् | हिंस्यात |
| हिनस्तु | हिंस्ताम् | हिंसन्तु | हिंस्यात् | हिंस्याताम् | हिंस्युः |

रिच् "to evacuate, to empty" (P & A)

**Active Paradigms**

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| रिणच्मि | रिञ्च्वः | रिञ्च्मः | अरिणचम् | अरिञ्च्व | अरिञ्च्म |
| रिणक्षि | रिङ्क्थः | रिङ्क्थ | अरिणक् | अरिङ्क्तम् | अरिङ्क्त |
| रिणक्ति | रिङ्क्तः | रिञ्चन्ति | अरिणक् | अरिङ्क्ताम् | अरिञ्चन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| रिणचानि | रिणचाव | रिणचाम | रिञ्च्याम् | रिञ्च्याव | रिञ्च्याम |
| रिङ्ग्धि | रिङ्क्तम् | रिङ्क्त | रिञ्च्याः | रिञ्च्यातम् | रिञ्च्यात |
| रिणक्तु | रिङ्क्ताम् | रिञ्चन्तु | रिञ्च्यात् | रिञ्च्याताम् | रिञ्च्युः |

## Middle Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| रिञ्चे | रिञ्च्वहे | रिञ्च्महे | अरिञ्चि | अरिञ्च्वहि | अरिञ्च्महि |
| रिङ्क्षे | रिञ्चाथे | रिङ्ग्ध्वे | अरिङ्क्थाः | अरिञ्चाथाम् | अरिङ्ग्ध्वम् |
| रिङ्क्ते | रिञ्चाते | रिञ्चते | अरिङ्क्त | अरिञ्चाताम् | अरिञ्चत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| रिणचै | रिणचावहै | रिणचामहै | रिञ्चीय | रिञ्चीवहि | रिञ्चीमहि |
| रिङ्क्ष्व | रिञ्चाथाम् | रिङ्ग्ध्वम् | रिञ्चीथाः | रिञ्चीयाथाम् | रिञ्चीध्वम् |
| रिङ्क्ताम् | रिञ्चाताम् | रिञ्चताम् | रिञ्चीत | रिञ्चीयाताम् | रिञ्चीरन् |

## छिद् "to cut" (P & A)

## Active Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| छिनद्मि | छिन्द्वः | छिन्द्मः | अच्छिनदम् | अच्छिन्द्व | अच्छिन्द्म |
| छिनत्सि | छिन्त्थः | छिन्त्थ | अच्छिनः/त् | अच्छिन्त्तम् | अच्छिन्त्त |
| छिनत्ति | छिन्त्तः | छिन्दन्ति | अच्छिनत् | अच्छिन्त्ताम् | अच्छिन्दन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| छिनदानि | छिनदाव | छिनदाम | छिन्द्याम् | छिन्द्याव | छिन्द्याम |
| छिन्द्धि | छिन्त्तम् | छिन्त्त | छिन्द्याः | छिन्द्यातम् | छिन्द्यात |
| छिनत्तु | छिन्त्ताम् | छिन्दन्तु | छिन्द्यात् | छिन्द्याताम् | छिन्द्युः |

## Middle Paradigms

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| छिन्दे | छिन्द्वहे | छिन्द्महे | अच्छिन्दि | अच्छिन्द्वहि | अच्छिन्द्महि |
| छिन्त्से | छिन्दाथे | छिन्द्ध्वे | अच्छिन्त्थाः | अच्छिन्दाथाम् | अच्छिन्द्ध्वम् |
| छिन्त्ते | छिन्दाते | छिन्दते | अच्छिन्त्त | अच्छिन्दाताम् | अच्छिन्दत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| छिनदै | छिनदावहै | छिनदामहै | छिन्दीय | छिन्दीवहि | छिन्दीमहि |
| छिन्त्स्व | छिन्दाथाम् | छिन्द्ध्वम् | छिन्दीथाः | छिन्दीयाथाम् | छिन्दीध्वम् |
| छिन्ताम् | छिन्दाथाम् | छिन्दताम् | छिन्दीत | छिन्दीयाताम् | छिन्दीरन् |

### भुज् "to protect" (P)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| भुनज्मि | भुञ्ज्वः | भुञ्ज्मः | अभुनजम् | अभुञ्ज्व | अभुञ्ज्म |
| भुनक्षि | भुङ्क्थः | भुङ्क्थ | अभुनक् | अभुङ्क्तम् | अभुङ्क्त |
| भुनक्ति | भुङ्क्तः | भुञ्जन्ति | अभुनक् | अभुङ्क्ताम् | अभुञ्जन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| भुनजानि | भुनजावः | भुनजामः | भुञ्ज्याम् | भुञ्ज्याव | भुञ्ज्याम |
| भुङ्ग्धि | भुङ्क्तम् | भुङ्क्त | भुञ्ज्याः | भुञ्ज्यातम् | भुञ्ज्यात |
| भुनक्तु | भुङ्क्ताम् | भुञ्जन्तु | भुञ्ज्यात् | भुञ्ज्याताम् | भुञ्ज्युः |

### भुज् "to eat, to enjoy" (A)

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| भुञ्जे | भुञ्ज्वहे | भुञ्ज्महे | अभुञ्जि | अभुञ्ज्वहि | अभुञ्ज्महि |
| भुङ्क्षे | भुञ्जाथे | भुङ्ग्ध्वे | अभुङ्क्थाः | अभुञ्जाथाम् | अभुङ्ग्ध्वम् |
| भुङ्क्ते | भुञ्जाते | भुञ्जते | अभुङ्क्त | अभुञ्जाताम् | अभुञ्जत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| भुनजै | भुनजावहै | भुनजामहै | भुञ्जीय | भुञ्जीवहि | भुञ्जीमहि |
| भुङ्क्ष्व | भुञ्जाथाम् | भुङ्ग्ध्वम् | भुञ्जीथाः | भुञ्जीयाथाम् | भुञ्जीध्वम् |
| भुङ्क्ताम् | भुञ्जाताम् | भुञ्जताम् | भुञ्जीत | भुञ्जीयाताम् | भुञ्जीरन् |

The root भञ्ज् "to break" (P) is declined very much like भुज् (P) above, e.g., भनक्ति / अभनक् / भनक्तु / भञ्ज्यात्.

**Other forms of the seventh conjugation verbs:**

**(For present participles, see the list in Lesson 35).**

| | | **gerunds** | | **inf** | **part.** | **passive** | **future** |
|---|---|---|---|---|---|---|---|
| | | -त्वा | -य | -तुम् | -त | | |
| छिद् | cut | छित्त्वा | विच्छिद्य | छेत्तुम् | छिन्न | छिद्यते | छेत्स्यति |
| पिष् | grind | पिष्ट्वा | संपिष्य | पेष्टुम् | पिष्ट | पिष्यते | पेक्ष्यति |
| भञ्ज् | break | भक्त्वा/ङ्क्त्वा | विभज्य | भङ्क्तुम् | भग्न | भज्यते | भङ्क्ष्यते |
| भिद् | break | भित्त्वा | निर्भिद्य | भेत्तुम् | भिन्न | भिद्यते | भेत्स्यति/ते |
| भुज् | protect enjoy | भुक्त्वा | उपभुज्य | भोक्तुम् | भुक्त | भुज्यते | भोक्ष्यति/ते |
| युज् | join | युक्त्वा | प्रयुज्य | योक्तुम् | युक्त | युज्यते | योक्ष्यति/ते |
| रिच् | empty | रिक्त्वा | अतिरिच्य | रेक्तुम् | रिक्त | रिच्यते | रेक्ष्यति/ते |
| रुध् | obstruct | रुद्ध्वा | संरुध्य | रोद्धुम् | रुद्ध | रुध्यते | रोत्स्यति/ते |
| हिंस् | kill | हिंसित्वा | विहिंस्य | हिंसितुम् | हिंसित | हिंस्यते | हिंसिष्यति |

**Vocabulary**

| | | | |
|---|---|---|---|
| हृदय (n) | heart | धुर् (f) | yoke of a cart |
| सिंह (m) | lion | शिला (f) | stone, rock |
| वज्र (n) | thunderbolt | राज्य (n) | kingship, kingdom |
| पावक (m) | fire | देवदत्त (m) | name of a person |
| कांस्यपात्री | f. bronze plate | पाणि (m) | hand |
| ओदन (m) | rice | अमृत (n) | ambrosia |
| पीन (a) | fat | शाखा (f) | branch of a tree |
| नरक (m) | hell, netherworld | शिखर (n) | peak of a mountain |
| विद्युत् (f) | lightning | घट (m) | earthen pot |
| प्रसिद्ध (a) | famous | पट (m) | cloth, clothes |

**Exercises**

**1. Translate the following into English:**

१. नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः ।
२. स नरो धेनूर्धूर्भिर्युनक्ति ।
३. देवदत्तः कांस्यपात्र्यां पाणिना ओदनं भुङ्क्ते ।
४. अरयो धनुर्भिर्द्वारमरुन्धन् ।
५. बली वीरः शत्रोः शीर्षमभिनत् ।

६. नेमां बालां वने हिंस्युः सिंहाः ।
७. तुभ्यं कथाः कथयित्वा तव दुःखं छिन्द्यामहमिति स पण्डितो नृपायाब्रवीत् ।
८. तस्मात्त्वमुत्तिष्ठ यशो लभस्व जित्वा शत्रून् भुङ्क्ष्व राज्यम् ।
९. पिनष्मि धान्यमहं शिलया ।
१०. नदीं शिलाः रुन्ध्युः ।
११. यदा चन्द्रो भाति तदा रात्रिस्तमसा रिच्यते ।
१२. शाखाश्छिन्द्धि गा दुग्धि धान्यं पिण्ड्ढीति शिष्यो गुरुणोक्तः ।
१३. हिमवतः पर्वतस्य शिखराणि वायुं रुन्धन्ति ।
१४. पुण्यवन्तः स्वर्गेऽमृतं भुञ्जते, पापवन्तस्तु नरकेऽग्नौ पतन्ति ।
१५. पीनो देवदत्तो दिवा न भुङ्क्ते । तर्हि स कथं पीनः । स रात्रौ भुङ्क्ते इत्यहं मन्ये ।

**2. Translate the following into Sanskrit:**

1. I would cut the tree if my father would not prevent me.
2. Let the king's heroes split the hearts of the enemies with their arrows.
3. Those who injure their friends do not enjoy happiness in life.
4. The thunderbolt is Indra's weapon. With his thunderbolt, Indra destroys the armies of the demons. Just as the lightning splits the clouds, so does Indra's thunderbolt split the demons.
5. We grind grain with our hands. We might cook that grain.
6. Rāvaṇa said: "I may be able to block Rāma's arrows with my bare hands. Rāma is just a man. I am a powerful demon. I may even eat that little man."
7. In the forest, some beasts injure others. Lions injure animals. But they don't hate them. If the lions would not kill animals, what would they eat?
8. One may break earthen pots. One may tear clothes. One may even ride an ass. By whichever means, one should become a famous person.
9. When the great wind blew, it broke many trees and killed many people.

10. The priests ate rice and milk. When the priests ate, everyone in the house was happy.

3. **Write any five Sanskrit sentences of your own.**

# LESSON 30

## Eighth conjugation

In this conjugation, the infix -उ- comes after the root and before the final termination. This -उ- is optionally lost before terminations beginning in -व and -म, e.g., तनुवः/तन्वः. Also the affix -हि of the 2nd pers. sing. imperative is dropped, e.g. तनु. In general, the forms of this conjugation look like the forms of the fifth conjugation verbs with the infix -नु. The distribution of 0/उ/ओ is the same as that of न्/नु/नो in the fifth conjugation.

तन् "to stretch, extend, perform" (P & A)

**Active Paradigms**

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| तनोमि | तनुवः/न्वः | तनुमः/तन्मः | अतनवम् | अतनुव/न्व | अतनुम/न्म |
| तनोषि | तनुथः | तनुथ | अतनोः | अतनुतम् | अतनुत |
| तनोति | तनुतः | तन्वन्ति | अतनोत् | अतनुताम् | अतन्वन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| तनवानि | तनवाव | तनवाम | तनुयाम् | तनुयाव | तनुयाम |
| तनु | तनुतम् | तनुत | तनुयाः | तनुयातम् | तनुयात |
| तनोतु | तनुताम् | तन्वन्तु | तनुयात् | तनुयाताम् | तनुयुः |

**Middle Paradigms**

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| तन्वे | तनुवहे/न्वहे | तनुमहे/न्महे | अतन्वि | अतनुवहि/न्वहि | अतनुमहि/न्महि |
| तनुषे | तन्वाथे | तनुध्वे | अतनुथाः | अतन्वाथाम् | अतनुध्वम् |
| तनुते | तन्वाते | तन्वते | अतनुत | अतन्वाताम् | अतन्वत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| तनवै | तनवावहै | तनवामहै | तन्वीय | तन्वीवहि | तन्वीमहि |
| तनुष्व | तन्वाथाम् | तनुध्वम् | तन्वीथाः | तन्वीयाथाम् | तन्वीध्वम् |
| तनुताम् | तन्वाताम् | तन्वताम् | तन्वीत | तन्वीयाताम् | तन्वीरन् |

मन् "to think, consider" (A)

| | Present | | Imperfect | | |
|---|---|---|---|---|---|
| मन्वे | मनुवहे/न्वहे | मनुमहे/न्महे | अमन्वि | अमनुवहि/न्वहि | अमनुमहि/न्महि |
| मनुषे | मन्वाथे | मनुध्वे | अमनुथाः | अमन्वाथाम् | अमनुध्वम् |
| मनुते | मन्वाते | मन्वते | अमनुत | अमन्वाताम् | अमन्वत |

| | Imperative | | Potential | | |
|---|---|---|---|---|---|
| मनवै | मनवावहै | मनवामहै | मन्वीय | मन्वीवहि | मन्वीमहि |
| मनुष्व | मन्वाथाम् | मनुध्वम् | मन्वीथाः | मन्वीयाथाम् | मन्वीध्वम् |
| मनुताम् | मन्वाताम् | मन्वताम् | मन्वीत | मन्वीयाताम् | मन्वीरन् |

कृ "to do, make" (P & A) (Irregular)

**Active Paradigms**

| | Present | | Imperfect | | |
|---|---|---|---|---|---|
| करोमि | कुर्वः | कुर्मः | अकरवम् | अकुर्व | अकुर्म |
| करोषि | कुरुथः | कुरुथ | अकरोः | अकुरुतम् | अकुरुत |
| करोति | कुरुतः | कुर्वन्ति | अकरोत् | अकुरुताम् | अकुर्वन् |

| | Imperative | | Potential | | |
|---|---|---|---|---|---|
| करवाणि | करवाव | करवाम | कुर्याम् | कुर्याव | कुर्याम |
| कुरु | कुरुतम् | कुरुत | कुर्याः | कुर्यातम् | कुर्यात |
| करोतु | कुरुताम् | कुर्वन्तु | कुर्यात् | कुर्याताम् | कुर्युः |

**Middle Paradigms**

| | Present | | Imperfect | | |
|---|---|---|---|---|---|
| कुर्वे | कुर्वहे | कुर्महे | अकुर्वि | अकुर्वहि | अकुर्महि |
| कुरुषे | कुर्वाथे | कुरुध्वे | अकुरुथाः | अकुर्वाथाम् | अकुरुध्वम् |
| कुरुते | कुर्वाते | कुर्वते | अकुरुत | अकुर्वातामं | अकुर्वत |

| | Imperative | | Potential | | |
|---|---|---|---|---|---|
| करवै | करवावहै | करवामहै | कुर्वीय | कुर्वीवहि | कुर्वीमहि |
| कुरुष्व | कुर्वाथाम् | कुरुध्वम् | कुर्वीथाः | कुर्वीयाथाम् | कुर्वीध्वम् |
| कुरुताम् | कुर्वाताम् | कुर्वताम् | कुर्वीत | कुर्वीयाताम् | कुर्वीरन् |

**Other forms of the eighth conjugation verbs:**

**(For present participles, see the list in Lesson 35).**

| | gerunds -त्वा | -य | inf -तुम् | part. -त | passive | future |
|---|---|---|---|---|---|---|
| तन् | तत्वा/ तनित्वा | वितत्य | तनितुम् | तत | तन्यते/ तायते | तनिष्यति/ते |
| कृ | कृत्वा | उपकृत्य | कर्तुम् | कृत | क्रियते | करिष्यति/ते |
| मन् | मत्वा/ मनित्वा | संमत्य | मनितुम् | मत | मन्यते | मनिष्यते/ मंस्यति |

**Vocabulary**

| | |
|---|---|
| पूर्व (a) | former, preceding |
| अमुत्र (ind) | in the next world |
| दोष (m) | fault |
| कामम् (adv) | most certainly |
| ओदन (m) | rice |
| शतमन्यु (m) | Epithet of Indra |
| वि+√लिख् | (6P) write |
| उभ (prn) | both |
| अलम् + कृ | (8PA) to decorate |
| पावन (a) | purifying, pure |
| यज्ञ (m) | sacrifice |
| प्रकाश (m) | light |
| अज्ञानतमस् (n) | darkness of ignorance |
| धीवर (m) | fisherman |
| साहाय्य (m) | assistance |
| गति (f) | future course |
| येन केन प्रकारेण | by whichever way |
| स्व (a) | one's own |
| जीव (m) | life |
| वयस् (n) | age |
| शत (n) | one hundred |
| सूत्र (n) | thread |
| जाल (n) | net |
| प्रति + भा | (2P) to occur, seem, fit to appear as in a flash of insight |
| रथ (m) | chariot |
| प्रियम् + कृ | (8 PA) to do a favor |
| प्रत्यहम् (ind) | everyday |
| ज्ञानदीप (m) | lamp of knowledge |
| कीर्ति (f) | fame |
| वोढुम् | inf. वह् to carry |
| वृत्ति (f) | conduct |
| चिन्ता (f) | worry |
| यावज्जीवेन (ind) | as long as alive |
| तेजस् (n) | luster, brilliance |

**Exercises**

1) **Translate the following into English:**

१. पूर्वे वयसि तत्कुर्याद्येन वृद्धः सुखं वसेत् ।
यावज्जीवेन तत्कुर्याद्येनामुत्र सुखं वसेत् ॥

२. यस्मादचिन्तयित्वा त्वं पितरमहिनत्तस्मान्मे नैव दोषो मतस्तव ।
३. हे प्रिये, यदि त्वं प्रत्यहं रोदिष्यसि तर्हि काममहं त्वां त्यक्ष्यामि ।
४. ओदनं भोक्ष्ये इति त्वं मनुषे । किन्तु भुक्तः सोऽतिथिभिः । अधुना किं भोक्ष्यसे?
५. सूर्यः स्वतेजसा जगति प्रकाशं तनोति । तथा सुपुरुषो जगति ज्ञानदीपेन अज्ञानतमो भेत्स्यामीति मनुते ।
६. सर्वासु दिक्षु रामः शत्रून् पराजित्य महद्यशस्तनोति । यथा चन्द्रमसस्तेजः सर्वत्र प्रसरति, तथा रामस्य कीर्तिरपि ।
७. यथाकाशो ज्योतिर्भिरलङ्क्रियते तथा जनः शरीरं भूषणैश्चेतो ज्ञानेन हृदयं च गुणैरलङ्करोतु ।
८. पापं कृत्वा पिशुनो मनुते न कश्चिद्वेत्ति मामिति ।
९. गङ्गानद्यास्तीरमधितिष्ठन्तो धीवराः सूत्रशतैर्जालानि तन्वन्ति ।
१०. वाल्मीकिर्नाम कविर्नारदं मुनिमब्रवीत् । काव्यमहं कर्तुमिच्छामीति । तच्छ्रुत्वा नारदः प्रत्यवदत् - यत्ते प्रतिभाति तत्कुरुष्वेति ।
११. जनोऽयं न शक्नोति भारं वोढुमतः कुर्वस्य साहाय्यम् ।
१२. ये दुर्वृत्तिं कुर्वन्ति ते दुर्गतिं प्राप्नुवन्ति । ये सुवृत्तिं कुर्वन्ति ते सुगतिं प्राप्नुवन्ति ।
१३. वाल्मीकिः कविः रामायणकाव्यं विलिख्य रामस्य यशः सर्वासु दिक्षु प्रतनोति ।
१४. त्वया शत्रून् पराजित्य लब्धं महाधनं दरिद्रेभ्यो दातुं शक्येत । इति गुरुर्नृपायाब्रवीत् । गुरोस्तद्वचनं श्रुत्वा स नृपो ब्रूते - हे गुरो महाबुद्धे, यद्यहं मम सर्वं धनं दरिद्रेभ्यो दद्याम्, तर्ह्यहमेव दरिद्रो भवेयमिति । तदा स गुरुर्ब्रवीति - हे नृप, दरिद्रेभ्यो धनं दत्त्वा यत्पुण्यं त्वं लप्स्यसे, तेन पुण्येन त्वं पुनर्महाधनं जेष्यसि । मा चिन्तां कुर्विति ।
१५. सुकविः सुकाव्येन सुयशस्तनोति । कुकविः कुकाव्येन कुयशस्तनोति । अपि तावुभौ यशस्तनुतः? येन केन प्रकारेण कुकविरपि यशो लब्धुमिच्छति ।

**2) Translate the following into Sanskrit:**

1. "Will you go by the chariot? No, you will not. Your father has gone with that chariot," thus I say.
2. With the fame of the son, the father's fame is also spread over the world.
3. Decorate your mind with vitrues. A virtuous man is like a lamp (दीपः) in the night.
4. The priest performed a sacrifice on the bank of the river.

5. I would do it, if he would ask me.
6. What favor should I do for you? O King. You have everything that a man would wish.
7. She will never think of a man other than you.
8. Those who do not have a son go to hell (नरक). Thus say the sacred texts. I think that is wrong (असत्य n.). I only had daughters, and yet I am in heaven.
9. He who offers help (साहाय्यं कृ) to others (gen.) is a good man.
10. Some do bad things (अप + कृ) and some do good things (उप + कृ). What will you do?

**3) Write any five Sanskrit sentences of your own.**

# LESSON 31

**Ninth conjugation**

In this conjugation, we have the following special features:

a) The infix -ना- in the strong forms and -नी- in weak forms, e.g., जानामि, जानीवः.

b) In weak bases, the infix is reduced to न् before terminations with initial vowels, e.g., जानन्ति.

c) If the root ends in a consonant, then the 2nd imperative sing. active affix is -आन, and there is no infix in this form, e.g. बधान from बध् + आन.

d) The radical vowel does not take guṇa, e.g., धुनाति.

e) The penultimate nasal of the roots is dropped in the paradigms of the present, imperfect, imperative and potential, e.g. मन्थ् > मथ् > मथ्नाति.

क्री "to buy" (P & A)

**Active Paradigms**

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| क्रीणामि | क्रीणीवः | क्रीणीमः | अक्रीणाम् | अक्रीणीव | अक्रीणीम |
| क्रीणासि | क्रीणीथः | क्रीणीथ | अक्रीणाः | अक्रीणीतम् | अक्रीणीत |
| क्रीणाति | क्रीणीतः | क्रीणन्ति | अक्रीणात् | अक्रीणीताम् | अक्रीणन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| क्रीणानि | क्रीणाव | क्रीणाम | क्रीणीयाम् | क्रीणीयाव | क्रीणीयाम |
| क्रीणीहि | क्रीणीतम् | क्रीणीत | क्रीणीयाः | क्रीणीयातम् | क्रीणीयात |
| क्रीणातु | क्रीणीताम् | क्रीणन्तु | क्रीणीयात् | क्रीणीयाताम् | क्रीणीयुः |

**Middle Paradigms**

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| क्रीणे | क्रीणीवहे | क्रीणीमहे | अक्रीणि | अक्रीणीवहि | अक्रीणीमहि |
| क्रीणीषे | क्रीणाथे | क्रीणीध्वे | अक्रीणीथाः | अक्रीणाथाम् | अक्रीणीध्वम् |
| क्रीणीते | क्रीणाते | क्रीणते | अक्रीणीत | अक्रीणाताम् | अक्रीणत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| क्रीणै | क्रीणावहै | क्रीणामहै | क्रीणीय | क्रीणीवहि | क्रीणीमहि |
| क्रीणीष्व | क्रीणाथाम् | क्रीणीध्वम् | क्रीणीथाः | क्रीणीयाथाम् | क्रीणीध्वम् |
| क्रीणीताम् | क्रीणाताम् | क्रीणताम् | क्रीणीत | क्रीणीयाताम् | क्रीणीरन् |

The root प्री "to please, love" (P & A) is conjugated exactly like the root क्री above.

पू "to purify, sanctify" (P & A)

**Active Paradigms**

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| पुनामि | पुनीवः | पुनीमः | अपुनाम् | अपुनीव | अपुनीम |
| पुनासि | पुनीथः | पुनीथ | अपुनाः | अपुनीतम् | अपुनीत |
| पुनाति | पुनीतः | पुनन्ति | अपुनात् | अपुनीताम् | अपुनन् |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
| पुनानि | पुनाव | पुनाम | पुनीयाम् | पुनीयाव | पुनीयाम |
| पुनीहि | पुनीतम् | पुनीत | पुनीयाः | पुनीयातम् | पुनीयात |
| पुनातु | पुनीताम् | पुनन्तु | पुनीयात् | पुनीयाताम् | पुनीयुः |

**Middle Paradigms**

| | Present | | | Imperfect | |
|---|---|---|---|---|---|
| पुने | पुनीवहे | पुनीमहे | अपुनि | अपुनीवहि | अपुनीमहि |
| पुनीषे | पुनाथे | पुनीध्वे | अपुनीथाः | अपुनाथाम् | अपुनीध्वम् |
| पुनीते | पुनाते | पुनते | अपुनीत | अपुनाताम् | अपुनत |

| | Imperative | | | Potential | |
|---|---|---|---|---|---|
१६. अहं पथिकं जलं पाययामि ।
१७. गुरुः शिष्यान् वेदमध्यापयति बोधयति च ।

3) **Translate the following into Sanskrit:**

1. We made him know his duty, and sent him home.
2. He caused his servants to bring fruit from the town.
3. I caused them to stand around the king, and made them salute him.

4. The horses were caused by the master to be taken to the village by the servant.
5. The leader did not know the way and made us go from village to village.
6. Rāma made Lakṣmaṇa cut a tree.
7. The evil man (पिशुन) made the king leave the palace.
8. The food was caused to be cooked by Devadatta through Yajñadatta.
9. The teachers made the students recite the Vedas. (वेद m.)
10. The husband was made to eat bad food (कदन्न, n) by the wife.

4) **Write any five Sanskrit sentences of your own.**

# LESSON 40

## Desiderative Verbs

To express a meaning such as "x wants to go", Sanskrit has at least two possible ways. The first way is to use a periphrastic expression such as गन्तुम् इच्छति, an infinitive "to go" with a verb of desire. The other way is to use a morphological desiderative, e.g. जिगमिषति. Such a morphological desiderative may be derived from a root of any of the ten conjugations, and theoretically it may be conjugated in all tenses and moods. Generally, the desideratives for परस्मैपद and आत्मनेपद verbs retain the same classification. The two noteworthy features of desideratives are a) reduplication of the verb, and b) the affix -स (variants, -ष, -इष). For example:

कृ "to do"

| | Active | Middle | Passive |
|---|---|---|---|
| Present | चिकीर्षति | चिकीर्षते | चिकीर्ष्यते |
| Imperfect | अचिकीर्षत् | अचिकीर्षत | अचिकीर्ष्यत |
| Perfect | चिकीर्षामास | चिकीर्षामासे | चिकीर्षामासे |
| Aorist | अचिकीर्षीत् | अचिकीर्षिष्ट | अचिकीर्षि |
| Imperative | चिकीर्षतु | चिकीर्षताम् | चिकीर्ष्यताम् |
| Optative | चिकीर्षेत् | चिकीर्षेत | चिकीर्ष्येत |
| स्य Future | चिकीर्षिष्यति | चिकीर्षिष्यते | चिकीर्षिष्यते |
| तास् Future | चिकीर्षिता | चिकीर्षिता | चिकीर्षिता |
| Conditional | अचिकीर्षिष्यत् | अचिकीर्षिष्यत | अचिकीर्षिष्यत |
| Benedictive | चिकीर्ष्यात् | चिकीर्षिषीष्ट | चिकीर्षिषीष्ट |

The only common forms in Sanskrit literature are the active forms of the present and imperfect, e.g. जिगमिषति and अजिगमिषत्. Present and Past participles, e.g. चिकीर्षन्त्, चिकीर्षमाण and चिकीर्षित (< कृ), and feminine action nouns, e.g. जिगमिषा, चिकीर्षा "desire to *x*", and agentive adjectives, e.g. जिगमिषुः, चिकीर्षुः "desirous of *x*-ing" are also common in literature. Examples:

| Root | Desiderative Base | Agentive Adj | Action Noun |
|---|---|---|---|
| भुज् | बुभुक्ष् | बुभुक्षुः | बुभुक्षा |
| to eat | to want to eat | hungry | hunger |
| ज्ञा | जिज्ञास् | जिज्ञासुः | जिज्ञासा |
| to know | to want to know | inquisitive | desire to know |
| जि | जिगीष् | जिगीषुः | जिगीषा |
| to conquer | to want to con. | wanting to con. | desire to con. |
| पा | पिपास् | पिपासुः | पिपासा |
| to drink | to want to drink | thirsty | thirst |
| मुच् | मुमुक्ष् | मुमुक्षुः | मुमुक्षा |
| to release | to want release | wanting release | desire for release |
| मृ | मुमूर्ष् | मुमूर्षुः | मुमूर्षा |
| to die | to want to die | wanting to die | desire to die |

The desiderative form can be used to express only one's own desire to do something. It cannot be used to express one's desire that someone else do something. The same constraint holds on the use of a construction such as गन्तुम् इच्छति "X wants to go". It cannot be used to mean "X wants someone else to go".

**Listing of desiderative forms for frequently used verbs:**

अद् (2P, A) · जिघत्सति / ते
अर्थ् (10A) · अर्तिथयिषते
अश् (9P) · अशिशिषति
आप् (5P) · ईप्सति
इ (2P) · जिगमिषति
इष् (6P) · एषिषिषति
ईक्ष् (1A) · ईचिक्षिषते
ईश् (2A) · ईशिशिषते

| | | |
|---|---|---|
| कथ् | (10P, A) | चिकथयिषति / ते |
| कम्प् | (1A) | चिकम्पिषते |
| काङ्क्ष् | (1P) | चिकाङ्क्षिषति |
| कृ | (8P, A) | चिकीर्षति / ते |
| कृत् | (6P) | चिकर्तिषति / चिकृत्सति |
| कृष् | (1P, 6P) | चिकृक्षति |
| क्रम् | (1P, 4P) | चिक्रमिषति |
| क्री | (9P, A) | चिक्रीषति / ते |
| क्षम् | (1A) | चिक्षमिषते / चिक्षंसते |
| क्षल् | (10P, A) | चिक्षालयिषति / ते |
| क्षिप् | (6P, A) | चिक्षिप्सति / ते |
| क्षुभ् | (9P) | चुक्षोभिषति |
| खन् | (1P, A) | चिखनिषति / ते |
| खाद् | (1P) | चिखादिषति |
| गण् | (10P, A) | जिगणयिषति / ते |
| गम् | (1P) | जिगमिषति |
| गाह् | (1A) | जिगाहिषते / जिघाक्षते |
| गै | (1P) | जिगासति |
| ग्रन्थ् | (9P) | जिग्रन्थिषति |
| ग्रह् | (9P, A) | जिघृक्षति / ते |
| घुष् | (10P, A) | जुघोषयिषति / ते |
| चर् | (1P) | चिचरिषति |
| चल् | (1P) | चिचलिषति |
| चिन्त् | (10P, A) | चिचिन्तयिषति / ते |
| चुर् | (10P, A) | चुचोरयिषति / ते |
| छद् | (10P, A) | चिच्छादयिषति / ते |
| छिद् | (7P, A) | चिच्छित्सति / ते |
| जन् | (4A) | जिजनिषते |
| जागृ | (2P) | जिजागरिषति |
| जि | (1P) | जिगीषति |
| जीव् | (1P) | जिजीविषति |
| ज्ञा | (9P, A) | जिज्ञासति / ते |
| ज्वल् | (1P) | जिज्वलिषति |
| तड् | (10P, A) | तिताडयिषति |
| तन् | (8P, A) | तितंसति / ते, तितांसति / ते, तितनिषति / ते |
| तुद् | (6P, A) | तुतुत्सति / ते |

| | | |
|---|---|---|
| तुष् | (4P) | तुतुक्षति |
| तॄ | (1P) | तितीर्षति |
| त्यज् | (1P) | तित्यक्षति |
| दण्ड् | (10P, A) | दिदण्डयिषति / ते |
| दंश् | (1P) | दिदङ्क्षति |
| दय् | (1A) | दिदयिषते |
| दह् | (1P) | दिधक्षति |
| दा | (1P, 3P, A) | दित्सति / ते, दिदासति / ते |
| दिव् | (4P) | दिदेविषति / दिद्यूषति |
| दिश् | (6P, A) | दिदिक्षति / ते |
| दुह् | (2P, A) | दुधुक्षति / ते |
| दृश् | (1P) | दिदृक्षति |
| द्विष् | (2P, A) | दिद्विक्षति / ते |
| धा | (3P, A) | धित्सति / ते |
| धाव् | (1P, A) | दिधाविषति / ते |
| धृ | (10P, A) | दिधारयिषति / ते |
| ध्यै | (1P) | दिध्यासति |
| नन्द् | (1P) | निनन्दिषति |
| नम् | (1P) | निनंसति |
| नश् | (4P) | निनशिषति / निनङ्क्षति |
| निन्द् | (1P) | निनिन्दिषति |
| नी | (1P) | निनीषति |
| नु | (2P) | नुनूषति |
| नुद् | (6P, A) | नुनुत्सति / ते |
| नृत् | (4P) | निनर्तिषति / निनृत्सति |
| पच् | (1P, A) | पिपक्षति / ते |
| पठ् | (1P) | पिपठिषति |
| पत् | (1P) | पिपतिषति / पित्सति |
| पा | (1P) | पिपासति |
| पा | (2P) | पिपासति |
| पाल् | (10P, A) | पिपालयिषति |
| पिष् | (7P) | पिपिक्षति |
| पीड् | (10P, A) | पिपीडयिषति / ते |
| पुष् | (4P) | पुपुक्षति |
| पुष् | (9P) | पुपुषिषति / पुपोषिषति |
| पूज् | (10P, A) | पुपूजयिषति / ते |

| | | |
|---|---|---|
| प्रच्छ | (6P) | पिपृच्छिषति |
| बन्ध् | (9P) | बिभन्त्सति |
| बाध् | (1A) | बिबाधिषते |
| बुध् | (1P, A) | बुबुधिषति / ते, बुबोधिषति / ते |
| ब्रू | (2P, A) | विवक्षति / ते |
| भक्ष् | (10P, A) | बिभक्षयिषति / ते |
| भज् | (1P, A) | बिभक्षति / ते |
| भञ्ज् | (7P) | बिभङ्क्षति |
| भा | (2P) | बिभासति |
| भाष् | (1A) | बिभाषिषते |
| भिक्ष् | (1A) | बिभिक्षिषते |
| भिद् | (7P, A) | बिभित्सति / ते |
| भी | (3P) | बिभीषति |
| भुज् | (7P, A) | बुभुक्षति / ते |
| भू | (1P) | बुभूषति |
| भूष् | (10P, A) | बुभूषयिषति / ते |
| भृ | (3P, A) | बिभरिषति / ते, बुभूर्षति / ते |
| भ्रम् | (1, 4P) | बिभ्रमिषति |
| मन् | (4A) | मिमंसते |
| मन् | (8A) | मिमनिषते |
| मन्त्र् | (10A) | मिमन्त्रयिषते |
| मन्थ् | (9P) | मिमन्थिषति |
| मा | (2P) | मित्सति |
| मा | (3A) | मित्सते |
| मुच् | (6P, A) | मुमुक्षति / ते, मोक्षते |
| मुद् | (1A) | मुमुदिषते / मुमोदिषते |
| मृ | (6A) | मुमूर्षति |
| यज् | (1P, A) | यियक्षति / ते |
| यत् | (1A) | यियतिषते |
| या | (2P) | यियासति |
| याच् | (1P, A) | यियाचिषति / ते |
| युज् | (7P, A) | युयुक्षति / ते |
| रक्ष् | (1P) | रिरक्षिषति |
| रच् | (10P, A) | रिरचयिषति / ते |
| रम् | (1A) | रिरंसते |
| राज् | (1P, A) | रिराजिषति / ते |

| | | |
|---|---|---|
| रु | (2P) | रुरूषति |
| रुच् | (1A) | रुरुचिषते / रुरोचिषते |
| रुद् | (2P) | रुरुदिषति |
| रुध् | (7P, A) | रुरुत्सति / ते |
| रुह् | (1P) | रुरुक्षति |
| लभ् | (1A) | लिप्सते |
| लिख् | (6P) | लिलिखिषति / लिलेखिषति |
| लिह् | (2P, A) | लिलिक्षति / ते |
| वच् | (2P) | विवक्षति |
| वञ्च् | (10P, A) | विवञ्चयिषति / ते |
| वद् | (1P) | विवदिषति |
| वन्द् | (1A) | विवन्दिषते |
| वस् | (1P) | विवत्सति |
| वह् | (1P, A) | विवक्षति / ते |
| वा | (2P) | विवासति |
| वाञ्छ् | (1P) | विवाञ्छिषति |
| विद् | (2P) | विविदिषति |
| विद् | (4A) | विवित्सते |
| विद् | (6P, A) | विवित्सति / ते, विविदिषति / ते |
| विश् | (6P, A) | विविक्षति / ते |
| वृ | (5P, A) | विवरिषति / ते, विवरीषति / ते |
| वॄ | (9P, A) | विवरिषति / ते, विवरीषति / ते |
| वृत् | (1A) | विवर्तिषते / विवृत्सति |
| वृध् | (1A) | विवर्धिषते / विवृत्सति |
| वेप् | (1A) | विवेपिषते |
| व्रज् | (1P) | विव्रजिषति |
| शक् | (5P) | शिक्षते |
| शप् | (1P, A) | शिशप्सति / ते |
| शम् | (4P) | शिशमिषति |
| शंस् | (1P) | शिशंसिषति |
| शास् | (2P) | शिशासिषति |
| शी | (2A) | शिशयिषते |
| शुभ् | (1A) | शुशुभिषते / शुशोभिषते |
| श्रम् | (4P) | शिश्रमिषति |
| श्रु | (5P) | शुश्रूषति |
| श्लाघ् | (1A) | शिश्लाघिषते |

| | | |
|---|---|---|
| श्वस् | (2P) | शिश्वसिषति |
| सद् | (1P) | सिषत्सति |
| सह् | (1A) | सिसहिषते |
| साध् | (5P) | सिषात्सति / सिषाधयिषति |
| सु | (5P, A) | सुसूषति / ते |
| सृ | (1P) | सिसीर्षति |
| सृज् | (6P) | सिसृक्षति |
| सृप् | (1P) | सिसृप्सति |
| सेव् | (1A) | सिसेविषते |
| स्तभ् | (9P) | तिस्तम्भिषते |
| स्तु | (2P, A) | तुष्टूषति / ते |
| स्था | (1P) | तिष्ठासति |
| स्ना | (2P) | सिस्नासति |
| स्निह् | (4P) | सिस्निहिषति / सिस्नेहिषति / सिस्निक्षति |
| स्पर्ध् | (1A) | पिस्पर्धिषते |
| स्पृश् | (6P) | पिस्पृक्षति |
| स्पृह् | (10P, A) | पिस्पृहयिषति / ते |
| स्मृ | (1P) | सुस्मूर्षते |
| स्वप् | (2P) | सुषुप्सति |
| हन् | (2P) | जिघांसति |
| हस् | (1P) | जिहसिषति |
| हा | (3P) | जिहासति |
| हिंस् | (7P) | जिहिंसिषति |
| हु | (3P) | जुहूषति |
| हृ | (1P, A) | जिहीर्षति / ते |

**Vocabulary**

| | | | |
|---|---|---|---|
| क्षिति-धेनु (f) | cow-like earth | वत्स (m) | calf, child |
| आ+या (2P) | to come | उप+गम् (1P) | to approach |
| नल (m) | name of king | शत्रु-राज्य (n) | enemy-kingdom |
| लङ्का (f) | island of Sri Lanka | कर्मन् (n) | actions |
| समा (f) | year | समुद्र (m) | ocean |
| मारुति (m) | name of monkey-god | व्याकरण (n) | grammar |
| काव्य-रस (m) | juice of poetry | वेदशब्द (m) | word of scripture |
| कंस (m) | name of a demon | मथुरा (f) | name of city |

| | | | |
|---|---|---|---|
| अतिभारवहन (n) | carrying big loads | गर्दभ (m) | ass |
| मरण (n) | death | जन्मन् (n) | birth |
| प्रादुर्+भू (1P) | to make appearance | | |

**Exercises**

1) **Translate the following into English:**

१. हे राजन्, यदि क्षितिधेनुमेतां दुधुक्षसि, तर्हि अद्य वत्समिव लोकममुं पुषाण ।
२. अयं बालकः पुनर्विवक्षुरिहायाति ।
३. शास्त्रं जिज्ञासवः शिष्या गुरुमुपजग्मुः ।
४. नलो नाम राजा ह्रदे रिरंसुमेकं हंसं जिघृक्षति ।
५. वीरः शत्रुराज्यं विजिगीषतु ।
६. सत्यं चिकीर्षमाणो नरः नासत्यं चिकीर्षेत् ।
७. बुभुक्षा मां बाधत इत्यहमवोचम् ।
८. को नाम जनो धनं नेप्सति?
९. लङ्कां विजित्य रामः स्वनगरं जिगमिषति ।
१०. कुर्वन्नेवेह कर्माणि जिजीविषेत् शतं समाः ।
११. समुद्रं हस्ताभ्यां स वीरस्तितीर्षतु ।
१२. मारुतिः सीतामदिदृक्षत् ।
१३. बुभुक्षितैर्व्याकरणं न भुज्यते पिपासितैः काव्यरसो न पीयते ।
१४. दुःखाज्जगदुज्जिहीर्षन् भगवान् बुद्धः क्वास्ते?
१५. यियक्षवो ब्राह्मणा ग्रामाद्ग्रामं जिगमिषन्ति ।
१६. यशो लिप्समानाः पण्डिताः परस्परं विविवदिषन्ति, न तु सत्यं विविदिषन्ति ।
१७. यदा ईश्वरो जगत् सिसृक्षति तदा स वेदशब्दान्भाषते । स यान् यान् शब्दान् भाषते तानि तानि वस्तुनि प्रादुर्भवन्ति ।
१८. कंसं जिघांसुः कृष्णो मथुरानगरीं यियासति ।
१९. प्रतिदिनमतिभारवहनात् स गर्दभो मुमूर्षुरिवाभवत् ।
२०. मुनिर्मरणादात्मानं मुमुक्षति । जन्मनश्च ।

2) **Convert all verbs in Exercise 3, Lesson 6, to desiderative forms. Retain all tenses and moods.**

3) **Convert all desiderative finite verbs in Exercise 1 above to infinitive + verb of desire.**

**4) Translate the following into Sanskrit:**

1. Yajñadatta wants to make a bow for the sage.
2. The snake, wanting to bite the king, entered the palace.
3. Rāvaṇa did not want to be a wicked demon.
4. I want to live for a hundred years.
5. The village was desired to be burned by the enemies.
6. Mr. crocodile wanted to eat the sweet heart of his friend.
7. The swans wished to sport in the lake.
8. Rāma wished to kill Rāvaṇa and to make Bibhīṣaṇa the king of Laṅkā.
9. The priests should want to sacrifice to gods (acc.).
10. The elephants may wish to descend (अव+तृ) from the mountain, and may wish to bathe in the lake.

**5) Write any five Sanskrit sentences of your own.**

# LESSON 41

## Ditransitive Verbs

The term ditransitive (द्विकर्मक) refers to those verbs which can take two objects, both of which can have accusative in an active voice construction, and one of them can take the nominative in a passive voice construction. Several causative constructions can have two objects, especially when the agent of the pre-causative action is treated as the object of the causative action. We will not consider these causative constructions here. These are discussed in Lesson 39.

For most of the other ditransitive verbs in Sanskrit, this ditransitivity is optional, because one of the two objects can possibly occur in a case other than accusative, showing that it can be categorized optionally as something other than an object. One of the standard examples of this construction is:

देवदत्तः गाम् (acc) पयः (acc) दोग्धि ।
Lit. transl. "Devadatta milks the cow the milk."

Assuming that the situation to be described involves a person milking a cow, we have some of the following alternative possibilities. For the Sanskrit grammarians, a prototypical direct object is *īpsitatama* "that which is most desired to be encompassed by the action". The traditional choice for this status of "most desired" is the milk, rather than the cow. Thus, the milk is a direct object. There is no alternative classification for the milk. If we consider only the cow, without bringing the milk into the situation directly, then the cow by default may also be a direct object. Thus, we can get the following sentences:

देवदत्तः पयः दोग्धि । "Devadatta milks the milk."
देवदत्तः गां दोग्धि । "Devadatta milks the cow."

A difficulty arises when one wishes to include both the cow and the milk as arguments for the verb *dogdhi*. Of these two arguments, as explained earlier, the tradition picks out the milk as

the *īpsitatama* "most desired" argument, and hence it becomes a direct object. How about the cow? Even if it were *īpsita* "desired" in some sense, it is certainly not the most desired entity. The tradition considers the following alternative characterizations for the cow.

a) One may simply construe the cow with the milk as the possessor of milk. This gives us the genitive case for the cow.
b) The cow may be considered to have a specific semantic role with respect to the action of milking, such as "point of departure, source" for the milk. This would give us the ablative case for the cow.
c) In the last alternative, one does think of the cow as a factor involved in the production of action, and yet does not specifically categorize it as a "point of departure, source" etc. In this situation, the Sanskrit grammarians tell us that an entity which is related to the action but which is not specifically categorized gets the designation "Object".

These three scenarios, respectively, account for the following three sentences:

देवदत्तः गोः (Genitive) पयः (Accusative) दोग्धि ।
Devadatta milks the milk of the cow.

देवदत्तः गोः (Ablative) पयः (Accusative) दोग्धि ।
Devadatta milks the milk from the cow.

देवदत्तः गां (Accusative) पयः (Accusative) दोग्धि ।
Devadatta milks the cow the milk.

In the Sanskrit grammatical tradition, the following distinction is made: the *īpsitatama* "most desired" object is the principal object (*pradhāna-karman*), and the *akathita-karman* "the object

with an unspecified *kāraka* role" is the secondary object (*apradhāna-karman*). Especially in the context of passivizing these constructions, the tradition offers us a list of verbs with two objects:

**Active Voice Constructions**

| **Verb** | **Principal Object** (Accusative) | **Secondary Object** (Accusative) |
|---|---|---|
| दोग्धि<br>to milk | पयः<br>milk | गाम्<br>cow |
| याचते<br>to beg | वसुधाम्<br>earth | बलिम्<br>Bali |
| पचति<br>to cook | ओदनम्<br>rice | तण्डुलान्<br>rice-grains |
| दण्डयति<br>to fine | शतम्<br>a hundred | गर्गान्<br>Gargas |
| अवरुणद्धि<br>to confine | गाम्<br>cow | व्रजम्<br>cow pen |
| पृच्छति<br>to ask | धर्मम्<br>religious duty | माणवकम्<br>boy |
| चिनोति<br>to collect | फलानि<br>fruit | वृक्षम्<br>tree |
| ब्रूते<br>to speak | धर्मम्<br>religious duty | माणवकम्<br>boy |
| शास्ति<br>to teach | धर्मम्<br>religious duty | माणवकम्<br>boy |
| जयति<br>to win | शतम्<br>a hundred | देवदत्तम्<br>Devadatta |
| मथ्नाति<br>to churn | सुधाम्<br>ambrosia | क्षीरनिधिम्<br>ocean |
| मुष्णाति<br>to steal | शतम्<br>a hundred | देवदत्तम्<br>Devadatta |

| | | |
|---|---|---|
| नयति | अजाम् | ग्रामम् |
| to lead | goat | village |
| हरति | अजाम् | ग्रामम् |
| to bring | goat | village |
| कर्षति | अजाम् | ग्रामम् |
| to drag | goat | village |
| वहति | अजाम् | ग्रामम् |
| to carry | goat | village |

A difficulty arises when one needs to passivize these constructions. Which of the two objects would get the nominative case and become the subject of the passive construction? The tradition claims that there is no uniformity in this regard and that for some verbs the principal object gets the nominative, while for others it is the secondary object which gets the nominative. For the last four verbs listed above, the principal object gets the nominative, while for the rest of the listed verbs the secondary object gets the nominative. The passive constructions are given below:

**Passive Constructions**
**Class A**

| **Verb** | **Principal Object** (Accusative) | **Secondary Object** (Nominative) |
|---|---|---|
| दुह्यते | पयः | गौः |
| to milk | milk | cow |
| याच्यते | वसुधाम् | बलिः |
| to beg | earth | Bali |
| पच्यन्ते | ओदनम् | तण्डुलाः |
| to cook | rice | rice-grains |
| दण्डयन्ते | शतं | गर्गाः |
| to fine | a hundred | Gargas |
| अवरुध्यते | गाम् | व्रजः |
| to confine | cow | cowpen |

| | | |
|---|---|---|
| पृच्छयते | धर्मम् | माणवकः |
| to ask | religious duty | boy |
| चीयते | फलानि | वृक्षः |
| to collect | fruit | tree |
| उच्यते | धर्मम् | माणवकः |
| to speak | religious duty | boy |
| शिष्यते | धर्मम् | माणवकः |
| to teach | religious duty | boy |
| जीयते | शतम् | देवदत्तः |
| to win | a hundred | Devadatta |
| मथ्यते | सुधाम् | क्षीरनिधिः |
| to churn | ambrosia | ocean |
| मुष्यते | शतम् | देवदत्तः |
| to steal | a hundred | Devadatta |

**Class B**

| **Verb** | **Principal Object** (Nominative) | **Secondary Object** (Accusative) |
|---|---|---|
| नीयते | अजा | ग्रामम् |
| to lead | goat | village |
| ह्रियते | अजा | ग्रामम् |
| to bring | goat | village |
| कृष्यते | अजा | ग्रामम् |
| to drag | goat | village |
| उह्यते | अजा | ग्रामम् |
| to carry | goat | village |

From a modern point of view, one may say that of the two objects, the one which is more animate, agentive, affected and must be accessed first, gets the nominative in the passive construction. In any case, we must accept that there is variation in Sanskrit usage, which can be handled best by listing those verbs which can optionally take two objects. The traditional list is given above. Study the following examples involving the variation described above:

गां दोग्धि पयः ।

"X milks the cow the milk."

दुह्यते गोः (abl) पयः ।

"The milk is milked from the cow."

दुह्यते गोः (gen) पयः ।

"The milk of the cow is milked."

दुह्यते गौः पयः ।

"The cow is milked the milk."

पौरवम् गाम् याचते ।

"X begs (the king) Paurava a cow."

याच्यते पौरवस्य कम्बलः ।

"The blanket of (the king) Paurava is begged for."

याच्यते पौरवात् कम्बलः ।

"The blanket was begged from (the king) Paurava."

अन्ववरुणद्धि गाम् व्रजम् ।

"X confines the cow (to) the cowpen."

पौरवम् गाम् भिक्षते ।

"X begs (the king) Paurava a cow."

वृक्षम् अवचिनोति फलानि ।

"X picks the tree the fruit."

पुत्रम् ब्रूते धर्मम् ।

"X tells the religious doctrine (to) the son."

पुत्रम् अनुशास्ति धर्मम् ।

"X teaches the religious doctrine (to) the son."

माणवकम् पन्थानम् पृच्छति ।

"X asks the boy the path."

तण्डुलान् ओदनम् पचति ।

"X cooks the rice grains (into cooked) rice."

तण्डुलानाम् ओदनम् पचति ।

"X cooks (= makes) (cooked) rice of the rice grains."

**Vocabulary**

| | | | |
|---|---|---|---|
| आ+चक्ष्, (2 A) | to tell | आम्रः (m) | mango tree |
| कोविदार (m) | name of a tree | चुद् (10P) | to object, question |
| इष्ट (a) | desired | वस्तु (n) | object, thing |
| नाथ् (1A) | to beg | वन् (8A) | to beg |
| वनीयक (m) | beggar | तोयद (m) | cloud |
| चातक (m) | name of a bird | शरद्-घन (m) | autumn cloud |
| आचार्य (m) | teacher | सूत्र (n) | rules, aphorisms |
| जिज्ञासते desid. of ज्ञा | to enquire | आ+दिश् (6P) | to order, command |
| अप+हृ (1P) | to take away | अर्द् (1P) | to go, to beg |
| इतर, इतरा, इतरद् (prn) | other | | |

**Exercises**

1) **Translate the following into English:**

१. इदं तावदयं प्रष्टव्यः ।
२. न हि अन्यत् पृष्टेन अन्यद् आख्येयम् ।
३. अन्यद् भवान् पृष्टः अन्यद् आचष्टे ।
४. आम्रान् पृष्टः कोविदारानाचष्टे ।
५. यो हि भुक्तवन्तं ब्रूयान्मा भुङ्क्था इति किं तेन कृतं स्यात्?
६. इति भवान् अस्माभिश्चोदितः ।
७. तं राजानम् जना इष्टानि वस्तूनि नाथन्ते ।

८. धनिनं धनं वनुते वनीयकः ।
९. तोयदाद् इतरं नैव चातको वनुते जलम् ।
१०. शरद्घनं नार्दति चातकोऽपि ।
११. आचार्यः शिष्यान् सूत्राणि भाषते ।
१२. गुरुं जिज्ञासते धर्मम् ।
१३. राजा त्वां कार्यम् आदिशत् ।
१४. मा नः आयुः अपहर ।
१५. इममश्वं ग्रामं नय ।

2) **Carefully reread the Story of the Mustard Seed in Lesson 11. Find all constructions of the type "X said to Y" and change them to passive.**

3) **Translate the following into Sanskrit:**

1. Why was I asked that question?
2. She should be addressed (spoken to) these words by you.
3. The boy was taught Dharma by the teacher.
4. These words were spoken to the king (dat.) by his wife.
5. The king was asked (for) money by the poet.
6. The horses were taken to the palace by the servants.
7. The monks (भिक्षु m) were taught Emptiness (शून्यता f) by the Buddha.
9. The words "Give up, give up" were said to Rāvaṇa by his brother Bibhīṣaṇa.
10. The disciple was told by the teacher: "recite the Vedas".

4) **Write any five Sanskrit sentences of your own.**

# LESSON 42

## Intensive / Frequentative Verbs

A frequentative verb may be derived from any root of the first nine conjugations which are monosyllabic. This kind of secondary verb indicates a repeated or a frequently performed action. A frequentative verb root undergoes reduplication. With a reduplicated root, there are two ways to formulate a frequentative base:

a) An affix य is added to this reduplicated root, and then the derived base is conjugated only in the middle (आत्मनेपद), e.g. कृ > चेक्रीयते.

b) No य is added to the reduplicated root, and the base is conjugated only in the active (परस्मैपद), e.g. कृ > चर्कर्ति.

Frequentatives are rare in literature, and only the few verbs which are met in literature are listed below with sample active and middle 3rd person singular forms:

**List of frequent verbs:**

| Root | | य-Frequentative<br>आत्मनेपद only | य-less Frequentative<br>परस्मैपद only |
|---|---|---|---|
| अट् | "wander" | अटाटयते | |
| कृ | "do" | चेक्रीयते | चर्कर्ति / चरीकर्ति |
| क्रम् | "walk" | चङ्क्रम्यते | चङ्क्रमीति |
| गम् | "go" | जङ्गम्यते | जङ्गमीति |
| चर् | "walk, move" | चञ्चूर्यते | चञ्चु(/ञ्चू)रीति / चञ्चूर्ति |
| जन् | "be born" | जञ्जन्यते / जाजायते | जञ्जनीति / जञ्जन्ति |
| जप् | "recite" | जञ्जप्यते | जञ्जपीति |
| ज्वल् | "burn" | जाज्वल्यते | जाज्वलीति |
| तॄ | "cross" | तेतीर्यते | तातरीति |

| | | | |
|---|---|---|---|
| दंश् | "bite" | दन्दश्यते | दन्दशीति |
| दह् | "burn" | दन्दह्यते | दन्दहीति |
| दा | "give" | देदीयते | दादाति |
| दीप् | "shine" | देदीप्यते | देदिपीति |
| द्युत् | "shine" | देद्युत्यते | देद्युतीति / देद्योत्ति |
| नृत् | "dance" | नरीनृत्यते | नरीनर्ति |
| पा | "drink" | पेपीयते | पापाति |
| पच् | "cook" | पापच्यते | पापचीति / पापक्ति |
| प्रच्छ् | "ask" | परीपृच्छयते | पाप्रच्छीति |
| फल् | "blossom" | पम्फुल्यते | पम्फुलीति |
| बुध् | "know" | बोबुध्यते | बोबुधीति |
| भिद् | "break" | बेभिद्यते | बेभिदीति |
| भ्रम् | "roam" | बम्भ्रम्यते | बम्भ्रमीति |
| मृ | "die" | मेम्रीयते | मरीमर्ति |
| यज् | "sacrifice" | यायज्यते | यायजीति |
| रट् | "roar" | रारटयते | रारटीति |
| रु | "cry" | रोरूयते | रोरवीति |
| रुच् | "like" | रोरुच्यते | रोरुचीति |
| रुद् | "weep" | रोरुद्यते | रोरुदीति |
| लिह् | "lick" | लेलिह्यते | लेलिहीति |
| लुप् | "bite off" | लोलुप्यते | लोलुपीति |
| लुभ् | "be greedy" | लोलुभ्यते | लोलुभीति |
| वद् | "speak" | वावद्यते | वावदीति |
| वृत् | "be" | वरीवृत्यते | वरीवर्ति / वरीवृतीति |
| व्रज् | "go" | वाव्रज्यते | वाव्रजीति |
| शुच् | "grieve" | शोशुच्यते | शोशुचीति |
| शुभ् | "shine" | शोशुभ्यते | शोशुभीति |
| सद् | "sit" | सासद्यते | सासदीति |
| सृ | "go, move" | सेस्रीयते | सरीसर्ति |
| सृप् | "crawl" | सरीसृप्यते | सरीसृपीति |
| स्मृ | "remember" | सास्मर्यते | सास्मरीति |
| स्वप् | "sleep" | सोषुप्यते | सास्वपीति |
| हन् | "kill" | जेघ्नीयते / जघन्यते | जङ्घनीति / जङ्घन्ति |

Sample paradigms:

| कृ "to do" | | | नृत् "dance" | | |
|---|---|---|---|---|---|
| **Active Present** | | | **Middle Present** | | |
| चरीकर्मि | चरीकृवः | चरीकृमः | नरीनृत्ये | नरीनृत्यावहे | नरीनृत्यामहे |
| चरीकर्षि | चरीकृथः | चरीकृथ | नरीनृत्यसे | नरीनृत्येथे | नरीनृत्यध्वे |
| चरीकर्ति | चरीकृतः | चरीक्रति | नरीनृत्यते | नरीनृत्येते | नरीनृत्यन्ते |

| भू "to be" | | | भू "to be" | | |
|---|---|---|---|---|---|
| **Active Present** | | | **Active Imperfect** | | |
| बोभोमि/भवीमि | बोभूवः | बोभूमः | अबोभवम् | अबोभूव | अबोभूम |
| बोभोषि/भवीषि | बोभूथः | बोभूथ | अबोभोः/भवीः | अबोभूतम् | अबोभूत |
| बोभोति/भवीति | बोभूतः | बोभवति | अबोभोत्/भवीत् | अबोभूताम् | अबोभवुः |

The reduplication of the root involved in frequentative verbs is riddled with options, and the Sanskrit grammarians give an enormous number of alternative forms. For instance, for the form चरीकर्ति above, we have the following alternatives: चर्कर्ति, चरिकर्ति, चर्करीति, चरिकरीति and चरीकरीति.

The middle forms also serve as passive forms, e.g.

रामेण ग्रामः जङ्गम्यते । "The village is frequently visited by R."
रामः ग्रामं जङ्गम्यते । "R frequently visits the village."

Theoretically, a frequentative verb can have all possible tenses and moods, though these forms are very rare at best.

| | कृ | भू |
|---|---|---|
| | **Active** | **Middle** |
| Present | चरीकर्ति | बोभूयते |
| Imperfect | अचर्करीत् | अबोभूयत |
| Perfect | चरीकराञ्चकार | बोभूयाञ्चक्रे |
| Aorist | अचरीकारीत् | अबोभूयिष्ट |
| Imperative | चरीकर्तु | बोभूयताम् |
| Potential | चरीकृयात् | बोभूयेत |
| स्य Future | चरीकरिष्यति | बोभूयिष्यते |
| तास् Future | चरीकर्ता | बोभूयिता |
| Conditional | अचरीकरिष्यत् | अबोभूयिष्यत |
| Benedictive | चरीकृयात् | बोभूयिषीष्ट |

नरो बधिरः (deaf) इति अज्ञात्वा राजा तं परीपृच्छ्यते ।
नरो बधिरः इति अज्ञात्वा राजा तं पुनः पुनः पृच्छति ।
"Not knowing that the man was deaf, the king asks him again and again."

दैवहतस्य (fate-struck) नरस्य मतिः मोमुह्यते ।
दैवहतस्य नरस्य मतिः पुनः पुनः मुह्यति ।
"The mind of a person struck by fate gets deluded again and again."

देदीप्यमानां राजकन्यां राजपुत्रो ददर्श । (present middle participle)
अतीव (exceedingly) दीप्यमानां राजकन्यां राजपुत्रो ददर्श ।
"The prince saw the exceedingly bright princess."

**Vocabulary**

| | | | |
|---|---|---|---|
| बरीभर्ति < भृ | to support | सञ्जरीहर्ति < सम्+हृ | to destroy |
| अर्जुन (m) | name of person | नरक (m) | hell |
| वाल्मीकि (n) | name of sage | शास्त्राध्ययन (n) | study of sacred texts |
| नगर+वीथी (f) | town streets | | |
| समराङ्गण (n) | battle-field | मरुदेश (m) | desert-region |
| ग्रीष्मर्तु (m) | summer-season | पथिक (m) | traveller |
| वि+ज्ञा (9P, A) | to know | सरस्वती (f) | goddess of speech |
| जिह्वाग्र (n) | tip of tongue | कविराज (m) | king among poets |
| मुह् (4P) | to be confused | अयोध्या (f) | name of a city |

**Exercises**

1) **Translate the following into English:**

१. नमस्तस्मै नमस्तस्मै नमस्तस्मै नमो नमः ।
चरीकर्ति बरीभर्ति सञ्जरीहर्ति यो जगत् ॥
२. रामः पापच्यते ।
३. अर्जुनः कृष्णं तेजोभिः देदीप्यमानं पश्यति ।
४. यो नरः पापं चरीकर्ति तं नरकेऽग्नयो लेलिह्यन्ते ।

५. वने त्यक्ता सीता चङ्क्रम्यमाणा वाल्मीकेराश्रमं जगाम ।
६. रे मूर्ख, शास्त्राध्ययनं विहाय कुतस्त्वया नगरवीथीषु अटाटयते?
७. समराङ्गणे वीराः शत्रूणां शिरांसि शस्त्रैः बेभिद्यन्ताम् ।
८. मरुदेशे ग्रीष्मर्तौ बम्भ्रम्यमाणः पथिको जलं पिपासति ।
९. कुतस्त्वयाद्य रोरुद्यते? इति भर्त्रा परीपृच्छ्यमाना सा नारी बभाषे ।
१०. युष्माभिः प्रासादे कुत इतस्ततश्चञ्चूर्यते इति नृपो दासेभ्यः पाप्रच्छीति ।
११. यस्य जिह्वाग्रे साक्षात् सरस्वती नरीनर्ति, सोऽयं कविराजः कालिदासः ।

**2) Translate the following into Sanskrit.**

1. Through actions done without thinking, pain is born again and again.
2. The flowers of that vine appeal to her intensely.
3. Rāma, sitting in his palace in Ayodhyā, shines brightly.
4. The trees are broken again and again by the wind.
5. I remember that girl a lot.
6. The kings give wealth to the poets again and again.
7. The priests sitting in the forest recite the hymns again and again.
8. By the king wishing to have a son, sacrificing is done again and again.
9. The mother whose son died grieves again and again.
10. If you are tired then sleep again and again.

**3) Write any five Sanskrit sentences of your own.**

# LESSON 43

## Denominative Verbs (नामधातु)

Denominative verbs are derived from nouns through affixation. Examples of denominative verbs in English would include expressions like "to chicken out", "vaporize", "to table a motion", "to Americanize" etc. Here the basic element is a noun, which has been pressed into extended service as a verb. In Sanskrit, there are various different kinds of denominative verbs.

### Type I

**Noun + य + Active Terminations**

**Meaning = desiring *x*.**

पुत्र + य + ति ⟶ पुत्रीयति = पुत्रम् आत्मनः इच्छति
wants to have a son for oneself

This construction is used only in the sense of desiring something for oneself.

### Type II

**Noun + य + Middle Terminations**

**Meaning = to act like *x*.**

कृष्ण + य + ते ⟶ कृष्णायते = कृष्णः इव आचरति
acts like Kṛṣṇa

पण्डित + य + ते ⟶ पण्डितायते = पण्डितः इव आचरति
acts like a scholar

गरुड + य + ते ⟶ गरुडायते = गरुडः इव आचरति
acts like an eagle

**Type III**

**Noun + य + Active / Middle Terminations**

This construction is used for color words such as लोहित "red" in the meaning "to become *x*", and for onomatopoetic expressions, imitations of non-linguistic sounds.

लोहित + य + ति / ते ⟶ लोहितायति / ते
to become red

कृष्ण + य + ति / ते ⟶ कृष्णायति / ते
to become blackened

पटपटा + य + ति / ते ⟶ पटपटायति / ते
to make the sound *paṭapaṭa*

नमस् + य + ति / ते ⟶ नमस्यति / ते
to make a salutation

**Type IV**

**Noun + काम्य + Active Terminations**

**Meaning: desiring *x*.**

पुत्र + काम्य + ति ⟶ पुत्रकाम्यति
desires a son

यशस् + काम्य + ति ⟶ यशस्काम्यति
desires fame

**Type V**

**Noun + य + Active / Middle Terminations**

This is used in a variety of different meanings. Some expressions occur only in active or middle.

उत्पुच्छ + य + ते ⟶ उत्पुच्छयते
to raise one's tail

सम्भाण्ड + य + ते → सम्भाण्डयते
to collect pots and pans

मिश्र + य + ति → मिश्रयति
to mix

**Type VI**

**Noun + zero suffix + Active Terminations**
**Meaning: to act like *x*.**

कृष्ण + ति → कृष्णति
to act like or become Kṛṣṇa

कवि + ति → कवयति
to act like or become a poet

**Type VII**

(This type is strictly speaking not a denominative verb, but a type of compounding with a verb. However, since it is functionally related, it is given here.)

**Noun + ई (ऊ) + कृ + Active or Middle Terminations**
**Meaning: to make not-*x* into *x*.**

**Noun + ई (ऊ) + भू + Active Terminations**
**Meaning: having been a not-*x*, to become *x*.**

अशुक्लं शुक्लं करोति →
शुक्ल + ई + करोति → शुक्लीकरोति
to make something white

अगङ्गां गङ्गां करोति →
गङ्गा + ई + करोति → गङ्गीकरोति
to make something into Ganges

| | | |
|---|---|---|
| अलघु लघु करोति | ⟶ | |
| लघु + ऊ + करोति | ⟶ | लघूकरोति<br>to make something small, reduce |
| अशुक्लं शुक्लं भवति | ⟶ | |
| शुक्ल + ई + भवति | ⟶ | शुक्लीभवति<br>to become white |
| अगङ्गा गङ्गा भवति | ⟶ | |
| गङ्गा + ई + भवति | ⟶ | गङ्गीभवति<br>to become Ganges |
| अलघु लघु भवति | ⟶ | |
| लघु + ऊ + भवति | ⟶ | लघूभवति<br>to become small, be reduced |

**Full Paradigms of Denominative Verbs:**

Theoretically, the denominative verbs can have all tenses and moods, though generally only the present tense forms, and a few participial forms are found in literature. A sample present tense paradigm of पुत्रीयति is given below.

**Active**

| | | |
|---|---|---|
| पुत्रीयामि | पुत्रीयावः | पुत्रीयामः |
| पुत्रीयसि | पुत्रीयथः | पुत्रीयथ |
| पुत्रीयति | पुत्रीयतः | पुत्रीयन्ति |

| | |
|---|---|
| Present | पुत्रीयति |
| Imperfect | अपुत्रीयत् |
| Perfect | पुत्रीयाञ्चकार |
| Aorist | अपुत्रीयीत् |
| Imperative | पुत्रीयतु |
| Potential | पुत्रीयेत् |
| स्य Future | पुत्रीयिष्यति |
| तास् Future | पुत्रीयिता |
| Conditional | अपुत्रीयिष्यत् |
| Benedictive | पुत्रीयात् |

Again, theoretically, a denominative verb such as पुत्रीयति can have secondary formations such as causatives, desideratives, intensives etc. Such formations, though theoretically possible, and though discussed by Sanskrit grammarians, are almost non-existent in actual known usage. Just for fun, the desiderative forms derived from पुत्रीयति have numerous options, depending upon which syllable is reduplicated: पुपुत्रीयिषति, पुतित्रीयिषति and पुत्रीयियिषति. Such forms stretch the rules of Sanskrit grammar beyond the limits of reasonableness. Who would want to say "X wants to want to have a son"?

### Vocabulary

| | | | |
|---|---|---|---|
| मन्दायते | to become lethargic | अङ्गीकरोति | to accept |
| सज्जन (m) | good folk | ज्योत्स्ना (f) | moon-shine |
| धवलयति | whiten | सत्र (n) | sacifice |
| लिप्सु (a) | desirous of getting | वर (m) | boon |
| कवलयति | turn $x$ into a morsel | राहु (m) | demon who eats the sun and the moon during an eclipse |
| पराक्रम (m) | valor | | |
| दोलायते | to act like a swing, oscillate | अव+लोक् | (10P, A) to see |
| आ+रभ् | (1A) to begin | गुणायते | turn into a virtue |
| दोषायते | turn $x$ into a fault | वदन (n) | face, mouth |
| दुर्जन (m) | a wicked person | पर्वतीकरोति | to make something into a mountain |
| अल्प (a) | small, little | | |
| पुत्रिन् (a) | those who have sons | स्वर्गीभवति | to become heaven |
| भूलोक (m) | the earthly world | | |

### Exercises

**1) Translate the following into English:**

१. सज्जना अङ्गीकृते कार्ये न मन्दायन्ते ।
२. चन्द्रमाः सर्वं जगत् ज्योत्स्नया धवलयति ।
३. पुत्रीयता दशरथेन राज्ञा सत्रमारब्धम् ।
४. वरं लिप्सुः शिष्यो मुनिं नमस्यति ।

५. राहुश्चन्द्रं सूर्यं च कवलयति ।
६. यशस्काम्यता वीरेण सह नृप आजगाम ।
७. तामवलोक्य स दोलायमानमतिर्बभूव ।
८. प्रासाद-शिखर-स्थोऽपि काको न गरुडायते ।
९. अन्येषाम् अल्पान् अपि गुणान् सज्जनाः पर्वतीकुर्वन्ति ।
१०. सज्जनवदने दोषाः गुणायन्ते ।
११. दुर्जनवदने गुणाः दोषायन्ते ।
१२. पुत्रिणोऽपि पुत्रीयन्ति किम् पुनरपुत्राः ।
१३. पण्डितैः सह संवादात् अपण्डितोऽपि पण्डितायते ।
१४. धर्मप्रिये राजनि भूलोकोऽपि स्वर्गीभवति ।
१५. असज्जनानां वचनैः सज्जनानामपि मनो दोलायते ।

2) **Try to paraphrase as many of the denominative usages with non-denominative usages as you can.**

3) **Translate the following into Sanskrit:**

1. If a wife and a husband love each other, the house turns into heaven.
2. For a man, separated from his wife, even the moon becomes (like) fire.
3. The fame of the king whitened the whole world.
4. The good teacher magnified the virtues of the boy.
5. The sages made salutations to gods at the sacrifice.
6. Having defeated his enemies, the king acts like an eagle.
7. Do not act like a dog in front of your friends.
8. When boys see a girl passing by, they all, saying "who? who?", act like crows.
9. Even a fool, clad in good clothes, acts like a scholar.
10. Engrossed in Kṛṣṇa's love, Rādhā acts like him.

4) **Write any five Sanskrit sentences of your own.**

# LESSON 44

## Gerunds in -अम्

While the gerunds in -त्वा and -य, represent the productive system of Classical Sanskrit, the gerunds in -अम् are non-productive forms, relics of the pre-Classical usage. It is used generally in two ways:

a) A double use of अम् gerunds, e.g. स्मारम् स्मारम्, indicates the repetition or intensity of such an action, "having remembered again and again".

b) These gerunds are also used in compound expressions, where the last item is the अम् gerund and the first item is a noun, adjective or adverb.

The few commonly used forms are listed below:

| Verb | | अम् Gerund |
|---|---|---|
| कृ | करोति | कारम् |
| क्षिप् | क्षिपति | क्षेपम् |
| गै | गायति | गायम् |
| ग्रह् | गृह्णाति | ग्राहम् |
| जीव् | जीवति | जीवम् |
| तड् | ताडयति | ताडम् |
| त्रै | त्रायते | त्रायम् |
| दह् | दहति | दाहम् |
| दा | यच्छति / ददाति | दायम् |
| दृश् | पश्यति | दर्शम् |
| धा | दधाति | धायम् |
| ध्यै | ध्यायति | ध्यायम् |
| नश् | नश्यति | नाशम् |
| पठ् | पठति | पाठम् |
| पा | पिबति | पायम् |

| | | |
|---|---|---|
| पिष् | पिनष्टि | पेषम् |
| पुष् | पुष्णाति | पोषम् |
| पॄ | पूरयति | पूरम् |
| बन्ध् | बध्नाति | बन्धम् |
| भुज् | भुनक्ति | भोजम् |
| मा | मिमीते | मायम् |
| मृ | मारयति | मारम् |
| वह् | वहति | वाहम् |
| शुष् | शुष्यति | शोषम् |
| श्रु | शृणोति | श्रावम् |
| स्मृ | स्मरति | स्मारम् |
| हन् | हन्ति | घातम् |

**Some commonly used compounds with अम् gerund** (with their idiomatic meanings):

| | |
|---|---|
| अकृतकारम् | "doing an amazing thing" |
| अग्रेभोजम् | "having eaten beforehand" |
| अन्यथाकारम् | "having done something otherwise" |
| कथङ्कारम् | "how?, by doing what?" |
| चूर्णपेषम् | "grinding something into fine powder" |
| चौरङ्कारम् | "saying there is a thief" |
| जीवग्राहम् | "taking someone alive" |
| तथाकारम् | "in that way" |
| पशुमारम् | "like beating a beast" |
| बाहूत्क्षेपम् | "having thrown up one's arms" |
| यथाकारम् | "in such a way" (goes with तथाकारम्) |
| समूलघातम् | "destroying roots and all, completely" |
| स्वादुङ्कारम् | "having made something sweet" |

**Irregular paradigms of some consonant-ending nouns:**

| | ककुभ् (f) "direction" | | | उपानह् (f) "shoe" | | |
|---|---|---|---|---|---|---|
| N | ककुप्/ब् | ककुभौ | ककुभः | उपानत्/द् | उपानहौ | उपानहः |
| Acc | ककुभम् | ककुभौ | ककुभः | उपानहम् | उपानहौ | उपानहः |
| I | ककुभा | ककुब्भ्याम् | ककुब्भिः | उपानहा | उपानद्भ्याम् | उपानद्भिः |
| D | ककुभे | ककुब्भ्याम् | ककुब्भ्यः | उपानहे | उपानद्भ्याम् | उपानद्भ्यः |
| Abl | ककुभः | ककुब्भ्याम् | ककुब्भ्यः | उपानहः | उपानद्भ्याम् | उपानद्भ्यः |
| G | ककुभः | ककुभोः | ककुभाम् | उपानहः | उपानहोः | उपानहाम् |
| L | ककुभि | ककुभोः | ककुप्सु | उपानहि | उपानहोः | उपानत्सु |
| V | ककुप्/ब् | ककुभौ | ककुभः | उपानत्/द् | उपानहौ | उपानहः |

| | अनडुह् (m) "bull" | | | कामदुह् (f) "wish-yielding cow" | | |
|---|---|---|---|---|---|---|
| N | अनड्वान् | अनड्वाहौ | अनड्वाहः | कामधुक् | कामदुहौ | कामदुहः |
| Acc | अनड्वाहम् | अनड्वाहौ | अनडुहः | कामदुहम् | कामदुहौ | कामदुहः |
| I | अनडुहा | अनडुद्भ्याम् | अनडुद्भिः | कामदुहा | कामधुग्भ्याम् | कामधुग्भिः |
| D | अनडुहे | अनडुद्भ्याम् | अनडुद्भ्यः | कामदुहे | कामधुग्भ्याम् | कामधुग्भ्यः |
| Abl | अनडुहः | अनडुद्भ्याम् | अनडुद्भ्यः | कामदुहः | कामधुग्भ्याम् | कामधुग्भ्यः |
| G | अनडुहः | अनडुहोः | अनडुहाम् | कामदुहः | कामदुहोः | कामदुहाम् |
| L | अनडुहि | अनडुहोः | अनडुत्सु | कामदुहि | कामदुहोः | कामधुक्षु |
| V | अनड्वन् | अनड्वाहौ | अनड्वाहः | कामधुक् | कामदुहौ | कामदुहः |

| | अप् (f) "water" only pl. | | | मधुलिह् (m) "honey-bee" | | |
|---|---|---|---|---|---|---|
| N | | | आपः | मधुलिट् | मधुलिहौ | मधुलिहः |
| Acc | | | अपः | मधुलिहम् | मधुलिहौ | मधुलिहः |
| I | | | अद्भिः | मधुलिहा | मधुलिड्भ्याम् | मधुलिड्भिः |
| D | | | अद्भ्यः | मधुलिहे | मधुलिड्भ्याम् | मधुलिड्भ्यः |
| Abl | | | अद्भ्यः | मधुलिहः | मधुलिड्भ्याम् | मधुलिड्भ्यः |
| G | | | अपाम् | मधुलिहः | मधुलिहोः | मधुलिहाम् |
| L | | | अप्सु | मधुलिहि | मधुलिहोः | मधुलिट्सु |
| V | | | आपः | मधुलिट् | मधुलिहौ | मधुलिहः |

### पुंस् (m) "man"

| | | | |
|---|---|---|---|
| N | पुमान् | पुमांसौ | पुमांसः |
| Acc | पुमांसम् | पुमांसौ | पुंसः |
| I | पुंसा | पुम्भ्याम् | पुंभिः |
| D | पुंसे | पुम्भ्याम् | पुंभ्यः |
| Abl | पुंसः | पुम्भ्याम् | पुंभ्यः |
| G | पुंसः | पुंसोः | पुंसाम् |
| L | पुंसि | पुंसोः | पुंसु |
| V | पुमन् | पुमांसौ | पुमांसः |

### श्वन् (m) "dog"

| | | | |
|---|---|---|---|
| N | श्वा | श्वानौ | श्वानः |
| Acc | श्वानम् | श्वानौ | शुनः |
| I | शुना | श्वभ्याम् | श्वभिः |
| D | शुने | श्वभ्याम् | श्वभ्यः |
| Abl | शुनः | श्वभ्याम् | श्वभ्यः |
| G | शुनः | शुनोः | शुनाम् |
| L | शुनि | शुनोः | श्वसु |
| V | श्वन् | श्वानौ | श्वानः |

### युवन् (m) "young man"

| | | | |
|---|---|---|---|
| N | युवा | युवानौ | युवानः |
| Acc | युवानम् | युवानौ | यूनः |
| I | यूना | युवभ्याम् | युवभिः |
| D | यूने | युवभ्याम् | युवभ्यः |
| Abl | यूनः | युवभ्याम् | युवभ्यः |
| G | यूनः | यूनोः | यूनाम् |
| L | यूनि | यूनोः | युवसु |
| V | युवन् | युवानौ | युवानः |

### अहन् (n) "day"

| | | | |
|---|---|---|---|
| N | अहः | अह्नी/अहनी | अहानि |
| Acc | अहः | अह्नी/अहनी | अहानि |
| I | अह्ना | अहोभ्याम् | अहोभिः |
| D | अह्ने | अहोभ्याम् | अहोभ्यः |
| Abl | अह्नः | अहोभ्याम् | अहोभ्यः |
| G | अह्नः | अह्नोः | अह्नाम् |
| L | अह्नि/हनि | अह्नोः | अहस्सु |
| V | अहः | अह्नी/अहनी | अहानि |

### वृत्रहन् (m) "Indra"

| | | | |
|---|---|---|---|
| N | वृत्रहा | वृत्रहणौ | वृत्रहणः |
| Acc | वृत्रहणम् | वृत्रहणौ | वृत्रघ्नः |
| I | वृत्रघ्ना | वृत्रहभ्याम् | वृत्रहभिः |
| D | वृत्रघ्ने | वृत्रहभ्याम् | वृत्रहभ्यः |
| Abl | वृत्रघ्नः | वृत्रहभ्याम् | वृत्रहभ्यः |
| G | वृत्रघ्नः | वृत्रघ्नोः | वृत्रघ्नाम् |
| L | वृत्रघ्नि/हणि | वृत्रघ्नोः | वृत्रहसु |
| V | वृत्रहन् | वृत्रहणौ | वृत्रहणः |

### मघवन् (m) "Indra"

| | | | |
|---|---|---|---|
| N | मघवा | मघवानौ | मघवानः |
| Acc | मघवानम् | मघवानौ | मघोनः |
| I | मघोना | मघवभ्याम् | मघवभिः |
| D | मघोने | मघवभ्याम् | मघवभ्यः |
| Abl | मघोनः | मघवभ्याम् | मघवभ्यः |
| G | मघोनः | मघोनोः | मघोनाम् |
| L | मघोनि | मघोनोः | मघवसु |
| V | मघवन् | मघवानौ | मघवानः |

| | पूषन् (m) "the sun" | | | पथिन् (m) "path" | | |
|---|---|---|---|---|---|---|
| N | पूषा | पूषणौ | पूषणः | पन्थाः | पन्थानौ | पन्थानः |
| Acc | पूषणम् | पूषणौ | पूष्णः | पन्थानम् | पन्थानौ | पथः |
| I | पूष्णा | पूषभ्याम् | पूषभिः | पथा | पथिभ्याम् | पथिभिः |
| D | पूष्णे | पूषभ्याम् | पूषभ्यः | पथे | पथिभ्याम् | पथिभ्यः |
| Abl | पूष्णः | पूषभ्याम् | पूषभ्यः | पथः | पथिभ्याम् | पथिभ्यः |
| G | पूष्णः | पूष्णोः | पूष्णाम् | पथः | पथोः | पथाम् |
| L | पूष्णि/षणि | पूष्णोः | पूषसु | पथि | पथोः | पथिषु |
| V | पूषन् | पूषणौ | पूषणः | पन्थाः | पन्थानौ | पन्थानः |

The word मथिन् (m) "churning stick" is declined like पथिन् above.

**Vocabulary**

| | | | |
|---|---|---|---|
| तृषित (a) | thirsty | कण्ठे कृ (8P, A) | to memorize |
| आ+क्रुश् (1P) | to scream | उदरपूरम् | filling one's belly |

**Exercises**

1) **Translate the following into English:**

१. स्मारं स्मारं रामः शिवं नमति ।
२. तृषितो नरो जलं पायं पायं तुष्यति ।
३. पाठं पाठं ब्राह्मणबालः ऋचं कण्ठे करोति ।
४. काव्यं गायं गायं कविः सभां तोषयति ।
५. नृपस्याग्रेभोजं दासो न गच्छेत् ।
६. रात्रौ शब्दान् श्रुत्वा स चौरङ्कारमाक्रोशति ।
७. यदि बालो वेदमन्यथाकारं पठेत्तर्हि गुरुर्न प्रसीदेत् ।
८. यथाकारं भुञ्जे तथाकारं भुञ्जे, किं तवानेन ।
९. स उदरपूरं भक्षयति ।
१०. अकृतकारं करोति शूरः ।
११. स भूभृच्छत्रून्समूलघातं हन्ति ।
१२. कृष्णः कालियं नाम नागं जीवग्राहमगृह्णात् ।
१३. चौरोऽयमिति मत्वा स मां पशुमारं मारितवान् ।

१४. गौरियं मे सस्यं खादतीति दृष्ट्वाहं तां दण्डताडं ताडयेयम् ।
१५. केशग्राहं ता नार्यः युध्यन्ते ।

2) **For every irregular consonant noun introduced in this lesson, write any two sentences making use of forms of that noun.**

# ADDITIONAL SANSKRIT READINGS

पुरा भारतदेशे कपिलवस्तुनगरे शुद्धोदनो नाम नृपोऽभवत्। तस्मिन्नगरे सर्वे जनाः सुखेनावसन्। जनानां सुखेन नृपोऽपि सुखमलभत। स नृपः सर्वाणि शास्त्राण्यबोधत्, सर्वदा च सत्यमेवाभाषत। तस्य भार्या मायादेवी। तस्याः सर्वे गुणा अवर्तन्त। यदा यदा जनाश्शुद्धोदनं मायादेवीं चैक्षन्त, तदा तदा तेऽमन्यन्त - य एतयोः पुत्रो भवेत् सोऽप्यस्माकं नृपो भवेत्। ईश्वरोऽस्माकं नृपाय पुत्रं यच्छत्विति। शुद्धोदनस्य भार्या सर्वदेश्वरमार्थयत - मम पुत्रो जायताम्। तस्य मतिश्शक्तिर्गुणाश्च वर्तन्ताम्। स्वैर्गुणैः शक्त्या मत्या च स सर्वाँल्लोकाञ्जयतु। सर्वे जना मम पुत्रं सर्वदा नमन्तु पूजयन्तु च। मम पुत्रः सर्वेभ्यो जनेभ्यः सुखँय्यच्छतु। स सर्वेषाञ्जनानान्दुःखं हरत्विति।

यदा मायादेवी सुखार्थं वनेऽभ्राम्यत्तदा वन एव तस्याः पुत्रोऽजायत। स सिद्धार्थः। यदा बालं सिद्धार्थम्मुनयोऽपश्यंस्तदा तेऽभाषन्त - हे शुद्धोदन, एष तव पुत्रो यदि नृपो भवेत्तर्हि स सर्वस्य लोकस्य नृपो भवेत्। किन्तु यदि स लोके दुःखं पश्येत्तर्हि स मुनिरेव भवेत्। तदा स सर्वस्य लोकस्य गुरुर्भवेदिति। यदा शुद्धोदनो नृपो मुनीनां तद्वचनमबोधत् तदा सोऽचिन्तयत् - मम पुत्रो नृप एव भवतु। स सर्वस्य लोकस्य नृपो भवतु। स मा वनङ्गच्छतु। मा च स मुनिर्भवत्विति। नृपः सिद्धार्थस्य कृते कनकस्य प्रासादमरचयत्। स तं प्रासादं रत्नैरभूषयत्। तस्य प्रासादस्य पुरतः पश्चाच्च वनेषु ह्रदा अभवन्। तेषु ह्रदेषु सर्वदा कमलान्यवर्धन्त। हंसाश्च तेषु ह्रदेषु सुखेनानृत्यन्। तस्मिन् प्रासादे प्रतिदिनं नार्यः कुसुमानां माला अरचयन् सिद्धार्थाय चायच्छन्। तत्र सिद्धार्थः सुखमेवालभत। स दुःखं न कदाप्यपश्यत्। सोऽचिन्तयत् - लोके सुखमेव भवति। दुःखं न कुत्रचिदपि वर्तत इति। एकदा सिद्धार्थः प्रासादाद् बहिरगच्छत्। स ग्रामेऽभ्राम्यत्। तत्र ग्रामे स कञ्चिद् व्याधितं नरं, कञ्चिद्वृद्धं नरं, कञ्चिच्च मृतं नरमैक्षत। ततः स दुःखमबोधत्। स कञ्चन मुनिं चापश्यत्। तस्य मुनेर्मुखे सिद्धार्थः सुखमेवापश्यत्। सिद्धार्थोऽमन्यत - अहं दुःखं नेच्छामि। ततः सुखायाहं मुनिर्भवेयमिति। स पुनः स्वं प्रासादमगच्छत्। यद्यपि स भार्यया पुत्रेण च सह प्रासादेऽवसत्तथापि स सर्वदा दुःखस्य कारणमचिन्तयत्। कुतो नरस्य जीवनं दुःखं भवति। कुतो मुनिर्गृहन्त्यजति वनञ्च गच्छति। कथं स वने सुखं लभते। यशोधरा मम भार्या। राहुलो मम पुत्रः। कुत्र मम सुखम्। अहं ताभ्यां सह वसानि? अथवा तौ त्यजानि वनञ्च गच्छानि? एतत्स सर्वदाचिन्तयत्।

एकदा रात्रौ सिद्धार्थो भार्यां पुत्रं प्रासादञ्चात्यजत्। सोऽश्वमारोहद्वनञ्चागच्छत्। वने सोऽश्वमप्यत्यजत्। स केशानकृन्तन्नद्याञ्चाक्षिपत्। स सर्वाणि भूषणान्यप्यनलेऽक्षिपत्। सोऽवदत् - अधुनाहम्मुनिर्भवेयमिति। ततः स सत्यस्य दर्शनाय ग्रामाद्ग्रामं वनाद्वनं देशाद्देशमभ्राम्यत्। स यं यं मुनिमपश्यत्तं तं सोऽपृच्छत्। स यद्यत्पुस्तकमलभत, तत्तत् पुस्तकं सोऽपठत्। तथापि स सत्यं नाबोधत्। एकदा सोऽचिन्तयत् - यद्यहमन्नं न

भक्षयेयम्, जलमपि न पिबेयम्, तर्ह्यहं सत्यं पश्येयमिति। ततः सोऽन्नं जलञ्चात्यजत्। स वृक्षस्याधोऽसीदत्। किन्तु स सत्यं नाबोधत्। सोऽमन्यत - यद्यहमन्नञ्जलञ्च त्यजेयमहं मरणमेव लभेय न सत्यम्। ततो ध्यानेनैवाहं मुनिर्भवेयमिति। ततोऽनन्तरं स यदा वृक्षस्याधो ध्यानायासीदत्तदा स सत्यमबोधत्। तदा स बुद्धोऽभवत्।

स सर्वेषाञ्जनानां गुरुरभवत्। जना बुद्धमपृच्छन् - हे गुरो, नमस्ते। अस्मभ्यं सत्यं कथय। कथं वयं दुःखं त्यजेमेति। बुद्धस्तानभाषत - हे जनाः, इच्छा दुःखस्य कारणम्। यदि यूयमिच्छां त्यजेत, तर्हि युष्माकं जीवने दुःखं नैव जायेत। ये सुखमिच्छन्ति त एव दुःखं विन्दन्ति। ये सुखं नेच्छन्ति त एव सुखं लभन्त इति। जना बुद्धमनमन्। ते तं कुसुमैरपूजयन्। तस्य वचनानि च पुस्तकेष्वलिखन्। तानि च पुस्तकान्यपूजयन्। किन्तु जना इच्छां न कदाप्यत्यजन्। ततस्तेषां दुःखमद्यापि न शाम्यति।

**Vocabulary**

| | | | |
|---|---|---|---|
| भारतदेश (m) | India | शुद्धोदन (m) | name of a king |
| कपिलवस्तु (n) | name of city | मुख (n) | face |
| मायादेवी (f) | name of the queen | सिद्धार्थ (m) | name of a prince |
| व्याधित (a) | hurt, sick | वृद्ध (a) | old man |
| मृत (a) | dead | कारण (n) | cause |
| कथम् | how? | यशोधरा (f) | Siddhārtha's wife |
| राहुल (m) | Siddhārtha's son | केश (m) | hair |
| दर्शन (n) | vision, experience | ध्यान (n) | meditation |
| बुद्ध (a) | awakened one | इच्छा (f) | desire |
| प्रतिदिनम् (ind) | everyday | अथवा (ind) | or, else |
| सुखार्थम् | for pleasure | | |

पुरा स्वर्गलोके इन्द्रो देवानां नृपोऽभवत् । यथा पृथिव्यां नराणां नृपा भवन्ति, तथैव स्वर्गलोके देवानां नृप इन्द्रः । तस्य सभायां बह्व्यो देवकन्याः प्रतिदिनं नृत्यन्ति स्म । तासु देवकन्यासु मेनका नाम काचित् सुन्दर्यवर्तत । कदाचित् सा स्वर्गलोकात् पृथिवीमगच्छत् । यदा सा पृथिव्यामभ्राम्यत्तदा सा कस्मिन्नपि वने कञ्चन मुनिमपश्यत् । सा तस्य मुनेः समीपं गत्वा चिरं तस्य मुखमैक्षत । स मुनिर्नेत्रे निमील्येश्वरमेव चिन्तयति स्म । तस्य मुनेः पुरतः स्थित्वा मेनका तमपृच्छत् । हे मुने, कस्त्वम्? किं तव नाम? त्वं कं चिन्तयसि? त्वं सुन्दरो भवसि । त्वां दृष्ट्वाहं सुखं लभे । अपि त्वं मां दृष्ट्वा सुखं लभसे? इति । तस्या नार्यास्तद्वचनं श्रुत्वा स मुनिस्तां नारीमैक्षत । अतीव सुन्दरं तस्या मुखं शरीरं चेक्षित्वा स मुनिरीश्वरमपि व्यस्मरत् । सोऽचिन्तयत् - कैषा नारी? नाहमेतां कदाप्यत्र वन ऐक्षे । एषातीव सुन्दरी । एतस्या मुखं चन्द्र इव शोभते । यद्येषा मे भार्या भवेत्तर्ह्यहमेतस्याः कृत ईश्वरमपि त्यजेयम् । इति चिन्तयित्वा स मुनिस्तां नारीमभाषत - हे नारि, अहं विश्वामित्रो नाम मुनिः । पुराहं नृपोऽवर्ते । किन्त्वीश्वरं द्रष्टुमहं वनमागत्य तपः करोमि । अहं चिरं न कामपि नारीमपश्यम् । तथाप्यद्य त्वां दृष्ट्वाहं तुष्यामि । अहं तुभ्यमेवाद्य स्पृहयामि । त्वं मे भार्या भवेति त्वामद्याहमर्थये । त्वया सहाहं सुखं लभेय, मया च सह त्वमपि सुखं लभेथाः । मम तपसा प्रसन्न ईश्वर एव मम भक्तेरेतत्फलं मह्यं यच्छतीत्यहं मन्य इति । तस्य मुनेस्तन्मधुरं वचनं श्रुत्वा प्रसन्ना सा मेनका तेन मुनिना सहैव तस्मिन् वनेऽवसत् । अथ तयोरेका कन्याजायत । यदा सा कन्याजायत, तदैव विश्वामित्रो मुनिर्मेनकां त्यक्त्वान्यत्रागच्छत् । तदैव स्वर्गलोक इन्द्रो मेनकामस्मरत् - क्व सा मेनका? सा स्वर्गलोकं पुनरागत्य मम सभायां नृत्यत्विति । ततः सा मेनकापि स्वां कन्यां पृथिव्यां वन एव त्यक्त्वा स्वर्गलोकमगच्छत् । तदा तां वने पतितां बालां दृष्ट्वा सर्वे शकुन्तास्तस्याः समीपमागच्छंस्तस्यै च स्वमन्नं जलं चायच्छन् । एवं शकुन्तास्तामरक्षन् सा चावर्धत । अथैकदा कण्वो नाम मुनिस्तां बालिकां वनेऽविन्दत् । स च तां स्वमाश्रमं नीत्वा तामपालयत् । स कण्वो मुनिरेव मे जनक इति सामन्यत । स च तां स्वां कन्याममन्यत । यदा सा कन्या तरुण्यभवत्, तदा दुष्यन्तो नाम नृपस्तां कण्वस्य मुनेराश्रम ऐक्षत । तां दृष्ट्वा प्रसन्नो दुष्यन्तो नृपस्तामार्थयत - किं तव नाम? त्वां दृष्ट्वा प्रसन्नोऽहं त्वां मे भार्यामिच्छामीति । ततः सावदत् - हे नृप, मम नाम शकुन्तलेति । यदि मम पुत्र एव त्वदनन्तरं नृपो भवेत्तर्ह्येवाहं तव भार्या भवेयमिति । तथा भवत्विति दुष्यन्तः शकुन्तलामभाषत । ततः सा तस्य भार्याभवत् । तयोर्भरतो नाम पुत्रोऽजायत । स एव दुष्यन्तादनन्तरं नृपोऽभवत् । भरतो यस्य देशस्य नृपः स भारतो देशः । तस्माज्जनास्तं देशं भारतदेशं वदन्ति ।

## Vocabulary

पुरा (ind) in the past
देव (m) god
बह्वी (f) many
प्रतिदिनम् (ind) everyday
नाम (ind) name
समीपम् (ind) near
मुख (n) face
निमील्य gerund, having closed
श्रुत्वा gerund, having heard
वि+स्मृ (1P) to forget
शुभ् (1A) to shine
आगत्य gerund, having come
प्रसन्न (a) pleased
अथ (ind) then
अन्यद् (prn) another
शकुन्त (m) bird
बालिका (f) little girl
वर्धयति, caus. of वृध् (1A), to raise, to bring up
दुष्यन्त (m) name of a king
देश (m) country, region
इन्द्र (m) name of a god
पृथिवी (f) earth
देवकन्या (f) nymph
मेनका (f) name of a nymph
सुन्दरी (f) beautiful girl
चिरम् (ind) for a long time
नेत्र (n) eye
सुन्दर (a) beautiful, handsome
अतीव (ind) exceedingly
इव (ind) like
विश्वामित्र (m) name of a sage
तपस् (n) penance
मधुर (a) sweet
कन्या (f) daughter, girl
पतित (a) fallen
कण्व (m) name of a sage
आश्रम (m) hermitage
भारतदेश (m) India, Bharata's country
भरत (m) Duṣyanta's son
तरुणी (f) young girl

## वानर-मकर-कथा (3)

अथ पुरा नर्मदा-नदी-तीरे कस्मिंश्चिद्वृक्षे सुमतिर्नाम वानरो वसति स्म। स सदैव तस्य वृक्षस्य मधुराणि फलान्यखादत्। एकदा तस्य हस्तादेकं फलं नद्या जलेऽपतत्। तदा च मधुरः ध्वनिः "टप् टप्" इत्यजायत। तेन ध्वनिना प्रसन्नः स वानरो बहूनि फलानि जले प्राक्षिपदमाद्यच्च। तस्यां नद्यां कश्चिन्मकरो मकरी चावसताम्। स मकरः कदाचित् नद्यास्तीरमागच्छत्। वानरेण क्षिप्तानि फलानि चाभक्षयत्। तानि मधुराणि फलानि मकरायारोचन्त। एवं स मकरः प्रतिदिनं तत्र नदीतीरमगच्छत् फलानि चाखादत्। मकरो मकर्याः कृते तानि फलानि गृहमनयत्। कालेन वानर-मकरयोर्मैत्र्यभवत्। वानरः प्रतिदिनं मित्राय मकराय मधुराणि फलान्ययच्छत्।

एकदा मकर्यचिन्तयत् - यो वानरः प्रतिदिनं मधुराणि फलानि खादति तस्य हृदयमपि मधुरं भवेदिति। सा मकरी मकरायावदत् - हे प्रिय, अहं तव मित्रस्य वानरस्य हृदयं खादितुमिच्छामीति। तदा मकरोऽवदत् - स वानरो मे मित्रम्। कथं मित्रस्य हृदयं भक्षयेरिति। ततः मकरी अभाषत - यद्यहं वानरस्य हृदयं न लभेय, नाहं जीवेयम्। वानरस्य हृदयं मे यच्छ, अन्यथा मां मृतां पश्येति। ततो मकरोऽवदत् - एवं भवतु। वानरस्य हृदयं तव कृत आनयेयमिति।

मकरो नदीतीरमगच्छद्वानरं चावदत् - हे मित्र, अद्य त्वं भोजनाय मम गृहमागच्छेति। वानरोऽभाषत - हे मकर, तव गृहं जले, मम गृहं भूमौ। कथमहं तव गृहमागच्छेयमिति। मकरोऽवदत् - मम पृष्ठे त्वमुपविश, ततोऽहं त्वां मम गृहं नयेयमिति। वानरो मकरस्य पृष्ठ उपाविशत्। मकरश्च जलस्य मध्येऽगच्छद्वानरं चावदत् - अधुनेश्वरं स्मर। मम भार्या तव हृदयं खादितुमिच्छतीति। वानरो भीतोऽपि मार्गमचिन्तयत्। स मकरमवदत् - हे मित्र, अहं मम हृदयं सदा वृक्षस्य कोटरे रक्षामि। यदि मां पुनर्वृक्षं प्रति नयेस्तर्ह्यहं तुभ्यं मम हृदयं यच्छेयमिति। मूर्खो मकरो वानरं पुनस्तीरं प्रत्यनयत्। वानरस्तीरमगच्छद्वृक्षमरोहन्मकराय चावदत् - हे मूर्ख, भक्षय मकर्या हृदयमिति।

**Vocabulary**

| | | | |
|---|---|---|---|
| पृष्ठ (n) | back | अन्यथा (ind) | otherwise, or else |
| वानर (m) | monkey | क्षिप्त (a) | thrown |
| मकर (m) | crocodile | मकरी (f) | female crocodile |
| हृदय (n) | heart | भोजन (n) | meal |
| कोटर (n) | hollow of a tree | खादितुम् inf. | to eat, infinitive |
| नर्मदा (f) | name of river | ध्वनि (m) | noise |
| मैत्री (f) | friendship | सदा (ind) | always |

## रामकथा (4)

पुरा भारतदेशेऽयोध्यानगरे दशरथो नाम नृपोऽभवत्। तस्य नृपस्य कौसल्या सुमित्रा कैकेयीति तिस्रो भार्या अवर्तन्त। ईश्वरस्य प्रसादेन दशरथस्य चत्वारः पुत्रा अजायन्त। रामो लक्ष्मणो भरतः शत्रुघ्नश्चेति। रामस्य माता कौसल्या। लक्ष्मणः शत्रुघ्नश्च सुमित्रायाः पुत्रौ। भरतश्च कैकेय्याः पुत्रः। एकदा केनचित्कारणेन प्रसन्नो दशरथः कैकेयीमभाषत - यत् त्वयेष्यते, तदहं करिष्यामीति। तां नृपस्य वाचं श्रुत्वा कैकेय्यभाषत - हे भर्तः, अद्य मया न किमपीष्यते, किन्तु यदा मम काचिदिच्छा भविष्यति तदाहं तुभ्यं कथयिष्यामीति। बहोः कालादनन्तरं दशरथो रामं युवराजं कर्तुमैच्छत्। यदा पूर्वो राजा म्रियते तदा युवराजो राजा भवति। मम मरणादनन्तरं राम एव राजा भवत्विति दशरथ ऐच्छत्। दशरथो रामं युवराजं कर्तुमिच्छतीति यदा कैकेय्यबोधत्तदा तस्या मनः क्रोधेनानल इवाभवत्। मम पुत्रो भरत एव युवराजो भवत्विति साचिन्तयत्। एवं चिन्तयित्वा सा दशरथायावदत् - यदहमिच्छामि तत्त्वं करिष्यसि। तव वाचं स्मर। त्वं सत्यमेव भाषस इत्यहं मन्ये। मम पुत्रो भरत एव युवराजो भवतु। कौसल्यायाः पुत्रो रामश्च चतुर्दश वर्षाणि वनाय गच्छत्विति म इच्छा। यदि त्वं तथा न करिष्यसि तर्हि तव वागसत्या भविष्यति त्वं च नरकं गमिष्यसीति। तच्छ्रुत्वा शोकेन दशरथोऽवदत् - हे कैकेयि, अहं तव पुत्रं भरतं युवराजं करिष्यामि। किन्तु रामो मा वनाय गच्छत्विति। कैकेय्या मनः पाषाण इव कठिनमजायत। सावदत् - हे नृप, भरतो युवराजो भवतु, रामोऽपि वनाय गच्छत्विति। तथेति भाषित्वा दुःखेन दशरथो रामायाकथयत् - हे राम, त्वं न युवराजो भविष्यसि। कैकेय्या वचनेन त्वं चतुर्दश वर्षाणि वनाय गच्छेति। तथेति भाषित्वा रामः सीतया लक्ष्मणेन च सह वनाय प्रातिष्ठत। रामो वनं गच्छतीति श्रुत्वा दुःखेन दशरथोऽम्रियत।

यत्र वने रामः सीतया लक्ष्मणेन च सहावसत्तत्रैव शूर्पणखा नाम राक्षसी वसति स्म। सा लङ्काया नृपस्य रावणस्य भगिनी। सा रामं दृष्ट्वा प्रसन्ना तस्मा अभाषत - हे राम, सुन्दरस्त्वम्। अहं तव भार्या भवितुमिच्छामि। आवामेतां सीतां परित्यज्य सुखेन जीविष्याव इति। तच्छ्रुत्वा क्रोधेन रामो लक्ष्मणायाभाषत - हे लक्ष्मण, एतस्या राक्षस्याः कर्णौ नासिकां च शस्त्रेण कृन्तेति। भ्रातुर्वचनं श्रुत्वा लक्ष्मणः शूर्पणखायाः कर्णौ नासिकां च शस्त्रेणाकृन्तत्। दुःखेन क्रन्दन्ती सा शूर्पणखा धावित्वा लङ्कामगच्छत्। भ्रात्रे रावणाय चावदत् - हे भ्रातः, पश्य मे कर्णौ नासिकां च। तवारे रामस्य वचनात्तस्य भ्राता लक्ष्मणो मे कर्णौ नासिकां चाकृन्तत्। भ्रातः, कथं तव क्रोधो न जायते। त्वमपि रामस्य भार्यामपहरेति। ततोऽनन्तरं रावणो रामस्य भार्यां सीतामपाहरत्। सीतां मोचयितुं रामो लङ्कां गत्वा रावणमहन्। रावणस्य भ्रातरं बिभीषणं लङ्काया नृपत्वे स्थापयित्वा रामः सीतया लक्ष्मणेन च सह पुनरयोध्यानगरीमगच्छत्। तत्र स दशवर्ष-सहस्राणि राजाभवदिति रामायणकाव्ये कथ्यते।

## Vocabulary

दशरथ (m) name of a king
सुमित्रा (f) name of a queen
तिस्रः < त्रि (f) three
चत्वारः < चतुर् (m) four
लक्ष्मण (m) name of a prince
शत्रुघ्न (m) name of a prince
श्रुत्वा gerund, having heard
युवराज (m) crown-prince
पूर्व (prn) former, previous
करिष्यसि < कृ (8P) to make, do
वर्ष (n) year
नरक (m) hell
पाषाण (m) rock
सीता (f) Rāma's wife
राक्षसी (f) demoness
रावण (m) demon-king of Lanka
नासिका (f) nose
अप+हृ (1P) to snatch, carry off
दशवर्षसहस्र (n) 10,000 years
अहन् < हन् (2P) to kill, killed
नृपत्वे स्थापयित्वा having made him the king, caus. of स्था 1P

कौसल्या (f) name of a queen
कैकेयी (f) name of a queen
प्रसाद (m) kindness, favor
राम (m) name of a prince
भरत (m) name of a prince
करिष्यामि < कृ (8P) to make, do
काल (m) time
कर्तुम् inf. कृ(8P, A) to make, do
क्रोध (m) anger
चतुर्दश (a) fourteen
असत्य (adj) untrue, false
शोक (m) pain, grief
कठिन (a) hard
शूर्पणखा (f) Rāvaṇa's sister
लङ्का (f) island of Sri Lanka
कर्ण (m) ear
क्रन्दन्ती (f) screaming, crying
मोचयितुम् inf. caus. of मुञ्च (6P) to release, to free
बिभीषण (m) Rāvaṇa's brother

श्रावणो नाम कश्चिद्युवकः कस्मिंश्चिन्नगरेऽवसत् । तस्य माता पिता च वृद्धावभवताम् । तस्य न कश्चिद् भ्राता वा भगिनी वावर्तत । तौ वृद्धौ पितरौ चलितुं द्रष्टुं चासमर्थावविद्येताम् । तथापि श्रावणस्य पितरौ प्रति महती भक्तिरभवत् । अथैकदा श्रावणस्य माता भर्तारमवदत् - हे भर्तः, आवामधुना वृद्धौ । कदा नौ मरणं भविष्यतीत्यावां न बोधावः । मरणात्प्रागहं काशीनगरं गत्वा तत्र गङ्गानद्यां स्नातुमिच्छामि । तत आवां श्रावणं प्रक्ष्यावः । स आवां काशीनगरीं नेष्यतीति । एवं मन्त्रयित्वा तौ पितरौ श्रावणमभाषेताम् - हे प्रियपुत्र श्रावण, आवां गङ्गायां स्नातुं काशीपुरं गन्तुमिच्छाव इति । पित्रोर्भक्त्या श्रावणेनाभाष्यत - यथा युवामिच्छथस्तथाहं युवां काशीपुरं नेष्यामीति । दरिद्रस्य श्रावणस्य गृहे किञ्चित्पुराणं शकटमवर्तत । किन्तु तच्छकटं क्रष्टुमश्वो नाभवत् । चलितुमसमर्थौ तौ पितरौ शकटे स्थापयित्वा श्रावणः स्वयमेव तच्छकटं मार्गेणाकर्षत् । शकटं कर्षन्तं श्रावणं दृष्ट्वा मार्गेण गच्छन्तो जनास्तस्य भक्तिमशंसन् । पितरौ काशीनगरीं नयतः तस्य मार्गे किञ्चिद्वनमवर्तत । शकटं कृष्ट्वा परिश्रान्तः स श्रावणो रात्रौ कस्यचिद्वृक्षस्याधस्तत् शकटं स्थापयित्वा मात्रा पित्रा च सह निद्रां लब्धुमैच्छत् । तस्य पितरावपि परिश्रान्तौ पयः पातुमिच्छन्तौ पुत्रायाकथयताम् - हे पुत्र, आवां पयः पातुमिच्छावः । तत एतस्मिन् पात्रे कुतश्चित्किञ्चिज्जलमानय । अत्रैव काचिन्नदी कश्चिद् ह्रदः कूपो वा भवेदिति । जलमानेष्यामीत्युदित्वा श्रावणो जलमानेतुं करयोः पात्रमेकमादाय कञ्चिद् ह्रदं गत्वा तत्र जलेन तत्पात्रं पूरयितुमारब्धवान् ।

तस्यैव ह्रदस्य समीपं कस्मिंश्चिद्वृक्षे मृगयार्थं स्थितो दशरथो नाम नृपतिस्तमसि जलस्य ध्वनिमशृणोत् । सोऽचिन्तयत् - रात्रौ कश्चित्पशुर्ह्रदस्य जलं पातुमागत इति । एवं मत्वा स भूभृद्यस्यां दिशि जलस्य ध्वनिरभवत्तस्यां दिशि निशितमिषुं प्राक्षिपत् । दशरथस्येषुणा विद्धः श्रावणो भूमौ पतन्नेवाभाषत - हा हा पितः, हा हा मातः, इषुणा विद्धोऽहं प्रिय इति । तन्मनुष्यस्य वचनं श्रुत्वा - हा किमेतदभवदिति भाषमाणो नृपः श्रावणं प्रत्यधावत् । तस्योरसः स तमिषुं निष्कृष्य तस्मै म्रियमाणायावदत् - नाहं त्वां हन्तुमिषुं प्राक्षिपम् । किन्तु तमसि त्वमेव ममेषुणा विद्धः । किमहं करिष्यामि? कथं त्वां रक्षिष्यामीति । एवं नृपेण भाष्यमाणो म्रियमाणः श्रावणोऽवदत् - हे नृप, अहं तु मरिष्याम्येव । किन्तु मे मात्रे पित्रे चैतज्जलं प्रयच्छेति । इति वदन्नेव श्रावणोऽम्रियत । दुःखेन कराभ्यां शीर्षं स्पृशन् स नृपः पात्रे जलमादाय श्रावणस्य वृद्धौ पितरावुपागच्छत् । द्रष्टुमसमर्थौ तौ श्रावणं प्रतीक्षमाणौ पितरौ श्रावण एव आगच्छतीति मत्वामोदेताम् । किमप्यभाषित्वैव नृपस्ताभ्यां जलं दातुं प्रायतत । किन्तु वृद्धौ तौ पितरावभाषेताम् - हे श्रावण, कुतस्त्वं न भाषसे? कुतस्त्वं कुप्यसि? यदि त्वं न भाषेथास्तर्हि नावां जलं पास्याव इति । अगतिको नृपोऽवदत् - दशरथो नाम नृपोऽहम् । अज्ञानान्मया क्षिप्तेनेषुणा विद्धः श्रावणो ह्रदस्य तीर एवाम्रियत । नाहं तं हन्तुमैच्छम् । किन्तु पशुं हन्तु-

मिच्छता मया तमसि युवयोः पुत्र एवेषुणा हतः । कथमहमेतत्पापं निराकरिष्यामि । अहं युवां मम प्रासादं नीत्वा सेविष्ये । मामेव युवां पुत्रं मन्येयाथामिति । पुत्रस्य मरणेन विद्धौ तौ पितरौ नृपमवदताम् - हे नृप, यत्रावयोः पुत्रस्तत्रैवावां गमिष्यावः । नावामेतज्जलं पास्यावः । पुत्रस्य मरणेन यदावयोर्दुःखमजायत तत्त्वं नाधुना बोधसि । किन्तु यथावां पुत्रस्य शोकेन मरिष्यावस्तथा त्वमपि तव पुत्रस्य शोकेन मरिष्यसीति । एवं भाषित्वा तौ वृद्धौ तत्रैव वने जीवनमत्यजताम् । मृतं श्रावणं तस्य पितरौ च तत्रैव वने दग्ध्वा दशरथो दुःखेन स्वं प्रासादं प्रत्यगच्छत् । यदा दशरथस्य पुत्रो रामो राज्यं त्यक्त्वा वनाय प्रातिष्ठत तदा दशरथोऽपि शोकेनाम्रियत ।

**Vocabulary**

| | | | |
|---|---|---|---|
| श्रावण (m) | name of a young man | युवक (m) | young man |
| महती (adj, f) great | | काशीनगर (n) | city of Kāśī |
| गङ्गानदी (f) the river Ganges | | स्नातुम् inf. | स्ना (2P) to bathe |
| दरिद्र (a) | poor | पुराण (a) | old |
| शकट (n) | cart | परिश्रान्त (a) | tired |
| स्थापयित्वा, caus. स्था (1P) | | निद्रा (f) | sleep |
| | having placed, stopped | अगतिक (a) | having no choice |
| पूरयितुम् | inf. of पॄ to fill | आरब्धवत् (a) | began |
| मृगयार्थम् | (ind) for hunting | अशृणोत्, श्रु | 5P, to hear |
| ध्वनि (m) | noise | निशित (a) | sharp |
| विद्ध (a) | hurt | मनुष्य (m) | man, human |
| श्रुत्वा, श्रु | (5P, A) to hear | निष्कृष्य, निस्+कृष् | 1P, to pull |
| हन्तुम्, हन् | (2P) to kill | करिष्यामि, कृ | 8P, to make, do |
| प्रतीक्षमाण | awaiting, प्रति+ईक्ष्, 1A. | अभाषित्वा, भाष् | 1A, to speak |
| प्रायतत, प्र+यत्, 1A, to strive | | | with negative अ |
| दशरथ (m) name of a king | | क्षिप्त (a) | thrown, shot |
| हत (a) | killed | पाप (n) | sin |
| निराकरिष्यामि, निर्+आ+कृ remove | | सेविष्ये, सेव् | 1A, to serve |
| शोक (m) | grief | क्रष्टुम् inf. कृष् | 1P, to pull |
| आकर्षत्, आ+कृष्, 1P, to pull | | आगत (a) | he who had come |
| प्रिय (a) | dear | समीपम् (ind) | near |
| स्थित (a) | standing | राज्य (n) | kingdom |

भारतदेशे दण्डकं नाम वनमवर्तत। बहवः पशवः खगाश्च तच्चारु वनमध्यतिष्ठन्। तस्मिन् वने बह्व्यो नद्यो बहवश्च ह्रदा अविद्यन्त। तत्र सुमतिर्नाम काकश्चित्राङ्गो नाम मृगश्च सुखेनावसताम्। काको मृगस्य मित्रं मृगश्च काकस्य। यथा काकस्य दुःखेन मृगो दुःखमन्वभवत्, तथैव मृगस्य दुःखेन काकोऽपि दुःखमन्वभवत्। एकस्य सुखेनान्यस्य सुखमजायत। एकदा स मृगस्तृणं खादितुं वने पर्यभ्राम्यत्। कश्चिच्छृगालस्तं पीनं मृगमपश्यत्। तमीक्षित्वा स शृगालोऽचिन्तयत् - कथमेतस्य पीनस्य मृगस्य स्वादु मांसं भक्षयेयमिति। एतया क्षुद्रया मत्या स शृगालस्तं मृगमुपगम्य व्याहरत् - हे मित्र, नमस्ते। अपि ते सुखं वर्धत एतस्मिंश्चारुणि वन इति। तं शृगालं सर्वतो निरीक्ष्य स मृगोऽवदत् - कस्त्वम्? सर्वाणि मम मित्राणि बोधाम्यहम्। त्वां त्वहं न कदाप्येतस्मिन् वनेऽपश्यम्। कुतस्त्वमागच्छसि। कुतस्त्वं मां मित्रं मन्यस इति। शृगालोऽभाषत - क्षुद्रमतिर्नाम शृगालोऽहम्। मम सर्वा भार्याः पुत्राश्चानले मृताः। मित्राणि च मे न क्वापि भवन्ति। ततोऽहमेक एव मृत इव जीवामि। यस्य नरस्य मित्राणि न भवन्ति तस्य जीवने सर्वमेव दुःखम्। तस्य जीवनं मरणमेव। अधुना त्वां दृष्ट्वा प्रसन्नोऽहं त्वां मित्रं मन्ये। त्वया मित्रेण सहाहं सुखेन जीवेयमिति। मृगोऽवदत् - यस्त्वमेवं भाषसे, स त्वं साधुरेव। अहमपि त्वां मित्रं लब्ध्वा प्रसन्नः। आगच्छ। एतस्मिन् वन आवां सुखेन वसेवेति। मृगस्य मित्रं काकस्तस्मा अवदत् - एष शृगालो यद्यपि स्वादूनि वचनानि भाषते, तथापि तस्य सर्वाणि वचनानि सर्वदा परीक्षस्व। सर्वे शृगालाः सर्वदा क्षुद्रा एव भवन्ति। एतस्य नामापि क्षुद्रमतिरिति।

एकदा शृगालो मृगमवदत् - एतस्मिन्नेव वने किञ्चित् क्षेत्रमहमैक्षे। तद्धान्येन पूर्णं भवति। तत्राहं त्वां नेतुमिच्छामि। तद्धान्यं खादित्वा यदि त्वं पीनो भवेस्तर्हि त्वां पीनं दृष्ट्वा सुखेनैवाहं पीनो भवेयमिति। मित्रस्य वचनेन प्रसन्नः स मृगो धान्यं खादितुं तत् क्षेत्रमगच्छत्। तत्रैव स जालेऽपतत्। मृगं जाले पतितं दृष्ट्वा प्रसन्नः स शृगालः सुखेनानृत्यत्। सोऽचिन्तयत् - यदैतस्य क्षेत्रस्य पतिर्मृगं हत्वा भूमौ क्षिपेत्, तदाहं सुखेन तत् स्वादु मांसं खादेयमिति। जाले पतितो मृगस्तत्रैव मृत इवातिष्ठत्। तं मृतं मत्वा क्षेत्रस्य पतिस्तं जालादमुञ्चत्। जालान्मुक्तः स मृगो वेगेन वनं प्रत्यधावत्। तं मृगं हन्तुं क्षेत्रस्य पतिर्दण्डं प्राक्षिपत्। तेन दण्डेन स क्षुद्रः शृगाल एवाम्रियत।

**Vocabulary**

| | | | |
|---|---|---|---|
| **धान्य** (n) | grain | **पूर्ण** (a) | filled |
| **जाल** (n) | net, trap | **क्षेत्र** (n) | field, farm |
| **वेग** (m) | speed | **दण्ड** (m) | stick, club |

## नल-दमयन्ती-कथा (7)

पुरा भारतदेशे वीरसेनो नाम नृपोऽभवत् । तस्य पुत्रो नलो नाम । वीरसेनादनन्तरं नलो राज्यमविन्दत् । स वीरतमो नलः सर्वेषाञ्जनानां प्रिय आसीत् । महत्तमं तस्य तेजः । तं दृष्ट्वा तस्य सर्वेऽरयो भयेनाकम्पन्त, मित्राणि चामोदन्त ।

तस्मिन्नेव काले विदर्भदेशे भीमो नाम भूभृदवर्तत । चिराय पुत्रमिच्छन्नपि स पुत्रं नालभत । सर्वाः सम्पदस्तस्य प्रासाद आसन् । किन्तु पुत्रं विना स नृपः स्वमायुर्दुःखमेव अमन्यत । एकदा दमनो नाम कश्चिन्मुनिस्तस्य भीमस्य नगरीमागच्छत् । भीमो भार्यया सह दमनस्य मुनेराश्रमं यात्वा तं मुनिं नत्वा बहुभिर्वचनैरस्तवीत् । स मुनिर्भूभृतेऽब्रवीत् - हे नृप, तुभ्यमहमिदं फलं दास्यामि । य इदमद्यात् स यदाशासीत तद्भविष्यतीति । मुनेस्तद्वचनं श्रुत्वा भूभृता तत्फलं खादितम् । अनन्तरं तस्य नृपस्य दमयन्ती नाम कन्या त्रयः पुत्राश्चाजायन्त । दमयन्ती सर्वासु नारीषु रूपेण तेजसा च महत्तमं यशोऽलभत । सर्वे नृपा देवाश्च दमयन्तीं भार्यात्वेनैच्छन् ।

एकदा वने भ्राम्यन् नलः कञ्चन हंसं जग्राह । भीतः स हंसोऽरोदीत् । नलाय चाब्रवीत् - हे नृप, मा मां जहि । यदि त्वं मां मोक्ष्यसि तर्हि तव प्रियं किञ्चित् करिष्यामि । दमयन्तीं प्रति गत्वाहं तव गुणान् तस्यै कथयिष्यामीति । नलेन मुक्तः स हंसो विदर्भदेशं गत्वा भीमस्य नृपस्य प्रासादं प्रविश्य दमयन्त्यै नलस्य गुणानकथयत् । भीमस्य कन्या नलस्य गुणैः प्रसन्ना तमेव भर्तारमैच्छत् । हंसश्च प्रतिनिवृत्य तत्सर्वं नलायाकथयत् ।

सर्वदा नलमेव चिन्तयन्ती दमयन्ती न किमप्यन्नमादत् कृशा चाभवत् । कन्यायाः स्वयंवरः कार्य इति मत्वा भीमो नृपः सर्वान् भूभृतो विदर्भदेशं न्यमन्त्रयत् । दमयन्तीमिच्छन्तः सर्वे नृपाः विदर्भदेशमयुः । देवा अपि दमयन्तीमिच्छन्तो विदर्भदेशमयुः । दमयन्ती नलमेव भर्तारं लब्धुमाशास्त इति बोधन्तो देवा नलस्यैव रूपं धारयित्वा स्वयंवरस्य स्थानमगच्छन् । बहून् नलान् स्वयंवरस्य स्थाने दृष्ट्वा दमयन्ती सम्भ्रान्ताभवत् । एतेषु नरेषु कः सत्यमेव नलः के च देवा इति अजानन्ती सा तानेव देवान् भक्त्या प्राणमत् । ततस्ते देवाः स्वानि रूपाण्यधारयन् । दमयन्ती च नलं वरयामास । गुणवन्तं नलं गुणवतीं च दमयन्तीं सर्वे जना देवाश्चास्तुवन् ।

**Vocabulary**

| | | | |
|---|---|---|---|
| नल (m) | name of a king | दमयन्ती (f) | name of a princess |
| पुरा (ind) | in ancient times | वीरसेन (m) | name of a king |

राज्य (n) kingdom
कम्प् (1A) tremble
विदर्भदेश (m) region of Vidarbha
चिराय (ind) for a long time
त्रयः < त्रि three
भीत (a) afraid, scared
कृश (a) thin, emaciated
नि+मन्त्र् (10P) to invite
सम्भ्रान्त (a) confused
वरयामास chose (Perfect of वृ 10P)

भय (n) fear
काल (m) time
भीम (m) name of a king
दमन (m) name of a sage
रूप (m) form, shape, beauty
प्रति+नि+वृत् 1A to return
स्वयंवर (m) the election of a husband by a princess at a public assembly of suitors

## कालिदासकथा (8)

भारतदेशे पुरा कालिदासो नाम महाकविर्बभूव । तस्येयं कथा श्रूयते । तरुणः कालिदास उज्जयिनीनगरेऽवसत् । तस्य बुद्धिर्नासीदेव । किन्तु स सुरूपोऽभवत् । एकदा राजा राजकन्याया विवाहः कार्य इत्यघोषयत् । यो नरः सर्वेषु जनेषु पण्डिततमो भवेत्तस्मै राजकन्या प्रदीयेत । केचिद्दुर्जना राजकन्यां प्रति गत्वा तामेवमकथयन् - हे राजकन्ये, नगरेऽस्मिन् कालिदासो नाम महापण्डितो निवसति । स एव तव पतिर्भवतु । तेन सह तव जीवितं सुखमयं भवेदिति । तद्वचनं श्रुत्वा सा राजकन्या कालिदासमेवाचिन्तयत् । नान्यं पुरुषम् । अन्ते च तस्याः कालिदासेन सह विवाहो जातः । अपि तु कालिदासो महान् अपण्डित इति सा विवाहादनन्तरमबोधत् । सा कालिदासमवदत् - रे मूर्ख, मा मां स्पृश । नाहमिच्छामि त्वामपण्डितं द्रष्टुम् । यत्र क्वापि गच्छेति । ततः कालिदासस्तन्नगरं त्यक्त्वा वनं गतः । वने च स कालीदेव्या मन्दिरमपश्यत् । तत्र स देव्या भक्तिं चकार । बहुना कालेन प्रसन्ना देवी तस्मै बुद्धिं प्रायच्छत् । एवं देव्याः प्रसादेन स महाकविर्बभूव । तस्मात्तं जनाः कालिदास इति वदन्ति ।

### Vocabulary

| | | | |
|---|---|---|---|
| कालिदास (m) | name of a poet | तरुण (a) | young |
| महाकवि (m) | great poet | उज्जयिनी (f) | name of a city |
| महापण्डित (a) | great scholar | महा+अपण्डित (a) | great fool |
| विवाह (m) | wedding | कालीदेवी (f) | goddess Kālī |
| सुखमय (a) | full of happiness | | |

## सुकन्याकथा (9)

पुरा भारतदेशे गङ्गानद्यास्तीरे खाण्डवं नाम महद्वनमासीत्। तस्मिन्वने केचिन्मुनयो गोपाला अविपालाश्चावसन्। ते मुनय ईश्वरमेव चिन्तयितुमिच्छन्तो ग्रामनगराणि परित्यज्य वनमागत्य तपः पूजां यज्ञांश्चान्वतिष्ठन्। तस्मिन्वने न केवलं मुनयोऽपि तु पशवोऽपि बभूवुः। किन्तु ते पशवो मुनीनां प्रभावेण शान्तिभावमागता न परस्परमहिंसन्। सिंहा व्याघ्राः शृगालाश्च धेनुभिर्मृगैश्च सह तस्मिन्वने सुखेनावसन्। तत्रैव कस्यचिद्वृक्षस्याधः स्थितश्च्यवनो नाम मुनिर्वर्षसहस्रं यावत्तीव्रं तपश्चकार। स सर्वेषां मुनीनां पितामह इवाभूत्। दीर्घं कालं यावत् स च्यवनो मुनिरेकस्मात्स्थानादन्यत्र न जगाम। सोऽन्नमपि नाभक्षयज्जलमपि च नापिबत्। स वर्षशतं यावद्वृक्ष इवातिष्ठत्। नैष नरो नेत्रमपि विचालयतीति यदा सर्पा विहगाश्चाबोधंस्तदा ते भीतिं परित्यज्य तस्य समीपमागत्यावसन्। केचित्सर्पाश्च्यवनस्य केशेषु निजं गृहं चक्रुः।

अथैकदा शर्यातो नाम कश्चिद्राजा पुत्रैः कन्याभिर्भार्याभिश्चम्वा च सह ग्रामान्तरं गच्छंस्तस्मिन्वने कानिचिद्दिनान्यवसत्। तत्र वसतस्तस्य नृपस्य पुत्रा वने खेलन्तस्तं च्यवनं मुनिमद्राक्षुः। सर्पैर्वेष्टितं निश्चलं तं वृद्धं नरं समीक्ष्य ते मूर्खा राजपुत्राश्चिन्तयामासुः - कोऽयं जीर्णो नरोऽत्र मृत इव वृक्षस्याधः सीदति? मृतो वा जीवति वेति कथं बोधाम इति। एवं चिन्तयित्वा ते बालाः किञ्चित्काष्ठमादाय च्यवनस्य ऋषेर्नेत्रे अभिन्दंस्तं च हसन्तो लोष्टैरतुदन्। यदा ते बालास्तमृषिमुपाहसंस्तदा सोऽकुप्यत्। कुपितः स मुनिः शर्यातं शशाप - सर्वे शर्यातजना असंज्ञा भवन्त्विति। च्यवनस्य शापेन सर्वे शर्यातजना असंज्ञा बभूवुः। पुत्रा मातॄर्लोष्टैरतुदन्। मातरो दुहितॄरताडयन्। सर्वे जना इतस्ततो भ्रमन्तो धावन्तश्च निजानि वस्त्राणि परित्यज्य वृक्षानारुह्य कपय इव बभ्रमुः। शर्यातश्च तत्सर्वमवलोक्य संभ्रान्तः कुतः समुत्पन्नापदेषेति चिन्तयामास। बहु चिन्तयन्नपि स एतस्या आपदः कारणं नाबोधत्।

तदा स शर्यातो गोपालांश्चाविपालांश्च समाहूयाब्रवीत् - अपि यूयमेतस्या आपदः कारणं बोधथेति। त ऊचुः - हे राजन्, तव पुत्रा एतं मृतमिव तिष्ठन्तं महामुनिमुपहसन्तो लोष्टैस्तमतुदंस्तस्य च नेत्रे काष्ठैरभिन्दन्। एतेनापकारेण कुपितः स महामुनिस्त्वामशपत्। एतत्कारणं तव जनानामसंज्ञाया इति। तद्गोपालानामविपालानाञ्च वचनं श्रुत्वा स राजा तस्य मुनेः क्रोधमपनेतुमुपायं चिन्तयामास।

कुपितं च्यवनं मुनिमुपगम्य शर्यात उवाच - हे मुने, त्वामजानद्भिर्मम पुत्रैर्महानपकारः कृतः। तं क्षन्तुमर्हति भवानिति। तमपकारमपनेतुं मम जनानां संज्ञाप्रतिलाभाय च यत्तवेष्टं तदहं करिष्यामि। तवेच्छां कथयेति। तच्छ्रुत्वा स मुनिरुवाच - हे नृप, महानपराधस्त्वया कृतः। मम क्रोधमपनेतुं मह्यं तव सुकन्यां नाम कन्यां प्रयच्छ। अन्यथा तव

जनानां संज्ञाप्रतिलाभो न कदापि भविष्यतीति। एतस्मा अतिवृद्धाय मुनये स्वीया तरुणी कन्या सुकन्या प्रदेयेति चिन्तयित्वा स शर्यातो दुःखितो बभूव। सुकन्यां प्रति गत्वा स उवाच - प्रियकन्ये सुकन्ये, अस्माकं जनानां संज्ञाप्रतिलाभायैक एवोपायो नान्यः कश्चित्। यदि त्वमेतस्यातिवृद्धस्य महामुनेश्च्यवनस्य भार्या भवेस्तर्ह्येवास्माकं जनानां संज्ञाप्रतिलाभो भविष्यतीति। पितुस्तामगतिकां वाचं श्रुत्वा निजकुलरक्षणाय सा सुकन्याब्रवीत् - हे तात, अलं चिन्तया। भवत्वेष वृद्धमुनिर्मे पतिरिति। पितृकुलरक्षणाय निजसुखमपि परित्यजन्ती सा सुकन्या वृद्धमुनेश्च्यवनस्य भार्या बभूव। पतिव्रता च सा तरुणी भार्या सुखहीनापि निजं वृद्धपतिं भक्त्या सेवमाना न कदापि परपुरुषमचिन्तयत्।

अथैकदा स्वर्गलोकादश्विनौ भूमावागतौ। अश्विनौ देवानां भिषजौ। तौ चातिसुन्दरौ बभूवतुः। वने विचरद्भ्यां ताभ्यां सुन्दरी सुकन्या वृद्धपतिं सेवमाना दृष्टा। तां दृष्ट्वा तयोर्मनसि कामो बभूव। तौ तां सुकन्यामभाषेताम् - हे सुकन्ये, परित्यज्यैतं वृद्धपतिमावां प्रति आगच्छ यथा त्वं कामसुखं लप्स्यस इति। तच्छ्रुत्वा साब्रवीत् - नाहमधर्ममाचरिष्यामि। यस्मै मां पितायच्छत्तं मे पतिं जीवन्तं न त्यक्ष्यामि। गच्छतं युवामन्यत्रेति। एवं भाषित्वा सा सुकन्या च्यवनं प्रति गत्वा सर्वं वृत्तान्तं न्यवेदयत्। च्यवनोऽब्रवीत् - साधु साधु सुकन्ये। धन्यासि। यदि तावश्विनौ पुनरागत्य तदेव वदेतां तर्हि त्वं तौ प्रति एवं भाषस्व - अज्ञौ युवामधर्मचारिणौ नरकं गमिष्यथः। यदि युवां मम पतिं पुनर्युवानं करिष्यथस्तर्हि स युवाभ्यां धर्ममुपदेक्ष्यतीति। तावश्विनौ पुनरागत्य सुकन्यां प्रति तदेवाभाषेताम्। सा च तौ प्रति पत्युर्वचनमभाषत। धर्मज्ञानमिच्छन्तावश्विनौ देवभिषजौ सुकन्यामवदताम् - सुकन्ये, अस्मात् स्थानान्नातिदूरं चिरयौवनो नाम दिव्यो ह्रदः। यदि तव पतिस्तस्मिन् ह्रदेऽवगाहेत तर्हि स युवा भविष्यतीति। अनन्तरं च्यवनस्तस्मिन् ह्रदेऽवगाह्य युवा बभूव। पतिव्रतया सुकन्यया सह युवा च्यवनश्चिरकालं रेमे। तौ दृष्ट्वा जना एवमभाषन्त - धन्या खल्वेषा सुकन्या या पतिव्रता भूत्वा धर्मबलेन पतिं युवानं चकार। अहो बलं धर्मस्येति।

**Vocabulary**

| | | | |
|---|---|---|---|
| सुकन्या (f) | name of a princess | खाण्डव (n) | name of a forest |
| गोपाल (m) | cowherd | अविपाल (m) | shepherd |
| अनु+स्था (1P) | to perform | न केवलम् | not only |
| प्रभाव (m) | power | शान्तिभाव (m) | state of peace |
| परस्परम् (ind) | one another | हिंस् 7P | to kill, injure |
| व्याघ्र (m) | tiger | च्यवन (m) | name of a sage |
| वर्षसहस्र (n) | 1000 years | तीव्र (a) | intense, harsh |
| पितामह (m) | grandfather | वर्षशत (n) | 100 years |

विचालयति, caus. of चल् to move
भीति (f) fear
निज (a) one's own
मग्न (a) immersed in
ग्रामान्तर (n) another town
निश्चल (a) motionless
जीर्ण (a) old, decrepit
ऋषि (m) sage
लोष्ट (m) clod, lump of earth
शप् 1P to curse
शाप (m) curse
वस्त्र (n) clothes
अवलोक्य, gerund, having seen
समुत्पन्न (a) produced
अ+विज्ञाय, neg gerund, not having recognized
क्रोध (m) anger
उपाय (m) means
अर्ह् 1P to be able, ought to
प्रतिलाभ (m) regaining
स्वीय (a) one's own
दुःखित (a) saddened
अगतिक (a) desperate
रक्षण (n) protection, preservation
दिव्य (a) divine
परिरक्षण (n) protection, preservation
हीन (a) without
पर (prn) another
काम (m) desire, love
वृत्तान्त (m) incident
धन्या असि Bravo! you are great
चारिन् (a) acting, doing
चिरयौवन (m) Eternal Youth

विहग (m) bird
केश (m) hair
चिन्तन (n) contemplation
शर्याति (m) name of a king
वेष्टित (a) surrounded, encircled
समीक्ष्य, gerund, having looked closely
काष्ठ (n) stick, club
भिद् 7P, A, to break, pierce
उप+हस् 1P to laugh at
असंज्ञ (a) crazy, mindless
इतस्ततः (ind) here and there
कपि (m) monkey
संभ्रान्त (a) confused
समाहूय, gerund, having called
अपकार (m) bad treatment
अव+गाह् 1A to plunge into
अपनेतुम्, inf. to take away
क्षन्तुम्, inf. to forgive
भवान् < भवत्, voc. sg. Sir
अपराध (m) offense, transgression
तरुणी (adj, f) young
प्रिय (a) dear
कुल (n) family
चिन्ता (f) worry, anxiety
धन्य (a) virtuous, happy, fortunate
पतिव्रता (f) dedicated to her husband
चिरकालम् (ind) for a long time
सेवमान (a) serving
अश्विनौ (m, dual) name of two divinities
अधर्म (m) unrighteous behaviour
निवेदयति to report
अज्ञ (a) ignorant
न अतिदूरम् not too far

पृथिव्यां त्रीणि रत्नानि जलमन्नं सुभाषितम् ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥ १ ॥

**सुभाषितम्** 'good saying'. **मूढः** 'fool'. **पाषाणखण्डः** 'piece of rock'. **रत्नसंज्ञा** 'the designation of jewel'. **वि+धा** (3P, A) 'to make, do'.

संसारकटुवृक्षस्य द्वे फले ह्यमृतोपमे ।
सुभाषितरसास्वादः सङ्गतिः सुजनैः सह ॥ २ ॥

**संसारः** 'mundane world'. **कटु** 'bitter'. **अमृत+उपम** 'comparable to nectar'. **रस+आस्वादः** 'enjoying the juice'. **सङ्गतिः** 'companionship'.

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति ।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात् ॥ ३ ॥

**अपूर्वः** 'amazing'. **कोशः** 'treasure'. **भारती** 'goddess of learning, Sarasvatī'. **व्ययः** 'spending'. **वृद्धिः** 'prosperity'. **क्षयः** 'decrease'. **सञ्चयः** 'hoarding, accumulation'.

अहो खलभुजङ्गस्य विपरीतो वधक्रमः ।
अन्यस्य दशति श्रोत्रमन्यः प्राणैर्विमुच्यते ॥ ४ ॥

**खलः** 'rogue'. **भुजङ्गः** 'snake, cobra'. **विपरीत** 'reverse'. **वध-क्रमः** 'order, sequence of killing'. **श्रोत्रम्** 'ear'. **प्राणः** 'life, breath'. **वि+मुच्** 'to release, to separate'.

खलानां कण्टकानां च द्विविधैव प्रतिक्रिया ।
उपानन्मुखभङ्गो वा दूरतो वा विसर्जनम् ॥ ५ ॥

**कण्टकः** 'thorn'. **द्विविध** 'two-fold'. **प्रतिक्रिया** 'counter-measure'. **उपानह्** (f) 'shoes'. **भङ्गः** 'breaking'. **विसर्जनम्** 'leaving alone'.

दुर्जनः परिहर्तव्यो विद्यया भूषितोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ ६ ॥

दुर्जनः 'wicked person'. परि+हृ 'to avoid'. मणिः 'jewel'. सर्पः 'snake'. भयङ्करः 'terrifying'.

सर्पदुर्जनयोर्मध्ये वरं सर्पो न दुर्जनः ।
सर्पो दशति कालेन दुर्जनस्तु पदे पदे ॥ ७ ॥

वरम् 'better'.

श्रोत्रं श्रुतेनैव न कुण्डलेन दानेन पाणिर्न तु कङ्कणेन ।
विभाति कायः खलु सज्जनानां परोपकारेण न चन्दनेन ॥ ८ ॥

श्रोत्रम् 'ear'. श्रुतम् 'learning'. कुण्डलम् 'ear-ornament'. दानम् 'gift-giving'. पाणिः 'hand'. कङ्कणम् 'bracelet'. वि+भा 'to shine'. कायः 'body'. खलु 'indeed'. परोपकारः 'benefitting others'. चन्दनम् 'sandalwood paste, a fragrant paste'.

योजनानां सहस्राणि शनैर्गच्छेत्पिपीलिका ।
अगच्छन् वैनतेयोऽपि पदमेकं न गच्छति ॥ ९ ॥

योजनम् '8 miles'. सहस्रम् '1000'. शनैः 'slowly'. पिपीलिका 'ant'. अ+गच्छन् 'not going'. वैनतेयः 'eagle'.

एकेनापि सुपुत्रेण विद्यायुक्तेन भासते ।
कुलं पुरुषसिंहेन चन्द्रेणेव हि शर्वरी ॥ १० ॥

युक्त 'endowed with'. भास् 'to shine'. पुरुष-सिंहः 'lionlike man'. शर्वरी 'night'.

अलसस्य कुतो विद्या अविद्यस्य कुतो धनम् ॥
अधनस्य कुतो मित्रममित्रस्य कुतः सुखम् ॥ ११ ॥

अलसः 'lazy'. अ+विद्यः 'unlearned'. अ+धनः 'one without wealth'.

अ+मित्रः 'one without friends'.

न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः ।
कारणेन हि जायन्ते मित्राणि रिपवस्तथा ॥ १२ ॥

रिपुः 'enemy'. कारणम् 'reason'. हि 'certainly, indeed'.

शैले शैले न माणिक्यं मौक्तिकं न गजे गजे ।
साधवो न हि सर्वत्र चन्दनं न वने वने ॥ १३ ॥

शैलः 'mountain'. माणिक्यम् 'ruby, jewel'. मौक्तिकम् 'pearl'. There is a folk belief that the skull of an elephant contains pearls. साधुः 'righteous, good person'.

पण्डिते हि गुणाः सर्वे मूर्खे दोषाश्च केवलाः ।
तस्मान्मूर्खसहस्रेभ्यः प्राज्ञ एको विशिष्यते ॥ १४ ॥

पण्डितः 'learned, scholar'. दोषः 'fault'. प्राज्ञः 'learned'. विशिष्यते 'stands distinguished'. केवल 'only'.

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥ १५ ॥

विद्वत्-जनः 'learned people'. श्लाघ्यः 'praiseworthy'. अल्पधीः 'person of lesser intelligence'. निरस्तपादपः 'that in which all trees are destroyed'. एरण्डः 'castor-oil plant'. द्रुमायते 'becomes a tree'.

अतिपरिचयादवज्ञा सन्ततगमनादनादरो भवति ।
मलये भिल्लपुरन्ध्री चन्दनतरुकाष्ठमिन्धनं कुरुते ॥ १६ ॥

अतिपरिचयः 'excessive familiarity'. अवज्ञा 'lack of respect'. सन्तत-गमनम् 'constant visiting'. अनादरः 'insult, lack of respect'. मलयः 'southern mountain'. भिल्लः 'tribal people'. पुरन्ध्री 'woman'. काष्ठम् 'wood'. इन्धनम् 'fuel, firewood'.

बालस्यापि रवेः पादाः पतन्त्युपरि भूभृताम् ।
तेजसा सह जातानां वयः कुत्रोपयुज्यते ॥ १७ ॥

रविः 'sun'. पादः 'foot, ray'. भूभृत् 'mountain, king'. वयस् (n) 'age'. उप+युज् 'to use'.

काकः कृष्णः पिकः कृष्णः को भेदः पिककाकयोः ।
प्राप्ते वसन्तसमये काकः काकः पिकः पिकः ॥ १८ ॥

पिकः 'cuckoo bird'. कृष्णः 'black'. भेदः 'difference'. प्राप्त 'arrived'. वसन्त-समयः 'spring time'.

हंसः श्वेतो बकः श्वेतः को भेदो बकहंसयोः ।
नीरक्षीरविवेके तु हंसो हंसो बको बकः ॥ १९ ॥

बकः 'heron'. नीर-क्षीर-विवेकः 'distinguishing milk from water in a mixture of milk and water'. There is a folk belief that a swan can drink only the milk from a mixture of milk and water.

यस्य कस्य तरोर्मूलं येन केनापि मिश्रितम् ।
यस्मै कस्मै प्रदातव्यं यद्वा तद्वा भविष्यति ॥ २० ॥

मूलम् 'root'. मिश्रितम् 'mixed'. प्रदातव्यम् 'should be given'.

कमले कमला शेते हरः शेते हिमालये ।
क्षीराब्धौ च हरिः शेते मन्ये मत्कुणशङ्कया ॥ २१ ॥

कमला 'Lakṣmī'. हरः 'Śiva'. क्षीराब्धिः 'ocean'. हरिः 'Viṣṇu'. मत्कुणः 'bedbug'. शङ्का 'fear'.

आशा नाम मनुष्याणां काचिदाश्चर्यशृङ्खला ।
यया बद्धाः प्रधावन्ति मुक्तास्तिष्ठन्ति पङ्गुवत् ॥ २२ ॥

आशा 'hope'. आश्चर्य-शृङ्खला 'amazing kind of chain'. बद्धः 'tied'. मुक्तः 'free'. पङ्गुः 'lame'.

अहं च त्वं च राजेन्द्र लोकनाथावुभावपि ।
बहुव्रीहिरहं राजन् षष्ठीतत्पुरुषो भवान् ॥ २३ ॥

**राजेन्द्रः** 'great king'. **लोकनाथ** 'he who is the lord of the world, he for whom the whole world is his lord'. **बहुव्रीहि** and **षष्ठीतत्पुरुष** are different types of compounds in Sanskrit.

द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभावः ।
तत् पुरुष कर्म धारय येनाहं स्यां बहुव्रीहिः ॥ २४ ॥

This is a pun on the names of Sanskrit compounds. **द्वन्द्वः** 'a pair'. **द्विगुः** 'one with two cows'. **अव्ययीभावः** 'a state of no spending'. **कर्म धारय** 'hold a job'. **बहुव्रीहिः** 'one with a lot of rice'.

अशनं मे वसनं मे जाया मे बन्धुवर्गो मे ।
इति मे मे कुर्वाणं कालवृको हन्ति पुरुषाजम् ॥ २५ ॥

**अशनम्** 'food'. **वसनम्** 'clothing'. **जाया** 'wife'. **बन्धुवर्गः** 'flock of relatives'. **कालवृकः** 'the wolf of time'. **पुरुष+अजः** 'goatlike man'.

सत्सङ्गाद्भवति हि साधुता खलानां साधूनां न हि खलसङ्गमात्खलत्वम् ।
आमोदं कुसुमभवं मृदेव धत्ते मृद्गन्धं न हि कुसुमानि धारयन्ति ॥ २६ ॥

**सत्सङ्गः** 'company of good people'. **साधुता** 'goodness'. **खल-सङ्गमः** 'company of bad folks'. **खलत्वम्** 'wickedness'. **आमोदः** 'fragrance'. **कुसुमभवः** 'born from flowers'. **मृद्** 'mud, soil'. **गन्धः** 'smell'.

शरदि न वर्षति, गर्जति, वर्षति वर्षासु निःस्वनो मेघः ।
नीचो वदति, न कुरुते, वदति न सुजनः, करोत्येव ॥ २७ ॥

**शरद्** (f) 'autumn'. **वृष्** 'to rain'. **गर्ज्** 'to roar'. **वर्षा** 'rainy season'. **निःस्वनः** 'soundless'. **नीचः** 'lowly person'.

केयूरा न विभूषयन्ति पुरुषं, हारा न चन्द्रोज्वलाः
न स्नानं, न विलेपनं, न कुसुमं, नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥ २८ ॥

**केयूरः** 'bracelet on upper arm' for men and women. **हारः** 'jewel necklace'. **चन्द्र+उज्वलः** 'bright like the moon'. **विलेपनम्** 'using fragrant ointments'. **अलङ्कृत** 'adorned'. **मूर्धजः** 'hair'. **वाणी** 'speech'. **सम्+अलं+कृ** 'to adorn'. **संस्कृता** 'polished, civilized'. **क्षीयते** 'diminish'. **वाग्भूषणम्** 'ornament of speech'.

रात्रिर्गमिष्यति भविष्यति सुप्रभातम्
भास्वानुदेष्यति हसिष्यति पङ्कजश्रीः ।
इत्थं विचिन्तयति कोशगते द्विरेफे
हा हन्त हन्त नलिनीं गज उज्जहार ॥ २९ ॥

**सुप्रभातम्** 'good morning'. **भास्वत्** (m) sun. **उद्+इ** 'to come up, rise'. **पङ्कज+श्रीः** 'beauty of the lotus'. **कोशगत** 'caught in the bud'. **द्विरेफः** 'honey bee'. **हन्त** 'alas'. **नलिनी** 'lotus vine'. **उद्+हृ** 'pull out'.

रामो राजमणिः सदा विजयते, रामं रमेशं भजे
रामेणाभिहता निशाचरचमू, रामाय तस्मै नमः ।
रामान्नास्ति परायणं परतरं, रामस्य दासोऽस्म्यहम्
रामे चित्तलयः सदा भवतु मे, भो राम मामुद्धर ॥ ३० ॥

**राजमणिः** 'jewel among kings'. **रमेशः** 'Viṣṇu, lord of Ramā (= Lakṣmī)'. **अभिहत** 'struck down'. **निशाचरः** 'demon'. **परायणम्** 'goal'. **परतर** 'farther'. **चित्तलयः** 'concentration of mind'. **उद्+हृ** 'pull out (of the misery of life and death)'.

---

# GLOSSARY

# SANSKRIT - ENGLISH GLOSSARY

This glossary contains only the words used in this book, and provides only those meanings in which these words have been used in this book. Therefore, it does not replace more elaborate dictionaries. However, it is sufficient for the purpose of this book.

The Sanskrit words are listed according to the order of the Sanskrit (Devanāgarī) alphabet. You must keep in mind the following order:

*a ā i ī u ū ṛ ṝ ḷ e ai o au ṃ ḥ k kh g gh ṅ c ch j jh ñ ṭ ṭh ḍ ḍh ṇ t th d dh n p ph b bh m y r l v ś ṣ s h*

All combinations of verb roots with pre-verbs (*upasarga*) are alphabetically listed in the same place as the verb root. For all verbs, their third-person singular present tense form has been provided in addition to the verb root. The following grammatical information has been supplied with the words:

**Verb conjugation number 1-10**
**A = ātmanepada**
**adj = adjective (declined in all genders)**
**adv = adverb**
**f = feminine**
**ind = indeclinable**
**m = masculine**
**n = neuter**
**P = parasmaipada**
**prn = pronoun**
**prp = preposition**

Words which have either an *anusvāra* or a homorganic consonant should be checked for both. In the given alphabetical order the *anusvāra* comes before other consonants. The *visarga* also comes before other consonants.

## अ

***aṃśa,*** (m), part, portion
***aṃśu,*** (m), ray
***ákṛtakāram,*** (ind), doing an amazing, previously unknown thing
***ákṣi,*** (n), eye
***agadá,*** (m), medicine
***agní,*** (m), fire
***agra,*** (n), tip, front, beginning
***agraṇī,*** (m), leader
***ágre,*** (ind), in the begining, at the front
***agrebhojam,*** (ind), having eaten before someone
***aṅga,*** (n), body, limb
***aṅgaṇa,*** (n), yard, field

*acala* (adj), unmoving; (m), mountain
*ajá*, (m), goat
*ajapāla*, (m), shepherd
*ajā*, (f), female goat
*ajña*, (adj), ignorant
*ajñāna*, (n), ignorance
*aṭ*, *aṭati*, (1P), to wander, to roam around
*aṇḍa*, (n), egg
*aṇḍaja*, (m), bird, 'egg-born'
*ataḥ*, (ind), for this reason, from here, hence
*átandrita*, (adj), alert, without sloth
*ati*, (ind), very, excessive
*átithi*, (m), guest
*átra*, (ind), here
*atrabhavat*, (prn), his honor over here
*atha*, (ind), now, then
*ad*, *átti*, *atte*, (2P, A), to eat
*adás*, (prn), that (he, she, it, those)
*adyá*, (ind), today
*adháḥ*, (ind), below, beneath, down, downward
*adhana*, (adj), poor, without money
*adhástāt*, (ind), downward, below, beneath
*adhika*, (adj, adv), additional, additionally, more
*adhipati*, (m), king, overlord
*adhunā*, (ind), now
*adhyayana*, (n), study
*ádhvan*, (m), path, way, road, distance
*anaḍúh*, (m), bull
*ananta*, (adj), infinite
*anantarám*, (ind), after, afterwards, later
*ananyá*, (adj), no other, the same
*anartha*, (m), disaster, difficulty, calamity, adversity
*anala*, (m), fire
*anādara*, (m), disrespect
*ánila*, (m), wind
*ánu*, (prp), after, in accordance with
*anujñā*, (f), permission
*anubhava*, (m), experience
*anurāga*, (m), love, passion
*ánta*, (m), end
*antara*, (n), distance, gap
*antarā*, (ind), between
*antarikṣa*, (n), sky
*antarikṣaga*, (m), bird, 'sky-goer'
*ántareṇa*, (ind), concerning
*antikám*, (ind), nearby, in the vicinity
*andhá*, (adj), blind
*ánna*, (n), food
*anyá*, (prn), other, another
*anyatra*, (ind), elsewhere
*anyáthā*, (ind), otherwise
*anyáthākāram*, (ind), having done something otherwise
*anyonya*, (adj), each other, one another
*anvác*, (adj), following

*apakāra*, (m), insult, bad treatment, offense
*apamāna*, (m), insult
*ápara*, (prn), another, other
*aparādha*, (m), sin, offense
*ápi*, (ind), also, a question-marker in clause-initial position
*apūrva*, (adj), amazing, previously unknown
*ábhaya*, (n), protection, lack of fear
*abhāva*, (m), absence, non-existence
*abhítaḥ*, (prp), near, around
*abhidhāna*, (n), name, title, designation
*abhibhava*, (m), insult, defeat
*abhimāna*, (m), pride, conceit
*abhimukham*, (ind), facing someone
*abhilāṣa*, (m), desire, passion, greed
*amara*, (adj), immortal, god
*amitra*, enemy, someone without friends
*amútra*, (ind), in the other world
*amṛ́ta*, (n) ambrosia, nectar, drink of immortality; (adj), not dead
*ambara*, (n), cloth, garment, sky
*ámbu*, (n), water
*araṇya*, (n), forest
*aravinda*, (n) lotus flower
*arí*, (m), enemy
*arc, arcayati*, (10P), to worship
*árjuna*, (m), name of a prince
*arth, artháyate*, (10A), to request
*ártha*, (m), meaning, purpose, object, money
*ard, árdati*, (1P), to beg, approach with a request
*arh, arhati*, (1P), to deserve, should, ought to
*álam*, (ind), sufficient, enough (= no more), capable, able to
*alasa*, (adj), lazy
*álpa*, (adj), small, little
*alpadhī*, (adj), small-witted, fool, unintelligent
*avakāśá*, (m), opportunity, occasion, space
*avajñā*, (f), insult, disrespect
*avamāna*, (m), insult, disrespect
*avaliptá*, (adj), excessively proud, conceited
*avasthā*, (f), condition, state of affairs
*ávahita*, (adj), attentive
*ávāc*, (adj), downward
*avi*, (m), goat
*avidya*, (adj), ignorant
*ávidyā*, (f), ignorance
*avidyāvat*, (adj), ignorant
*avipāla*, (m), shepherd
*aś, aśnāti*, (9P), to eat, enjoy
*aś, aśnuté*, (5A), to enjoy, get, pervade
*aśana*, (n), food
*áśru*, (n), tears
*áśva*, (m), horse
*aṣṭa(ā)pañcāśat*, (f), fifty-eight
*aṣṭa(ā)ṣaṣṭi*, (f), sixty-eight
*aṣṭacatvāriṃśat*, (f), forty-eight
*aṣṭan*, eight

*aṣṭā(a)navati*, (f), ninety-eight
*aṣṭāasaptati*, (f), seventy-eight
*aṣṭātriṃśat*, (f), thirty-eight
*aṣṭādaśan*, eighteen
*aṣṭāviṃśati*, (f), twenty-eight
*aṣṭāśīti*, (f), eighty-eight
*as*, *ásti*, (2P), to be
*as*, *asyati*, (4P), to throw
*asaṃjña*, (adj), senseless, crazy, unconscious, mindless
*asi*, (m), sword
*ásu*, (m), life, breath
*ásura*, (m), demon
*ástam gam*, *ástam gácchati*, (1P), to set (as in sunset)
*ásthi*, (n), bone
*asmád*, (prn), first person pronoun, I, we
*ahan*, (n), day
*ahiṃsā*, (f), non-injury, non-killing

## आ

*ākāśá*, (m), sky
*ākhu*, (m), mouse
*ākhyā*, (f), title, name, designation
*ākhyāna*, (n), narrative, story
*ācārya*, (m), teacher
*ātmaja*, (m), son; (f), daughter
*ātmán*, (m), self, soul
*ādi*, (m), beginning
*ādityá*, (m), sun
*āp*, *āpnóti*, (5P), to attain, obtain, get, achieve
*āpad*, (f), disaster, calamity, adversity
*āmoda*, (m), fragrance
*āmra*, (m), mango tree, mango fruit
*āyata*, (adj), long, elongated
*āyuṣmat*, (adj), long-lived one
*āyus*, (n), life, life-span
*ālāna*, (n), post to tie an elephant
*āśā*, (f), hope
*aśīti*, (f), eightly
*āśú*, (adj, adv), swift
*āśrama*, (m), hermitage
*ās*, *áste*, (2A), to sit, remain, stay
*ās*, *pari+upa+*, *paryupáste*, (2A), to serve, attend upon, be devoted to
*ásana*, (n), seat
*āsanna*, (adj), nearby
*āsvāda*, (m), taste, flavor, enjoyment

## इ

*i*, *éti*, (2P), to go
*i*, *adhi+*, *adhīté*, (2A), to study

*i, adhi+, adhyeti,* (2P), to remember
*icchā,* (f), desire
*ijyā,* (f), sacrifice, ritual
*itara,* (prn), other, another. *itarad* in nt.
*iti,* (ind), thus, quotation-marker
*ittham,* (ind), thus
*idam,* (prn), this (he, she, it, these)
*indra,* (m), a Vedic god
*indriya,* (n), sense organs
*indhana,* (n), fuel, fire-wood
*iyat,* (adj), this much, these many
*iva,* (ind), like
*iṣ, icchati,* (6P), to desire, want, wish
*iṣu,* (m), arrow
*iṣṭa,* (adj), desired, desirable
*iha,* (ind), here

## ई

*īkṣ, īkṣate,* (1A), to see
*īkṣ, nir+, nirīkṣate,* (1A), to observe, examine
*īkṣ, pari+, parīkṣate,* (1A), to examine, investigate
*īkṣ, prati+, pratīkṣate,* (1A), to await
*īśa,* (m), God, lord, powerful
*īśvara,* (m), God, lord, powerful, capable, ruler
*īs, īṣṭe,* (2A), to rule, control
*īh, īhate,* (1A), to desire
*īhā,* (f), desire

## उ

*ujjayinī,* (f), name of a city in central India
*ujvala,* (adj), bright
*uttāna,* (adj), facing upwards
*udaka,* (n), water
*udac,* (adj), upwards, northwards,
*udara,* (n), belly, stomach
*udarapūram,* (ind), filling one's belly
*udāra,* (adj), generous
*udgama,* (m), origin, source
*udbhava,* (m), origin, source, birth
*udyāna,* (n), garden
*unmatta,* (adj), drunk, intoxicated, crazy, conceited
*unmanas,* (adj), crazy
*upajīvikā,* (f), livelihood
*upamā,* (f), comparison
*upari,* (ind), above
*upavana,* (n), garden
*upādhyāya,* (m), teacher
*upānah,* (f), shoe
*upāya,* (m), means
*upeyivas,* < *upa+i,* (adj), one who approached (perfect ppl.)

*ubhá*, (prn), both
*ubhayátaḥ*, (ind), on both sides
*uraga*, (m), snake, 'chest-goer'
*úras*, (n), chest
*urú*, (adj), big, great, valuable, large
*uṣás*, (f), dawn, goddess of dawn
*uṣṭra*, (m), camel

ऊ

*ūnatriṃśat*, (f), twenty-nine
*ūnaviṃśati*, (f), nineteen
*ūrdhvám*, (ind), upwards, above
*ūṣṇa*, (adj), hot, warm

ऋ

*ṛṇa*, (n), debt
*ṛtú*, (m), season
*ṛté*, (ind), except, without
*ṛtvíj*, (m), priest at a sacrifice
*ṛṣi*, (m), sage, hermit

ॠ

ऌ

ए

*éka*, (m,n,f), one
*ekacatvāriṃśat*, (f), forty-one
*ekatriṃśat*, (f), thirtyone
*ekadā*, (ind), once
*ekanavati*, (f), ninety-one
*ekapañcāśat*, (f), fifty-one
*ekaviṃśati*, (f), twenty-one
*ekaṣaṣṭi*, (f), sixty-one
*ekasaptati*, (f), seventy-one
*ekādaśan*, eleven
*ekānta*, (m), seclusion, one corner
*ekānnaviṃśati*, (f), nineteen
*ekāśīti*, (f), eighty-one
*ekonacatvāriṃśat*, (f), thirty-nine
*ekonatriṃśat*, (f), twenty-nine
*ekonanavati*, (f), eighty-nine
*ekonapañcāśat*, (f), forty-nine
*ekonaviṃśati*, (f), nineteen
*ekonaśata*, (n), ninety-nine
*ekonaṣaṣṭi*, (f), fifty-nine

*ekonasaptati*, (f), sixty-nine
*ekonāśīti*, (f), seventy-nine
*etad*, (prn), this (he, she, it, these)
*etāvat*, (adj), this much, these many
*eraṇḍa*, (m), castor oil plant
*eva*, (ind), only, certainly

## ऐ

## ओ

*odana*, (m), cooked rice

## औ

*auṣadha*, (n), medicine

## क

*kaṃsa*, (m), name of a demon-king of Mathurā
*kakubh*, (f), direction
*kaṅkaṇa*, (n), bracelet
*kacchapa*, (m), turtle, tortoise
*kaṭhina*, (adj), hard, harsh, tough
*kaṇṭaka*, (m), thorn
*kaṇṭha*, (m), throat
*kaṇṭhe kṛ, karoti, kurute*, (8P, A), to memorize
*kaṇva*, (m), name of a sage
*kath, kathayati*, (10P), to tell, narrate, report
*kathaṅkāram*, (ind), in what way?, how?
*katham*, (ind), how?, why?
*kathā*, (f), story
*kadā*, (ind). when?
*kadācit*, (ind), sometime
*kanaka*, (n), gold
*kanyā*, (f), girl, daughter
*kaparda*, (m), a shell used as dice, a shell used as a coin
*kapi*, (m), monkey
*kapilavastu*, (n), name of a city
*kam, kāmayate*, (10A), to desire
*kamala*, (n), lotus flower
*kamalā*, (f), goddess Lakṣmī
*kamp, kampate*, (1A), to tremble, to shake (intransitive), to vibrate
*kambala*, (m), blanket
*kara*, (m), hand, ray, tax
*karuṇā*, (f), compassion
*karṇ, ā+, ākarṇayati*, (10P), to listen, to hear
*karṇa*, (m), ear
*kartṛ*, (adj), doer, maker, creator
*karman*, (n), action, ritual

*kalevara*, (n), body
*kavala*, (adj), only, alone
*kavi*, (m), poet
*kavitā*, (f), poem, poetry
*kavirāja*, (m), king among poets, great poet
*kāṃsya*, (n), bronze
*kāka*, (m), crow
*kākī*, (f), female crow
*kāṅkṣ*, *kāṅkṣati*, (1P), to want, wish, desire
*kāṇa*, (adj), blind, one-eyed
*kānana*, (n), forest
*kānti*, (f), beauty, brilliance, luster, shining
*kāma*, (m), desire, passion, god of love, love
*kāmaduh*, (f), wish-yielding cow
*kāmam*, (adv), certainly, as one wishes
*kāya*, (m), body
*kāraṇa*, (n), cause, reason
*kārya*, (n), duty, obligation
*kāla*, (m), time
*kālidāsa*, (m), name of a Sanskrit poet
*kālīdevī*, (f), goddess Kālī
*kāvya*, (n), poem, poetry
*kāṣṭha*, (n), wood, stick
*kintu*, (ind), however, but
*kim*, (prn), what? who? which?
*kiyat*, (adj), how much? how many?
*kiraṇa*, (m), ray
*kila*, (adj), supposedly, reportedly
*kīrt*, *sam+*, *saṃkīrtayati/te*, (10P, A), to announce, declare, tell
*kīrti*, (f), fame
*kīrtimat*, (adj), famous
*kuṭumba*, (n), family, wife
*kuṭhāra*, (m), axe
*kuḍava*, (m), measuring cup
*kuṇḍala*, (n), ear-ornament
*kutaḥ*, (ind), why? for what reason? from where?
*kutra*, (ind), where
*kudhī*, (adj), wicked person, ignorant, evil-minded
*kup*, *kupyati*, (4P), to get angry
*kumbha*, (m), water pot made out of clay
*kula*, (n), family
*kuśala*, (n), well-being, welfare
*kuśala*, (adj), skillful, clever
*kusuma*, (n), flower
*kusumapura*, (n), name of a city
*kūpa*, (m), water well
*kūrma*, (m), turtle, tortoise
*kr̥*, *karoti*, *kurute*, (8P, A), to do, make
*kr̥*, *apa+*, *apakaroti/kurute*, (8P, A), to offend, insult
*kr̥*, *alam+*, *alaṃkaroti/kurute* (8P, A), to decorate, adorn
*kr̥*, *upa+*, *upakaroti/kurute*, (8P, A), to benefit others
*kr̥t*, *kr̥ntati*, (6P), to cut
*kr̥taka*, (adj), false, made, adopted
*kr̥tam*, (ind), enough

*kṛte*, (ind), for the sake of
*kṛpā*, (f), compassion, pity
*kṛṣ*, *karṣati*, (1P), to pull, drag
*kṛṣ*, *ā+*, *ākarṣati*, (1P), to attract, pull
*kṛṣ*, *kṛṣati*, (6P), to plough
*kṛṣaka*, (m), farmer
*kṛṣṇa*, (adj), dark, black; (m), name of a prince-god
*kṛṣṇavarman*, (m), name of a person
*kṛṣṇasarpa*, (m), a deadly snake
*kṛṣṇā*, (adj. f.), dark, black; (f), name of a queen
*keyūra*, (m), bracelet for the upper arm
*keli*, (f), play, sport, game
*kevalam*, (ind), only
*keśa*, (m), hair
*kaikeyī*, (f), name of a queen
*kopa*, (m), anger
*kovidāra*, (m), a kind of tree
*kośa*, (m), treasure, enclosure, flower-bud
*kausalyā*, (f), name of a queen
*krand*, *krandati*, (1P), to cry, weap, scream, shout
*kram*, *ati+*, *atikrāmati*, (1P), to cross, transgress
*kram*, *ati+*, *atikrāmyati*, (4P), to cross, transgress
*kram*, *pra+*, *prakramate*, (1A), to begin, to start
*krama*, (m), order, sequence
*kriyā*, (f), action
*krī*, *krīṇāti*, *krīṇīte*, (9P, A), to buy, purchase
*krīḍ*, *krīḍati*, (1P), to play, sport
*krīḍā*, (f), game, play, sport
*krudh*, *krudhyati*, (4P), to get angry
*kruś*, *krośati*, (1P), to scream, cry, weap, accuse
*kruś*, *ā+*, *ākrośati*, (1P), to scream, blame, cry, accuse
*kroṣṭu*, (m), jackal, fox
*kliś*, *kliśnāti*, (9P), to torture, bother, disturb
*kliś*, *kliśyate*, (4A), to suffer, be bothered, pained
*kva*, (ind), where?
*kṣam*, *kṣamate*, (1A), to tolerate, withstand, bear
*kṣaya*, (m), decrease, decay, diminishing
*kṣal*, *kṣālayati/te*, (10P, A), to wash, clean
*kṣi*, *kṣiṇāti*, (9P), to diminish
*kṣi*, *kṣiṇoti*, (5P), to destroy
*kṣiti*, (f), ground, earth
*kṣip*, *kṣipati*, (6P), to throw
*kṣip*, *adhi+*, *adhikṣipati*, (6P), to accuse, abuse, curse, insult
*kṣip*, *ni+*, *nikṣipati*, (6P), to throw down
*kṣip*, *pra+*, *prakṣipati*, (6P), to throw forcefully
*kṣip*, *sam+*, *saṃkṣipati*, (6P), to summarize, shorten, contract
*kṣipra*, (adj), quick, swift
*kṣipram*, (adv), quickly, swiftly
*kṣīra*, (n), water, milk
*kṣīranidhi*, (m), ocean, 'treasure of water'
*kṣudra*, (adj), mean, small
*kṣudh*, (f), hunger
*kṣudhita*, (adj), hungry

*kṣetrapati*, (m), owner of a field, farmer
*kṣubh, kṣubhyati*, (4P), to be upset, agitated, angry

## ख

*kha*, (n), sky, space
*khaga*, (m), bird, 'sky-goer'
*khañja*, (adj), lame
*khan, khánati*, (1P), to dig
*khan, ud+, útkhanati*, (1P), to dig up
*khala*, (adj), scoundral, rogue, evil, wicked person
*khala*, (n), threshing ground
*khalapū*, (m), one who sweeps the threshing ground
*khalu*, (ind), indeed
*khāṇḍava*, (n), name of a forest
*khād, khā́dati*, (1P), to eat
*khid, khídyate*, (4P), to be depressed, upset, dejected
*khel, khélati*, (1P), to play, sport
*khyā, khyāti*, (2P), to tell, narrate, report

## ग

*gaṅgā*, (f), name of the river Ganges
*gája*, (m), elephant
*gaṇ, gaṇáyati/te*, (10P, A), to count
*gaṇ, ava+, avagaṇáyati*, (10P), to insult, disrespect, look down upon
*gaṇá*, (m), flock, tribe, group
*gaṇḍa*, (m), cheek
*gáti*, (f), course, movement, choice
*gántṛ*, (adj), goer
*gandha*, (m), fragrance, smell
*gandharva*, (m), divine musicians
*gam, gácchati*, (1P), to go
*gam, adhi+, ádhigacchati*, (1P), to acquire, attain
*gam, anu+, ánugacchati*, (1P), to follow
*gam, ava+, ávagacchati*, (1P), to learn, know, understand
*gam, ā+, ā́gacchati*, (1P), to come
*gam, upa+, úpagacchati*, (1P), to approach
*gam, nir+, nírgacchati*, (1P), to go out, leave
*gam, prati+ā+, pratyāgacchati*, (1P), to return
*gam, sam+, sáṃgacchate*, (1A), to unite, go together
*gariman*, (m), magnitude, greatness
*garuḍa*, (m), eagle
*garga*, (m), a clan name
*garj, garjati*, (1P), to roar
*gardabhá*, (m), ass
*gardabhī*, (f), she ass
*garva*, (m), pride, conceit
*gala*, (m), throat
*gáhana*, (adj), dense, thick, deep
*gāndharvá*, (adj), pertaining to Gandharva's, e.g. form of marriage, love marriage

*gāmin*, (adj), goer
*gāh, gāhate*, (1A), to dive, plunge, swim
*gir*, (f), speech, words, language
*giri*, (m), mountain
*gītá*, (n), song
*guṇá*, (m), quality, virtue, property
*guṇin*, (adj), virtuous
*gurú*, (m), teacher
*gṛhá*, (m, n), house
*geha*, (n), house
*gai, gāyati*, (1P), to sing
*gopá*, (m), cowherd
*gopā*, (m), cowherd
*gopāla*, (m), cowherd
*granth, grathnāti*, (9P), to weave a garland, compose, construct
*gras, grásate*, (1A), to devour, swallow, eat like an animal
*grah, gṛhṇāti, gṛhṇīté*, (9P, A), to catch, take, grab, hold
*grāma*, (m), village
*grīṣma*, (m), hot, summer season
*glau*, (m), moon

## घ

*ghaṭa*, (m), water pot, jar
*ghuṣ, ghoṣáyati/te*, (10P, A), to announce, declare
*ghṛta*, (n), ghee, clarified butter
*ghrā, jighrati*, (1P), to smell

## ङ

## च

*cakṛvas*, (adj), one who did (perfect ppl. < *kṛ*)
*cakra*, (n), wheel, discus (a weapon of Viṣṇu)
*cákṣus*, (n), eye
*cañcu*, (f), beak of a bird
*catuḥpañcāśat*, (f), fifty-four
*catuḥṣaṣṭi*, (f), sixty-four
*catur*, (m, n, f), four
*caturaśīti*, (f), eighty-four
*caturṇavati*, (f), ninety-four
*caturdaśan*, fourteen
*caturviṃśati*, (f), twenty-four
*catuścatvāriṃśat*, (f), forty-four
*catustriṃśat*, (f), thirty-four
*catussaptati*, (f), seventy-four
*catvāriṃśat*, (f), forty
*candana*, (n), Sandal-wood tree, Sandal-wood
*candrá*, (m), moon
*candrámas*, (m), moon
*camū*, (f), army
*car, carati*, (1P), to move, go, walk

*car, ā+, ācarati,* (1P), to perform, behave, conduct
*carcā,* (f), discussion, debate
*carcita,* (adj), smeared
*cal, cálati,* (1P), to move, go, walk
*cātaka,* (m), a type of bird
*cāpa,* (m, n), bow
*cāru,* (adj), beautiful, attractive
*ci, cinóti, cinuté,* (5P, A), to collect, pick, pluck, select
*ci, ava+, avacinoti,* (5P), to collect, pluck, pick
*ci, nis+, niścinoti/cinute,* (5P, A), to decide, determine
*cittalaya,* (m), concentration of mind, meditation
*cint, cintáyati/te,* (10P, A), to think, contemplate
*cintana,* (n), contemplation, thinking
*cud, codáyati,* (10P), to instigate, object, question
*cur, coráyati/te,* (10P, A), to steal, rob
*cūrṇa,* (n), powder, dust
*cūrṇapeṣam,* (ind), like beating something into powder
*cet,* (ind), if
*cétas,* (n), mind
